ISSN : 2278-036X

## पूर्णप्रज्ञसंशोधनमन्दिरम्

नवदेहलीस्थकेन्द्रसर्वकारीयशिक्षणमन्त्रालयाधीनकेन्द्रीयसंस्कृतविश्वविद्यालयेन
(राष्ट्रियसंस्कृतसंस्थानेन) 'आदर्शशोधसंस्थानम्' इति सम्मानितम्

# प्रज्ञा

## पूर्णप्रज्ञसंशोधनमन्दिरशोधपत्रिका - १२

पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, डा. विश्वेशतीर्थस्वामीजीमार्गः,
कत्तरिगुप्पमुख्यमार्गः, बेङ्गलूरु-५६००२८

२०२१–२२

**प्रज्ञा – २०२१–२२**
**पूर्णप्रज्ञसंशोधनमन्दिरशोधपत्रिका – १२**

सम्पादकः- **डा. ए.वि.नागसम्पिगे**, निदेशकः पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

उपसम्पादकः- **डा रङ्गनाथकट्टि**, उपनिदेशकः पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

प्रकाशकः- **पूर्णप्रज्ञसंशोधनमन्दिरम्**
**पूर्णप्रज्ञविद्यापीठम्, डा. विश्वेशतीर्थस्वामीजीमार्गः**
**कत्तरिगुप्पमुख्यमार्गः,बेङ्गलूरु - २८**

पृ.सङ्ख्या - **८ + ११८**

मूल्यम् - **१०० रूप्यकाणि**

**लावण्यमुद्रणद्वारा मुद्रितम् ।**

ISSN : 2278-036X

**POORNAPRAJNA SAMSHODHANA MANDIRAM**

Recognised as 'Adarsha Shodha Sansthan'
by Central Sanskrit University, (Rashtriya Sanskrit Samsthan),
Ministry of Education, Govt. of India, New Delhi

# Prajñā

Research Journal Vol. - XII
of Poornaprajna Samshodhana Mandiram

*Publisher :*
Poornaprajna Samshodhana Mandiram
Poornaprajna Vidyapeetha, Dr. Vishveshatirtha Swamiji Road,
Katriguppa Main Road, Bangalore-560028

2021-22

**Prajñā** - Research Journal Vol. - XII
of Poornaprajna Samshodhana Mandiram

*Editor* : **Dr. A.V. Nagasampige** Director, Poornaprajna Samshodhana Mandiram

*Co-editor* : **Dr. Ranganatha Katti** Dy.Director, Poornaprajna Samshodhana Mandiram

*Published by* : **Poornaprajna Samshodhana Mandiram**
Poornaprajna Vidyapeetha, Dr. Vishveshatirtha Swamiji Road,
Katriguppa Main Road, Bengaluru - 560 028.
Ph. : 080-26694026

First Edition : 2022

No. of Pages : viii + 118

Price : Rs. 100 /-

*Printed by :* **Lavanya Mudrana**, Bengaluru.

# अनुग्रहसन्देशः

सर्वेभ्यः दानेभ्योऽन्नदानं प्रशस्यते । अन्नेन तु क्षणिका तृप्तिः । यावदन्नं न जीर्यते तावत्पर्यन्तं तुष्टिः । परन्तु विद्यादानेनेहामुत्र च प्रदाता मोदते । अत्र वितता कीर्तिः अमुत्र तु देवानां सम्प्रीतिः । अत एवोक्तमभियुक्तैः 'अन्नेन क्षणिका तृप्तिः यावज्जीवं च विद्यया' इति । तत्रापि 'सा विद्या तन्मतिर्यया' इत्युक्तदिशा ब्रह्मविद्या विद्यानां विशिष्यते । एवं च ब्रह्मविद्यां तत्साधनीभूतशीक्षाव्याकरणाद्यङ्गविद्यां च प्रदातुः वितता कीर्तिः भगवतः प्रीतिश्च प्रजायते । एतादृशतत्त्वज्ञानप्रसारार्थमेवास्माभिः स्थापितेन पूर्णप्रज्ञसंशोधनमन्दिरेण 'प्रज्ञा'नाम्नीं शोधपत्रिकां नैकविद्वत्तल्लजविद्यार्थिजनतोषिणीं प्रतिसंवत्सरं प्रकाश्यमानां विलोक्य हृष्टान्तरा वयम् ।

विशिष्यास्यां शोधपत्रिकायां नैके विद्वांसः शोधविद्यार्थिनश्च वैदुष्यपूर्णशोधलेखनैः प्रज्ञायाः वैभवं समभिवर्धितवन्त इति विभावयामः । महता श्रमेण विद्यावारिधिछात्रैरधीतेषु विमृष्टेषु च विषयेषु शोधलेखनं प्रदत्तम् । गुणैकग्रहणतत्पराः विद्वांसः हंसक्षीरन्यायेन गुणानेव उपादाय परित्यज्य च दोषान् विद्यार्थिनां मार्गदर्शनं विधास्यन्तीति आशास्महे । शोधपत्रिकायामस्यां शोधलेखनप्रदातॄणां समेषां विदुषां प्रज्ञाभिवृद्धिं भगवति प्रार्थयामहे ।

**श्रीश्रीविश्वप्रसन्नतीर्थश्रीपादाः**
श्रीपेजावराधोक्षजमठः, उडुपि

# From the Editor's Desk

With the continous encouragement of the authorities of the Rashtriya Sanskrit Sansthan, New Delhi, we have engaged in publication of Research Journal and unpublished manuscripts' publication. Now 'Prajna - 2019-2020' is submitted to the learned scholars and readers. The current issue of our Research Journal is the 10th in the series.

Eminent scholars of the philosophy and Sanskrit literature have contributed creative and resourceful articles for this Journal. Very unexpectedly I found a research paper submitted by Late Prof. Badarinatha Shukla of Varanasi in 1998. Now I am extremely happy to publish the article which was to be published very earlier. Especially I express my heartfelt gratitude to internationally accredited scholars like Prof. M. Sivakumar Swamy, Prof. M.N. Narasimha Murthy, Dr Janardan Hegde, Dr. S. Jagannatha and Dr. T.V. Satyanarayana for their valuable contribution. I also record my appreciation and gratitude to Dr. Ranganatha Katti, Dr. Shankaranarayana Adiga, Dr. E.N. Srinivas, Dr. L. Sudheendra and Srinidhi Pyati for their research-oriented papers.

Vidyavaridhi (Ph.D.) students of our Institution were insisted to present research paper on their Vidyavaridhi (Ph.D.) subject and allied subjects of any branches of Indian philosophy and literature. Few students have presented research papers on various subjects here in this issue, of their interest. Most of the students have made good efforts in preparing the research paper in the standard format. It is needless to say that every student should follow the guidelines of National-level research methodology for the benefit of learned readers, and appraisal of scholars.

The source of inspiration behind this useful venture is our founder H.H. Sri Sri Vishvaprasannatirtha Swamiji, Senior Pontiff of Sri Pejavara Mutt, Udupi. To him, we owe all we have and all we will have. How can we repay him for his support and encouragement except through our gratitude and Pranamas, at his lotus feet!

I also record my gratitude to Prof. Ramakrishna Bhatt, Chairman, and other members of Managing Committee of Poornaprajna Samshohana Mandiram, for their kind support in our academic activities.

**Dr. A.V. Nagasampige**
Director, Poornaprajna Samshodhana Mandiram

# विषयानुक्रमणिका

1. **शक्तिविशिष्टाद्वैतदर्शनक्षेत्रे नूत्नाः योजनाः**

- प्रा. एम्. शिवकुमारस्वामी 1-5

2. **पत्रिकाप्रकाशनक्षेत्रे संस्कृताभिवृद्धौ नूत्नाः योजनाः**

- डा. जनार्दन हेगडे 6-9

3. **वेदपरिरक्षणोपायाः** - डा. टि.वि. सत्यनारायणः 10-19

6. **आगामिनि विंशतिवर्षावधौ संस्कृतक्षेत्रे साधनीयस्य कर्मणो विषये किञ्चित्** - डा. एस्.जगन्नाथः, मैसूरु 20-33

4. **बौद्धदर्शने – ज्ञानस्वरूपम्** - **डा. नारायणः** 34-42

5. **काव्यप्रकाशाद्युक्तानि काव्यप्रयोजनानि** - डा.रङ्गनाथकट्टि 43-47

6. **सम्बन्धविषये अद्वैतदर्शनस्य दायित्वम् इत्यत्र एका समीक्षा**

- डा. शङ्करनारायण अडिगः 48-52

7. **श्रीविद्याधिराजतीर्थीया विष्णुसहस्रनामव्याख्या**

-डा. माधव एन्. पाण्डुरङ्गी 53-59

8. **अद्वैतमतानुसारेण समवायखण्डनम्** -डा. श्रीकान्तबायरि 60-62

9. **तत्त्वानि कानि ? कति ?** - वेङ्कटनरसिंहाचार्यः 63-68

10. **परमाणुः** - भीमसेनगुत्तल 69-73

11. **लिङर्थविचारे न्यायमतविमर्शः** - गुरुराजकुलकर्णी 74-76

12. **भाषाधिगमस्य विकासोपायाः** - आनन्दः सि.आर्. 77-81

13. **भासकृतिषु स्त्रीविचारः** - बि.ए.नरसिंहय्यः 82-87

14. **अहिंसास्वरूपविमर्शः** - श्रीनिधि प्याटि 88-94

16. **शास्त्रदीपिकोक्तरीत्या मीमांसकमते मोक्षस्वरूपनिरूपणम्**

- अनन्तशर्मा बि.जि. 95-99

17. **न्यायशास्त्रे प्रमाणानि** - सुशीलेन्द्र श्रीपाद गोग्गि 100-103

18. सिद्धान्तकौमुदीव्याख्यायां सुखबोधिन्यां
कृत्यप्रकरणस्य अध्ययनम् - शिवगुहन् एस्. 104-110
19. विदुषा चोक्कनाथदीक्षितेन विरचितशब्दकौमुदीग्रन्थस्य
परिचयः वैशिष्ट्यं च - जी.कार्त्तिकेयन् 111-118

* * *

# शक्तिविशिष्टाद्वैतदर्शनक्षेत्रे नूत्नाः योजनाः

- प्रा. एम्. शिवकुमारस्वामी

शक्तिविशिष्टाद्वैतं भारतीयवेदान्तदर्शनेषु एकतमं वीरशैवपरं दर्शनम् । सर्ववेदान्तदर्शन-साधारणत्वेन इदं दर्शनमपि प्रस्थानत्रयावलम्बि । वेदसंहितोपनिषद्भ्यः सम्भूताः इयमस्य परम्परा भगवद्गीतया उपबृम्हिता शैवागमोत्तरभागानां द्वारा प्रवर्तिता वर्तते । शैवागमोत्तरभागानां सारसङ्ग्रहभूतः शिवयोगिशिवाचार्यप्रणीतः सिद्धान्तशिखामणिरस्य सिद्धान्तस्याऽकरेषु मुख्यतमः । शैवागमेषु सिद्धान्तशिखामणौ च ये वीरशैवसदाचारसद्विचाराः प्रतिपादितास्ते ऋग्वेदादिसंहिताभ्यः उपनिषद्भ्यश्च स्वीकृताः सन्ति । यद्यपि धार्मिकाचरणेषु परिवर्तितत्वं परिष्कृतत्वं च दृश्यते तथाऽपि दार्शनिकविचारेषु वेदसंहितोपनिषदां प्रभावः यथावद् वरीवर्ति । जगत्कारणं ब्रह्म अत्र परशिवः । तादृशः परशिवः, जीवः, जगत्, परशिवस्य शक्तिविशिष्टत्वम्, षट्स्थलात्मकस्य साधनमार्गस्य मूलभूताः अंशाश्चेति समेषां तत्त्वविचाराणां वेदसंहितोपनिषदः एव मूलम् । जीवात्मपरमात्मनोः स्वरूपं, तयोः अंशांशिरूपः सम्बन्धः, साधनमार्गगतो भक्तिज्ञानक्रियासमन्वयः इत्यादिविषये भगवद्गीता एव मूलप्रेरणा । शक्तिविशिष्टाद्वैतसिद्धान्तपरग्रन्थेषु भगवद्गीतायाः सूक्तयः 'एषा भगवदुक्तिः' इत्यादिनिर्देशपूर्वकं प्रमाणत्वेन उदाह्रियन्ते । ब्रह्मसूत्रं तु अन्यवेदान्तदर्शन-साधारणत्वेन शक्तिविशिष्टाद्वैतसिद्धान्तप्रतिपादने समुचिताधारत्वाय कल्पते ।

क्रिस्ताब्दस्य एकादशतमे शतके श्रीपतिपण्डितो नाम विद्वान् श्रीकरणभाष्याख्यं ब्रह्मसूत्रभाष्यं विरचय्य शक्तिविशिष्टाद्वैतसिद्धान्तं प्रत्यपीपदत् । अनन्तरं क्रिस्ताब्दीये चतुर्दशतमशतके नीलकण्ठशिवाचार्यः क्रियासाराख्यं गद्यपद्यात्मकं ब्रह्मसूत्रव्याख्यानं रचयामास । यद्यपि वीरशैवपराणि उपनिषदां भगवद्गीतायाश्च भाष्यग्रन्थाः नोपलभ्यन्ते प्राचीनाः तथाऽपि श्रीकरभाष्ये क्रियासारे च यथावसरम् उपनिषदां भगवद्गीतायाश्च वाक्यानि उदाहृतानि सव्याख्यानं सिद्धान्तपक्षे योजितानि च । क्रिस्ताब्दीय सप्तदशतमशतके काश्मीरेषु प्रसिद्धः स्वप्रभानन्दशिवाचार्यः शिवाद्वैतमञ्जरीनामानं वादग्रन्थं विरच्य शक्तिविशिष्टाद्वैतसिद्धान्तं समर्थयामास । तस्मिन्नेव शतके मरितोण्टदार्यनामा शिवयोगीश्वरः वीरशैवानन्दचन्द्रिकाख्यम् अपरं वादग्रन्थं प्रणीतवान् । क्रिस्ताब्दीय नवदशविंशतितमशतकयोः सन्धिकाले उमचिगिशङ्करशास्त्रि-सदाशिवाचार्यादिभिः उपनिषदां भगवद्गीतायाश्च भाष्यग्रन्थः विरचिताः सन्ति । अयमत्र शक्तिविशिष्टाद्वैतसिद्धान्त-परम्परायाः सङ्क्षेपः ।

**शैवागमाः सिद्धान्तशिखमणिश्च -**

वीरशैवसिद्धान्तस्तावत् शैवागमोत्तरसिद्धान्तः इति प्राचुर्येण ज्ञायते । कारणागमादारभ्य वातुलागमपर्यन्तम् अष्टाविंशतिसङ्ख्याकाः शैवागमाः सन्ति । तत्संबद्धाश्च सन्ति अष्टोत्तरद्विशतम् उपागमाः । इदं तु विपुलं धार्मिकसाहित्यम् । वीरशैवमतं तत्रोत्तरभागेषु प्रतिष्ठां नीतम् । तदुक्तं सिद्धान्तशिखमणौ-

'सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते ।
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम् ।।' (५.१४) इति ।

'सिद्धान्तः' 'महातन्त्रम्' चेति शब्दौ शैवागमान् विमृशतः । वीरशैवानां सदाचारसद्विचारसम्बद्धाः पारिभाषिकशब्दाः शैवागमोत्तरभागेषु समुपलभ्यन्ते । वीरशैवानां साधनमार्गः षट्स्थलात्मकः इत्युक्तं प्राक् । भक्तस्थलम्, माहेश्वरस्थलम्, प्रसादिस्थलम्, प्राणलिङ्गिस्थलम्, शरणस्थलम्, ऐक्यस्थलं चेति षट्स्थलानि । श्रद्धाभक्तिः, निष्ठाभक्तिः, अवधानभक्तिः, अनुभवभक्तिः, आनन्दभक्तिः, समरसभक्तिश्चेति षड्विधभक्तिविशिष्टेषु सोपानभूतेषु षट्स्थलेषु भक्तिविकासक्रमेण प्राप्तज्ञानपारम्यो मुमुक्षुः सामरस्यात्मकं शिवसायुज्यं प्राप्नोति । षट्स्थलान्तर्गतत्वेन अष्टावरणानि पञ्चाचाराश्च उच्यन्ते । गुरु-लिङ्ग-जङ्गमाः पूज्यावरणानि, भस्म-रुद्राक्ष-मन्त्राः पूजासाधनभूतानि आवरणानि, पादोदक-प्रसादौ पूजाफलरूपे आवरणे इति आहत्य अष्टावणानि । भक्तानां श्रद्धापोषकाणि आवरणानि एतानि । लिङ्गाचारः, सदाचारः, शिवाचारः, गणाचारः, भृत्याचारश्चेति पञ्च आचाराः । आचाराश्चैते धार्मिकसामाजिकनीतिसंहिताः सन्तः व्यक्तिसमाजयोः सामरस्याय कल्पन्ते । परशिवस्य चराचरजगतश्च स्वरूपम्, परशिवस्य पञ्चकृत्यानि (सृष्टिः, स्थितिः, संहारः, तिरोधानम्, अनुग्रहास्तानि), मुक्तिस्वरूपं चेति शैवागमानां विषयाः ।

सिद्धान्तशिखामणौ शिवयोगिशिवाचार्यः (क्रि.श.९००) शैवागमोत्तरभागानां शैवपुराणानां वीरशैवपरान् सदाचारसद्विचारान् सङ्गृह्य एकोत्तरशतस्थलव्यवस्थां परिकल्प्य वीरशैवसिद्धान्तं प्रत्यपादयत् । तत्र वीरशैव सिद्धान्तः शिवाद्वैतमिति नाम्ना ज्ञायते । शिवाज्ञानुसारं भूलोकं प्रति प्रस्थितं रेणुकाचार्यम् उद्दिश्य यदुक्तं शिवेन 'मदद्वैतपरं शास्त्रं स्थापयिष्यसि भूतले' इति तेनेदं गम्यते । अस्य नाम्नः व्याख्यानं अग्रे दर्शयिष्यते ।

**सिद्धान्तस्य नामानि -**

अस्य वीरशैवसिद्धान्तस्य नामानि अनेकानि सन्ति । तत्र शक्तिविशिष्टाद्वैतम् इत्यस्य प्रचुरं

नाम । इदं तु नाम अस्य सिद्धान्तस्य चरमोद्देशद्योतकत्वेन अन्वर्थम् अस्ति । एवमिदं विगृह्यते- शक्तिश्च शक्तिश्च शक्ती, ताभ्यां विशिष्टौ (शिवजीवौ, शक्तिविशिष्टौ, शक्तिविशिष्टयोः अद्वैतं शक्तिविशिष्टाद्वैतम् इति । तत्र सूक्ष्मशक्तिः स्थूलशक्तिश्चेति शक्ती । सूक्ष्मशक्तिः परमात्मनि, स्थूलशक्तिश्च जीवात्मनि । सूक्ष्मशक्तिः सूक्ष्मचिच्छक्तिः सूक्ष्माचिच्छकिक्तश्चेति द्विविधा । सूक्ष्मचिच्छक्तिः सर्वज्ञत्वम्, सूक्ष्माचिच्छक्तिश्च सर्वकर्तृत्वम् । एवमेव स्थूलशक्तिरपि द्विविधा - स्थूलचिच्छक्तिः स्थूलाचिच्छक्तिश्चेति । तत्र स्थूलचिच्छक्तिः किञ्चिज्ज्ञत्वम्, स्थूलाचिच्छक्तिश्च किञ्चित्कर्तृत्वम् । षट्स्थलात्मकसाधनमार्गे क्रियाद्वारा भक्तिज्ञानविकासेन क्रमशः जीवनिष्ठशक्तेः स्थूलत्वं सूक्ष्मत्वे पर्यवसितं सत् 'यथा नद्यः' इत्यादि मुण्डकश्रुत्यनुसारं 'जले जलमिव' इत्युक्तरीत्या जीवस्य शिवे परमात्मनि समरसभावः इति अद्वैतपदस्य अर्थः ।

शिवाद्वैतम् - इति अस्य सिद्धान्तरस्य नाम सिद्धान्तशिखामणौ प्रयुक्तमित्युक्तम् । अस्य नाम्नः सन्दर्भानुसारं विग्रहः द्विधा क्रियते । शिवशक्त्योरविनाभावरूपमद्वैतं द्योतयितुं 'शिवा च शिवश्च शिवौ, तयो अद्वैतम्' इति विगृह्यते । शिवजीवयोरद्वैतं सूचयितुं 'शिवश्च (शिवांशभूतः) शिवश्च शिवौ, तयोरद्वैतम्' इति व्रिगहः क्रियते ।

द्वैताद्वैतम्, विशेषाद्वैतम् इति नामद्वयं श्रीकरभाष्ये एव प्रयुक्तम् । तत्र द्वैताद्वैतम् इति शिवजीवयोः द्वैताद्वैतस्थितिं समर्थयितुं प्रयुक्तं नाम । षट्स्थलात्मकसोपानमार्गे आद्यानां त्रयाणां स्तरे द्वैतमेव शिवजीवयोः स्वीक्रियते । तेन तयोः उपास्योपासकभावः सङ्गच्छते । चतुर्थस्तलादारभ्य ऐक्यस्थलपर्यन्तं क्रमेण द्वैतभावस्य अदृश्यमानत्वगत्या अद्वैते सामरस्यात्मके पर्यवसानमिति अद्वैतमपि सङ्गच्छते । नात्र द्वैताद्वैतयोः तमः प्रकाशवद् विरुद्धत्वम् आरोपणीयम् । अन्योऽप्यस्ति द्वैताद्वैतनाम्नि विशेषः । श्रीपतिपण्डितोक्तदिशा सन्ति द्वैतपराणि श्रुतिवाक्यानि कानिचन, अद्वैतपराण्यपि कानिचन सन्ति । अस्मिन् सिद्धान्ते द्वैताद्वैतपरयोः श्रुतिवाक्यसमुदाययोः समन्वयः दृश्यते इति द्वैताद्वैतम् इति नाम । तदुक्तं श्रीपतिपण्डिताराध्येन-

'द्वैताद्वैतमते शुद्धे विशेषाद्वैतसज्ज्ञके ।
वीरशैवैकसिद्धान्ते सर्वश्रुतिसमन्वयः ।।' (श्री.भा.भूमिका) इति ।

विशेषाद्वैतमिति नाम अत्र प्रयुक्तम् । विश्च(शिवः) शेषश्च (जीवः)विशेषौ, तयोः अद्वैतम् इति विग्रहः । सर्वाण्यस्य सिद्धान्तस्य नामानि अर्थवत्तया समुचितानि भवन्ति ।

एवं शक्तिविशिष्टसिद्धान्तस्य विषयं सङ्क्षिप्य तस्य नाम्नां चरमोद्देशादीनां दृष्ट्या सामञ्जस्यं प्रदर्श्य, क्षेत्रेऽस्मिन् अवश्यं भाविन्यः नूत्नाः योजनाः यथामति सूच्यन्ते ।

१. विपुलं शैवागमसाहित्यं तावत् शैव-वीरशैवोभयमतस्य आकरः । एतावत्पर्यन्तं केषाञ्चन शैवागमपूर्वभागानां केषाञ्चन शैवागमोत्तरभागानां च प्रकटनं जातम् । प्रकटितानां तेषामध्ययनमेव प्रचलति । अधीतेभ्यः तेभ्यः अनेके नूतनाः विचाराः प्रथमतया विदुषां बुद्धिपथमागताः । अप्रटिताः सन्तः बहवः शैवागमहस्तलिखितग्रन्थाः स्वदेश-विदेशयोः हस्तलिखितग्रन्थालयेषु उपलभ्यन्ते । तेषां शोधनम्, सम्पादनम्, प्रकटनं चेति त्रिविधमपि कार्यं करणीयं वर्तते । तदर्थं योजना काचन विधेया ।

२. शक्तिविशिष्टाद्वैतसिद्धान्तस्य निगमागमप्रमाणपरिपुष्टं स्वरूपं प्रददत् सिद्धान्तशिखामणिः संशोधनविषयत्वेन अभ्यर्हित्वं भजते । यद्यपि कश्चन मम संशोधनविद्यार्थी तद्विषये महाप्रबन्धं विरचय्य पि.एच्.डि. पदवीं प्राप्तवान् । तथाऽपि तस्य ग्रन्थस्य कालविषये एकोत्तरस्थलत्मक सिद्धान्तविषये नूतना आक्षेप-समाधानपरम्परा प्रवर्तते । मादृशाः केचन विद्वांसः तद्विषये संशोधनं विधाय लेखनानि पुस्तकानि च विरचयन्तः सन्ति । इदानीमस्मभिः प्रकटितानां सिद्धान्तशिखामणेः आवृत्तीनाम् आधारेण संशोधनकार्यं क्रियते । मैसूरुप्राच्यसंशोधनसंस्थायां मद्रपुरी-तिरुवनन्तपुरादिषु विद्यमानेषु हस्तलिखितग्रन्थालयेषु अस्य हस्तलिखितग्रन्थाः समुपलभ्यन्ते । कर्नाटकेषु वीरशैवमठमन्दिरेषु कन्नडव्याख्यान-सहिताः सिद्धान्तशिखामणिग्रन्थाः मुद्रिताः हस्तलिखितग्रन्थरूपेण वर्तमानाश्च विद्यन्ते । अतः तेषां सङ्ग्रहाय सङ्गृहीतानां रक्षणाय च प्रयत्नः विधेयः । तदर्थमपि बृहती योजना समुपकल्पनीया । समुपलभ्यमानाः सिद्धान्तशिखामणेः आवृत्तीः अवलम्ब्य ग्रन्थसम्पादन-शास्त्रानुसारं तं ग्रन्थं संस्कृतकन्नडव्याख्यानैः सह सम्पाद्य प्रकटनीयम् ।

३. सिद्धान्तशिखामणौ निरूपितानां षट्स्थलान्तर्गतैकोत्तरशतस्थलानां मूलविचाराः वेदसंहितोपनिषत्सु शैवागमेषु शैवपुराणेषु च व्यस्ततया समुपलभ्यन्ते । तेषाम् अकारभूतानां भागानां सङ्ग्रहः कारणीयः । तथा कृते सति षट्स्थलेषु एकैकस्यापि स्थलस्य विषयव्याप्तिः वर्धिष्यते । तदा संशोधनार्थं विस्तृतं क्षेत्रं समुपलभ्यते । अवान्तरस्थलानमपि विषय-व्याप्तिरपि वर्धिष्यते । वाराणस्यां जङ्गमवाडीमठे अस्य कार्ययोजनां समुपकल्पयितुं प्रयतन्तः प्रवर्तते ।

४. शक्तिविशिष्टाद्वैतप्रतिपादनपरं श्रीकरभाष्यम् अधिकृत्य कृतम् अध्ययनम् अल्पमेव । यद्यपि तस्य आङ्ग्लकन्नडादिभाषान्तराणि समुपलभ्यन्ते तथाऽपि तस्य समग्रं विमर्शात्मकम् अध्ययनं न जातम् । विदुषा नञ्जुण्डाराध्यमहोदयेन सम्पादितः मैसूरुप्राच्यसंशोधनंस्थाद्वारा मुद्राप्य प्रकाशितः च श्रीकरभाष्यग्रन्थः इदानीम् उपलभ्यते । यानि हस्तलिखितपुस्ताकनि तस्य सम्पादने परिशीलितानि तानि विहाय अन्येषां हस्तलिखितपुस्तानां उपलब्धि-सम्भवाभावात् तदर्थं शोधनकार्यं व्यर्थमिति मत्त्वा मुद्रितभाष्यस्य वेदान्तेतरभाष्यैः सह तुलनात्मकं सविमर्शं च अध्ययनं करणीयम् ।

५. शक्तिविशिष्टाद्वैतसिद्धान्तपराणि कानिचन उपनिषद्व्याख्यानानि मुद्रापितानि सन्ति । कानिचन व्याख्यानानि कन्नडभाषामयानि हस्तलिखितग्रन्थालयेषु उपलभ्यन्ते । तेषामपि सम्पादनं प्रकटनं करणीयाम् । इदानीं भगवद्गीताभाष्यमेकमेव प्राध्यापकसिद्धप्याराध्य-महोदयेन विरचितं उपलभ्यते । तस्य ग्रन्थस्य प्रतिकृतयः इदानीं नोपलभ्यन्ते । अतस्तस्यापि पुनर्मुद्रापणं करणीयम् । अनन्तरं तस्य सविमर्शमध्ययनमपि अवश्यं विधेयम् ।

*****

# पत्रिकाप्रकाशनक्षेत्रे संस्कृताभिवृद्धौ नूत्नाः योजनाः

- डा. जनार्दन हेगडे
सम्पादकः, सम्भाषणसन्देशः

का नाम संस्कृतपत्रिका ? संस्कृतभाषया प्रकाश्यमानाः सर्वाः । वस्तुतस्तु पत्रकारिताक्षेत्रे दिनपत्रिकाः (News Papers) नियतकालिक्यः (Magazines) शोधादिपत्रिकाः (Journals) चेति त्रिविधाः । अद्यत्वे तु 'संस्कृतपत्रिका'शब्देन त्रिविधाः अपि पत्रिकाः सङ्गृह्यन्ते ।

संस्कृतक्षेत्रस्य प्रथमा पत्रिका 'काशीविद्यासुधानिधिः' ('पण्डितपत्रिका' इति अपरं नाम), या च १९६६ तमे वर्षे जूनमासे प्रथमे दिनाङ्के आरब्धा आसीत् । अद्यावधि संस्कृतक्षेत्रे पञ्चशतं पत्रिकाः उत्पन्नाः स्युः । जीवन्त्यः उपपञ्चाशाः । कर्णाटकस्य प्रथमा पत्रिका 'काव्यनाटकादर्शः' (१९८२) धारवाडतः प्रकाश्यमाना आसीत् । कर्णाटकीयाः पत्रिकाः प्रायः उपविंश्यः । (विस्तृतं विवरणं परिशिष्टे दत्तम्) ताश्च-

| | |
|---|---|
| दिनपत्रिका | एका |
| साप्तहिकी | एका |
| मासिक्यः | दश |
| त्रैमासिकी | एका |
| षण्मासिकी | एका |
| वार्षिक्यः अनियतप्रकाशनाश्च | काश्चन |

कर्णाटके इदानीं तिस्रः प्रकाश्यन्ते प्राधान्येन । 'सुधर्मा' मैसूरुतः, 'सम्भाषणसन्देशः' बेङ्गलूरुतः च । षाण्मासिकी 'छन्दस्वती' मेलुकोटेतः प्रकाश्यते । मध्ये कानिचन वर्षाणि तस्याः विरतिः आसीत् । इदानीं तस्याः पुनःप्रकाशनम् आरब्धम् । एतदतिरिच्य 'विश्वविद्यालयवार्तापत्रम्' अन्यया भाषया सह प्रकाश्यते आ वर्षद्वयात् । एतामपि अविहाय गण्येत चेत् 'चतस्रः पत्रिकाः' इति वक्तुं शक्यम् ।

## अग्रिमेषु दशसु वर्षेषु

पत्रकारिता नाम कश्चन कौशलविशेषः, गुणविशेषः, वृत्तिविशेषश्च । यद्यत् लिख्यते तत्सर्वं

काव्यं यथा न भवति, तथा या या पत्रिका प्रकाश्येत सा सा 'पत्रकारिता'पदनिर्देशार्हा न भवेत् । वास्तविकी पत्रकारिता का इत्यस्य द्वित्राणि उदाहरणानि वा देशे दृष्टिगोचरतां गच्छेयुः ।

अर्थदृष्ट्या स्वावलम्बिता भवतु पत्रिकाणाम् । अतः पत्रिकाः शक्तिवर्धनदृष्ट्या प्रयासं कुर्युः । रा.सं. संस्थानम् अनुदानं दद्यात्, सर्वकाराः विज्ञापिकाः दद्युः इति अपेक्षा कियत्पर्यन्तम् औचित्यम् आवहेत् ? धनदातॄणामपि न अभावः । 'योग्यानां' सम्पर्कः 'योग्येन' क्रमेण 'योग्यैः' करणीयः ।

पठनप्रवृत्तिः जनेषु वर्धेत । उत्तमाः विषयाः स्युः चेत् जनाः पठेयुः । पत्रिकाः उत्तमान् आसक्तिजनकान् विषयान् दद्युः । तदर्थं श्रमः करणीयः । वस्तुतः समस्या तु - न विषयाभावः, अपि तु दृष्ट्यभावः परिश्रमाभावश्च । 'कालिदासस्य कृतिषु परिसरप्रियता' 'वेदकाले कौटुम्बिक-व्यवस्था.... इत्येतादृशाः लेखाः चर्वितचर्वणायन्ते । तादृशानां पठने जनाः न उत्सहन्ते ।

संस्कृतपत्रिकाः सकृत् साकल्येन परिशीलिताश्चेत् स्पष्टतया भासते यत् पत्रिकासु विषयाः न आसक्तिजनकाः इति । स्वस्य प्रतिभाप्रदर्शनाय, आत्मसन्तोषाय च यानि स्तोत्रपद्यादीनि लिख्यन्ते तानि जनैः पठनीयानि इत्यपि अपेक्षा न करणीया । पठनारम्भानन्तरं यत् पठनत्यागबुद्धिं क्वापि न उत्पादयेत् तदेव उत्तमं पठनसाहित्यम् । रोचकता, अपूर्वता, कुतूहलजनकता, नावीन्यं विशेषांशयुक्तता, निरूपणशैली इत्यादयः अंशाः मनसि स्थापनीयाः ।

विषादेनैव उच्यते- संस्कृतज्ञानां जीवनानुभवः न विस्तृतः । परिमिते क्षेत्रे एव तिष्ठन्तः ते जीवनस्य अनेकविधानि मुखानि न पश्यन्ति । अतः वस्तुवैविध्यं न भवति, अनुभवदारिद्र्यं दृग्गोचरीभवति । संस्कृतज्ञाः अपि आधुनिकदृष्टिमन्तः भवेयुः । अनेकविधानुभवयुताः विविधक्षेत्रीयाः संस्कृतलेखान् लेखितुं यदि प्रवृत्ताः भवेयुः तर्हि विषयवैविध्यम् अवश्यं स्यात् पत्रिकाणाम् ।

विषयः कीदृश्या भाषया दीयते इत्येतदपि मुख्यमेव । देयं क्षीरं समानं चेदपि पात्रं दृष्ट्वा स्वीकर्ता सुन्दरमेव आदौ स्वीकरोति । सर्वे 'सुन्दरमेव' इच्छन्ति । एवमेव भवति पत्रिकाभाषाविषये अपि । भाषा सरला, सुललिता, प्रसादगुणोपेता, गम्भीरा च भवतु । समासभूयस्त्वम्, प्रौढत्वं च अस्ति चेदेव भाषा उत्कृष्टा इति चिन्तनं माऽस्तु । कस्मै लिख्यते इति निश्चीयताम् । अधिकारी कीदृशः इत्येतत् मुख्यम् । भाषा निर्दुष्टा भवेत् । मुद्रणशुद्धिरपि स्यात् । कोऽपि कमपि दोषं दर्शयितुं यथा न शक्नुयात् तथा स्यात् भाषापरिष्कारः ।

विन्यासः अपि पत्रिकाक्षेत्रे प्राधान्यम् आवहति । विन्यासः, कलात्मकता इत्यादयः एव पत्रिकायाः आकार्षणबिन्दवः । दौर्भाग्यं नाम संस्कृतपत्रिकाणां सम्पादकाः तत्र अकुशला अनभिज्ञा वा ।

अनेकविधाः पत्रिकाः वाचकानां पुरतः उपस्थिताः भवेयुः । एतां यदि अहं न पठेयं तर्हि ममैव हानिः इति वाचकः चिन्तयेत् । तां प्राप्तुम् अहमहमिकां दर्शयेत् सः । पठतः हस्तात् आच्छिद्य आपाततः दर्शनं वा मया कार्यम् इति भावनां सा जनयेत् । गुणवत्ता अस्ति चेदेव एतत् सिद्ध्येत् ।

पत्रिकाणां सङ्घटनं प्रबलं स्यात् । नाममात्रेण यदि सङ्घटनं स्यात् तर्हि किं प्रयोजनम् ? पत्रिकाजनानां समावेशः तदा तदा प्रवर्तेत । सदस्येषु ऐक्यबुद्धिरपि स्यात् ।

आधुनिकानि आनुकूल्यानि संस्कृतपत्रिकाक्षेत्रेऽपि उपयुक्तानि भवेयुः । जालपुटावृत्तिः जालपुटपत्रिकाः इत्यादयः भवेयुः । संस्कृतपत्रिकाः 'ऐ प्याड्' इत्यादिषु पठितुं योग्याः अपि स्युः ।

नूतनशब्दानां विषये दारिद्र्यं सर्वत्र विजृम्भते । एतद्विषये पत्रिकाः सुमहत् उत्तरदायित्वं वोढुम् अर्हन्ति ।

प्रयोगतः दृश्यते इत्यतः परिणामोऽधिकः । किन्तु स्वच्छन्दता माऽस्तु ।

नूतनानां लेखकानां सृष्ट्यर्थम् अवसराः देयाः । लेखनाय ते प्रवर्तनीयाः । मयाऽपि लेखनीयम् इति भावः तेषु जागृयात् ।

नूतनकृतीनां परिचयः, विमर्शः इत्यादय अपि प्रवर्तेरन् । तेन पुस्तकप्रकाशनक्षेत्रं पुष्टिं प्राप्नुयात् । कुत्र किं पुस्तकं प्रकाश्यते इति विवरणं वाचकैः ज्ञायेत ।

पत्रिकासु कथालेखादयः अद्य यावत् याः प्रकाशिताः तासाम् अध्ययनं, विमर्शः, सङ्ग्रहः इत्यादीनि कार्याणि प्रवर्तेरन् । गुणवतां प्रकाशनमपि वरं स्यात् । सार्धशतवर्षात्मके काले प्रकाशितानि प्राचीनानि प्रकाशनानि अद्यत्वे अनुपलभ्यमानानि यदि स्युः तर्हि न तत्र आश्चर्यम् । अद्यत्वे जालपुटे सङ्ग्रहः न व्ययकारी । तद्वा प्रवर्तेत ।

पत्रिकाणां परिचयः, इतिहासः इत्यादयः सङ्क्षेपेण बहुत्र उपलभ्यन्ते । विस्तृतं विवरणं क्वापि न उपलभ्यते । एतयोः दृष्ट्या अपि श्रमकरणं श्रेयसे ।

## परिशिष्टम्

### कर्णाटकीयाः संस्कृतपत्रिकाः

| पत्रिकानाम | प्रकाशनस्थलम् | प्रकाशनवर्षम् | स्वरूपम् |
|---|---|---|---|
| काव्यनाटकादर्शः | धारवाड | १८८२ | मासिकी |
| काव्याम्बुधिः | बेङ्गळूरु | १८९३ | मासिकी |
| काव्यकल्पद्रुमः | बेङ्गळूरु | १८९७ | मासिकी |
| पुरुषार्थः | नरगुन्द | १९१० | न ज्ञायते |
| जिनमतपत्रिका | मैसूरु | १९१६ | न ज्ञायते |
| आनन्दचन्द्रिका | बेङ्गळूरु | १९२३ | न ज्ञायते |
| द्वैतदुन्दुभिः | विजापुरम् | १९२३ | न ज्ञायते |
| श्रीमन्महाराजकालेजपत्रिका | मैसूरु | १९२५ | त्रैमासिकी |
| मधुरवाणी | बेळगांव | १९३५ | मासिकी |
| शङ्करगुरुकुलम् | श्रीरङ्गम् | १९३६ | न ज्ञायते |
| वैजयन्ती | बागलकोटे | १९५३ | साप्ताहिकी |
| विद्या | बेळगांव | १९५६ | मासिकी |
| गीता | उडुपि | १९५८ | मासिकी |
| मधुरवाणी | गदग | १९५८ | मासिकी |
| सुधर्मा | मैसूरु | १९७० | दैनिकी |
| प्रज्ञालोकः | बेङ्गळूरु | १९७६ | मासिकी |
| सम्भाषणसन्देशः | बेङ्गळूरु | १९७४ | मासिकी |
| छन्दस्वती | मेलुकोटे | १९९७ | षाण्मासिकी |
| कर्णा.सं.वि.वि.वार्तापत्रम् | बेङ्गळूरु | २०११ | त्रैमासिकी |

एतदतिरिच्य अमृतवाणी (१९४१) सौदामिनी, कल्पकम्, कर्णाटकचन्द्रिका, अमृतोदयः, श्रीशारदा इत्येताः वार्षिकपत्रिकाः अपि आसन् । तासां प्रकाशनवर्ष-स्थलादयः न ज्ञायन्ते ।

तरङ्गिणी (मङ्गलूरुतः), संस्कृतसंशोधनसंसदः वार्तापत्रम् (मेलुकोटेतः) इत्यादयः अपि सन्ति । संस्कृतमयत्वं तासां नास्तीति ताः अत्र न परिगणिताः । *****

# वेदपरिरक्षणोपायाः

**डा. टि.वि. सत्यनारायणः** एम्,ए. पि.एच्.डि.
विश्रान्त उपनिदेशकः, ओरियण्टल् रिसर्च् इन्स्टिटच्यूट्,
मैसूरु विश्वविद्यालयः, मैसूरु

विद्यन्ते ज्ञायन्ते लभ्यन्ते वा एभिः धर्मादिपुरुषार्थाः इति वेदाः' - इति बह्वृक्प्रातिशाख्य-वृत्त्युपक्रमे देवमित्रेण विहितं वेदशब्दव्युत्पादनम् । 'अपौरुषेयं वाक्यं वेदः' इति सायणीयऋग्भाष्ये । 'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेदः' इति सायणीयऋग्भाष्ये । सायणीयकृष्णयजुर्वेदीय भाष्यभूमिकायां तत्रैव सायणः -

'प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।
एवं विदन्ति वेदेन तस्माद्वेदस्य वेदता ।।

इति भणितिमुपन्यस्तवान् प्रमाणत्वेन ।

आधुनिकभाष्यकारः स्वामीदयानन्दसरस्वती स्वीयऋग्वेदादिभाष्यभूमिकायां - 'विदन्ति जानन्ति विद्यन्ते भवन्ति विन्दन्ति सर्वाः सत्यविद्याः यैर्येषु वा स वेदः' इति व्युत्पत्तिं कृतवान् ।

तदेवंविधानामपि सर्वेषां व्युत्पादनानां तात्पर्यविषयभूतोऽर्थः समान एव ।

तात्विकदृष्ट्या विमृश्यमाने सुतरां प्रतिफलितं भवति यद् वेदो हि नाम अशेषविशेषज्ञान-विज्ञानप्रतिपादकं शाश्वतिकम् अपौरुषेयं शास्त्रम् । आम्नायः आगमः श्रुतिः वेदः इत्यनर्थान्तरम् । सोऽयं वेदः ऋग्यजुस्सामाथर्वेति चतुस्संहितासु विभक्तो विषयभेदात् । प्रत्येकं वेदे संहिता ब्राह्मणम् आरण्यकम् उपनिषदिति चत्वारो विभागास्सन्ति ।

**वेदेषु स्वराङ्कनप्रकारः -**

वेदमन्त्राणां पदपाठप्रक्षेपोत्सादादिविकारजातात् परिरक्षरणार्थं हि स्वराणां प्रवृत्तिः । ते चामी स्वराः उदात्तानुदात्तस्वरितभेदात् त्रिविधाः । तदेषां स्वराणाम् अङ्कनप्रकारः अधोऽङ्कितः - सरण्याऽवगन्तव्यः । उदात्तस्वरस्य तत्र न काऽपि चिह्नरेखा । अनुदात्तस्वरस्तु अधस्तात् तिर्यग्रेखया अङ्क्यते । स्वरितस्तु पुनः उपरिष्टात् ऊर्ध्वरेखया अङ्क्यते । स एष प्रकारः ऋग्वेदीयैराद्रियते । तथा -

**'अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म् । होता॑रं रत्न॒धात॑मम् ।'** (ऋ.सं. १.१.१)

इति मन्त्रे यज्ञस्य इत्यत्र यकारः अनुदात्तः अधस्तात् समरेखया अङ्कितः । ज्ञकार इति सर्वथा चिह्नरेखया रहितः उदात्तः । 'स्य' इति च उपरिष्टात् उच्छ्रितोर्ध्वरेखया अङ्कितः स्वरितस्वरः । केचित्तु नारदीयशिक्षाम् अनुसृत्य व्यवतिष्ठन्ते यत् सङ्गीतशास्त्रप्रतिपादकाः

षड्जादयः स्वराः तेऽपि पुनरिमे एव समस्वरा न तेभ्यो अंशतोऽपि **बोभिद्यन्ते** । एतेष्वेव उदात्तानुदात्तस्वरितेषु ते षड्जादयः स्वराः अप्यन्तर्भवन्ति । उक्तं च पाणिनीयाशीक्षायाम् -

**'उदात्तो निषादगान्धारावनुदात्तऋषधैवतौ ।**
**स्वरितप्रभवा ह्येते षड्जमध्यमदैवताः ।।'** सति

वेदपाठस्य परिरक्षणार्थं कृताः कतिपये उपायाः -

वेदानां परिरक्षणार्थं केचन उपायाः ऋषिभिः निदर्शिताः । भारतीयसंस्कृतीतिहासे वेदानां स्थानमत्यन्तं महत्तमम् । समग्राः भारतीयधर्माः समग्राः आचारविचाराः श्रुतिप्रमाणैस्समुद्भूताः । भारतीयानां प्राचीनेतिहासान् उपदेशान् आचारान् विचारान् धर्मान् श्रौतगृह्यधर्मकर्माणि जीवनानि रहस्यतमज्ञानानि समवगन्तुं वेदानां परिज्ञानमत्यावश्यकम् । अस्माकं प्राक्तनाः मुनयः विद्वांसः महद्भिः प्रयत्नैः वेदान् ररक्षुः । अधुनापि आसक्ताः ज्ञानिनः लोकोपकारिणः जनाः वेदान् रक्षन्तः प्रसारयन्तश्च वर्तन्ते वेदवाङ्मये, वैदिकाः वेदानां महिम्नः 'प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते । एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता' इति प्रशंसितवन्तः । शतपथब्राह्मणे -

'यावन्तं ह वै इमां पृथिवीं वित्तेन पूर्णां ददत् लोकं जयति त्रिभिस्तावन्तं जयति भूयांसं च अक्षय्यं च य एवं विद्वान् अहरहः स्वाध्यायम् अधीते तस्मात् स्वाध्यायोऽध्येतव्य' इति भणितमस्ति ।

स्वरवर्णविशिष्टं कृत्स्नं वेदवाङ्मयं रक्षितुं प्राचीनाः ऋषयः, विद्वांसश्चावाङ्मनसगोचरं श्रमं विहितवन्तः । तेषां प्रयत्नैः अद्यापि वेदाः शुद्धरूपेणैव रक्षिताः । अधुनाऽपि समग्रं वेदं विना पुस्तकं सततम् अस्खलितम् उच्चरन्तः वेदघनपाठिनः भारते वर्तन्ते । परमधुना एवंविधाः वैदिकविद्वांसः अङ्गुलिगणनास्सान्ति ।

**वेदसंरक्षणे प्राचीनानामुपायाः -**

वेदानां परिरक्षणार्थं पुरा केचनोपायाः ऋषिभिः निर्दिष्टाः । विकृतिपाठक्रमेण वेदराशिः संरक्षितोऽस्ति । विकृतिपाठाः संख्यया अष्टौ सन्ति । तदुक्तम् -

**'जटा माला शिखा रेखा ध्वजो दण्डो रथो धनः ।**
**अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ।।'** इति ।

येन संहितानां पदानि छित्वा संहितापाठस्य मौलिकं रूपं प्रदर्शितं भवति । मन्त्राणां मूलांशप्रक्षिप्तांशयोर्विवेचने एते विकृतिपाठाः निकषायन्ते । संहितापाठान् प्रक्षेपच्युत्यवसादादिविकारेभ्यः परित्रातुं एते आविष्कृताः । यथा न तत्र अणुमात्रमपि दोषलेशः संश्लिष्येत् । प्रकृते यावदुपलब्धानां मन्त्राणां मूलपाठ एव संहितापाठः ।

**संहिता पाठः**

**ओषधयः सं वँदन्ते सोमेँन सह राज्ञाँ पदपाठः**

संहितापाठस्य पदानि छित्वा एकैकं पदं प्रत्येकं प्रत्येकं यदा उच्यते सः पदपाठः ।

**ओषधयः । सं । वदन्ते । सोमेँन । सह । राज्ञाँ**

**क्रमपाठः**

क्रमशः द्वे द्वे पदे संयुज्य संयुज्य यदा उच्यते तदा सः क्रमपाठो भवति ।

**ओषधयः सं । सं वंदन्ते । वदन्ते सोमेँन । सोमेँन सह । सह राज्ञाँ । राज्ञेति राज्ञाँ ।**

**जटापाठः**

अनुलोमविलोमक्रमेण क्रमद्वयं त्रिवारं यदा उच्यते तदा सः जटापाठः भवति -

**ओषधयः सं समोषधयँः ओषधयः सम् । सं वदन्ते वदन्ते सं सं वंदन्ते ।**
**वदन्ते सोमेँन सोमेँन वदन्ते वदन्ते सोमेँन । सोमेँन सह सह सोमेँन सोमेँन सह ।**
**सह राज्ञा राज्ञाँ सह सह राज्ञाँ । राज्ञेति राज्ञाँ ।।**

**घनपाठः**

विकृतिपाठेषु विलक्षणतमः घनपाठः । अनुलोमविलोमक्रमेषु पदानामावृत्तिर्बहुवारं भवति ।

**ओषधयः सं समोषधय ओषधयः सं वंदन्ते वदन्ते समोषधयः ओषधय सं वंदन्ते ।**
**सं वंदन्ते वदन्ते सं सं वंदन्ते सोमेँन सोमेँन वदन्ते सं सं वंदन्ते सोमेँन ।**
**वदन्ते सोमेँन सोमेँन वदन्ते वदन्ते सोमेँन सह सह सोमेँन वदन्ते वदन्ते सोमेँन सह ।**

**सोमे᳚न स॒ह स॒ह सोमे᳚न सोमे᳚न स॒ह राज्ञा॒ राज्ञा᳚ स॒ह सोमे᳚न॒ सोमे᳚न सह राज्ञा᳚ ।**
**स॒ह राज्ञा॒ राज्ञा॒ स॒ह स॒ह राज्ञा᳚ राज्ञेति॒ राज्ञा᳚ ।।**

**वेदशाखाः**

चतुर्ष्वपि वेदेषु बह्व्यः शाखास्सन्ति । शाखा हि नाम वेदव्याख्यानरूपा अशेषविशेषविवृत्तिस्वरूपा ग्रन्था विविधाचार्यैः महर्षिभिश्च प्रणीताः । तत्र बहवो मतभेदा अपि वर्तन्ते ।

ऋग्वेदीयशाखा - महावैय्याकरणः भर्तृहरिः स्वीये वाक्यपदीये पञ्चदशशाखाः वदति । पतञ्जलिः व्याकरणमहाभाष्ये एकविंशतिसङ्ख्याकाः शाखाः वदति । अणुभाष्योद्धृतस्कन्दपुराणानुसारेण चतुर्विंशतितमा अन्यैश्च सप्तविंशतिसङ्ख्याकाः ।

शाकल-मुद्गल-शालव-शालीष-पाराशर-वात्स्य-शैशिर-बाष्कल-बोध्य-अग्निमाठर-जातूकर्ण्य-आश्वलायन-शांखायन-कौषीतकि-महाकौषीतकि-शाम्बव्य-माण्डूकेय-बह्वृच-पैङ्ग-उद्दालक-गौतम-शतवलाक्ष-होस्तिक-भारद्वाज-ऐतरेय-वशिष्ठ-सुलभ-शौनक-आश्मरथ्य-काश्यप-कार्मन्द-कर्शाश्व-क्रोण्ड-काङ्कुराख्याः शाखाः प्रकीर्णा नाममात्रेणैव श्रुतिपथमवतरन्ति न तु नयनपथम् येन ऋषिणा या शाखा प्रणीता तन्नाम्नैव प्रायशः सा शाखा प्रसिद्धिं गता ।

**यजुर्वेदीयशाखा** - महाभाष्यकारमते २१ शाखाः दिव्यावदानमते - १०५ शाखाः, प्रपञ्चहृदयानुसारेण ३६ शाखाः । परमधुना १७ शाखाः दृग्गोचरास्सन्ति । ताः - माध्यन्दिन-जाबाल-बौधेय-कण्व-शापीय- स्थापायनीय-कापार-पौण्ड्रवत्स-आवटिक-परमावटिक-पाराशर्य-वैधेय-वैनेय-औधेय-गालव-वैजन- कात्यायननामधेयाः प्रसिद्धाः ।

**सामवेदीयशाखाः** - 'सहस्रवर्त्मा सामवेद' इति पतञ्जलिः । दिव्यावदानः १८० शाखाः वदति । आसु १३ शाखा एव अवशिष्टा इति पञ्चहृदयस्य अभिमतम् । अधुना प्रसिद्धाः सामशाखास्तु-कौथुम-जैमिनीय-राणायनीय-सात्यमुग्र-नैगेय-शार्दूल-वार्षगण्य-गौतम-भाल्लविन-कालविन-शाट्यायनिन्-रौरुकिण-कापेय-मासशराव्य-करद्विष-शाण्डिल्य-तांड्य-शारकि-वात्सक-वाल्मीक-शैत्यायक- कोहलीपुत्र-पौष्करसाद-प्लाक्ष-प्लाक्षयण-वाउभीकार-साङ्कुत्यनाम्न्यः ।

**अथर्ववेदीयशाखाः** । अहिर्बुध्न्यसंहितानुसारेण ५ शाखाः । तथापि ग्रन्थान्तरेषु ९ शाखाः उल्लिखिताः । अन्येषां मते २० शाखाः इति । ताः - पैप्पलाद-तौद-जाजल-जलद-ब्रह्मवेद-

देवदर्श-चारणवैद्य-दामोदरतोतायन-जाबाल-कुनखी-ब्रह्मलाश-त्रिखर्य-तातिल-शौखण्ह-सौकरसदस् शार्ङ्गरव - उश्वयेयसञ्ज्ञकाः ।

इत्थं शाखाभेदानां निदाने विमृश्यमाने तु इदमेव प्रतिभाति यत् सुदूरदेशप्रदेशगतगुरुपारम्पर्यमेव अस्य मूलम् । मूलसंहितोपनतमन्त्रैस्सह बहोः कालात् प्रचालितगुरुपरम्परापरिणताः पाठा एव तादवस्थ्यवैधुर्येण विकृतिं परिवृत्तिश्च गताः तत्तच्छाखानुरोधेन च तथैव लब्धप्रचाराः तत्तद्गुरुनाम्नैव च प्रसिद्धिं गताः ।

## वेदानुक्रमणी

वेदार्थावबोधने अनुक्रमणीनामपि महनीयं पदमस्ति । वेदानां रक्षार्थमेव एतासां प्रवृत्तिः । वेदमन्त्राणां द्रष्टारः के के ऋषयो बभूवुः मन्त्राणां देवताश्च काः । छन्दोऽनुवाकवर्गसूक्तमन्त्राणां विवरणाद्या अनुक्रमणीनां प्रतिपाद्या विषयाः । ऋषिणा शौनकेन ऋग्वेदरक्षणार्थम् आर्षानुक्रमणी छन्दोऽनुक्रमणी-देवतानुक्रमणी-अनुवाकानुक्रमणी-सूक्तानुक्रमणी-ऋग्विधानं पादविधानं बृहद्देवता-प्रातिशाख्यं-शौनकस्मृतिः इति दश ग्रन्था रचिताः । कात्यायनप्रणीता ऋक्सर्वानुक्रमणी उव्वटभाष्ययुता षड्गुरुशिष्यरचितया 'वेदार्थदीपिका'ख्यया वृत्या सहिता च वर्तते । अस्यां प्रायः समस्तानुक्रमणिकागतविषयाणां सङ्क्षेपतः विवरणमस्ति । अथर्ववेदस्य 'बृहत्सर्वानुक्रमणी प्रथिता । कात्यायनप्रणीतं शुक्लयजुःसर्वानुक्रमसूत्रं पञ्चभिरध्यायैर्निबद्धमस्ति ।

यास्कमुनिप्रणीता कृष्णयजुर्वेदीया याजुषसर्वानुक्रमणी अपि छन्दोविवरणं प्राधान्येन निर्दिशति । एवं वृहद्देवता हि नाम मन्त्रदेवताप्रतिपादको बृहद्ग्रन्थः । देवता तु मन्त्रप्रतिपाद्यो विषयः । या तेनोच्यते सा देवता' इति तल्लक्षणात् ।

## प्रातिशाख्यग्रन्थाः

वेदपाठस्य रक्षणार्थमेव प्रातिशाख्यग्रन्थाः निबद्धाः । ये किल मन्त्रपदपाठे विश्लेषितानां पदानां पुनः संश्लेषे समुत्पद्यमानान् वर्णविकारविशेषान् व्याकुर्वन्ति । प्रतिशाखमधिकृत्य प्रवृत्तत्वात् इमानि प्रातिशाख्यानि परिभाव्यन्ते । शाखाः पुनः ११३०, संयमिताः परं संप्रति ६ सङ्ख्याकानि एव प्राप्यन्ते । अन्यानि लुप्तानि किल इत्यनुमीयते । वैदिकशब्दानां व्याकरणप्रक्रियाप्रदर्शनं हि प्रातिशाख्यानां मुख्यं प्रयोजनम् । वर्णसमाम्नायः स्वरव्यञ्जनानां गणना, तदुच्चारणविधयश्च उदात्तानुदात्तस्वरितभेदा आख्यानस्वराः पदपाठवर्णोच्चारनियमाः अत्र विविच्यन्ते । तैत्तिरीय-प्रातिशाख्ये पदजटापाठादिभेदाः प्रदर्श्यन्ते ।

ऋक्प्रातिशाख्यं पार्षदसूत्रनाम्नापि प्रसिद्धम् । त्रिभिरध्यायैः अष्टादशपटलैश्च संवलितम् ।

शुक्लप्रातिशाख्यम् अष्टभिरध्यायैः गुम्फितम् उव्वटाचार्यस्य 'मातृमोद' भाष्ययुतं कात्यायन-मुनिप्रणीतम् तैत्तिरीयप्रातिशाख्यं चतुर्भिरध्यायैरुपनिबद्धं त्रिरत्नभाष्यसंवलितं चतुर्विंशत्यध्यायैः सुनिबद्धं च पुष्पसूत्राख्यं सामप्रातिशाख्यं दशप्रपाठकैः (१०) एकादशकण्डिकाभिश्च(११) प्रणिबद्धमस्ति । अत्र विशिष्य सामगानविवरणमस्ति । सामप्रातिशाख्ये साम्नः विविधगीतानां प्रश्लेष-विश्लेष-वृद्ध-अवृद्धउच्चावच-कृष्ट-अकृष्ट-संकृष्टादि स्वरोच्चारणकृत भेदानां विवेचनमस्ति । उपलभ्यमानेषु षट्प्रातिशाख्येषु ऋक्प्रातिशाख्यं हि प्रधानतमम् । तदेतद् विद्वद्वरम्याकूमूलकेण संस्कृताक्षरैः जर्मन्टिप्पणीभिः समेतं १८५९ क्रिस्ताब्दे मुद्रापितम् । फ्रेञ्च्भाषायामपि ए. एग्नियर् महोदयेन १८६३ क्रैस्ताब्दे प्रकाशितम् । शुक्लयजुः प्रातिशाख्यम् अष्टाध्यायैर्निबद्धं कात्यायनेन प्रणीतम् । उव्वटभाष्ययुतमिदं षट्खण्डेषु काश्यां प्रकाशितम् ।

एवं प्रतिशाख्यसाहित्यप्रसरो बृहत्तरो विद्यते तेषां मुख्यप्रयोजनत्वेन विविच्यमाने वैदिकस्वराणां छन्दसां मन्त्रोच्चारणक्रमस्य शब्दसाधुत्वासाधुत्वावबोधस्य प्रक्रियावधारणनियमविवेचनमेव केवलं विभाव्यते ।

**वेदगोपनाय वेदाङ्गानि -**

शिक्षा-व्याकरणं-छन्दः-निरुक्तं-ज्योतिषं कल्पश्चेति षड्वेदाङ्गानि वेदगोपनायैव प्रवृत्तानि वर्णस्वराद्युच्चारणविधिरूपादि दिश्यते यया सा शिक्षा । तथा च तैत्तिरीयाः समामनन्ति उपनिषदारम्भे

**'अथ शीक्षां व्याँख्यास्यामः । वर्णः स्वरः मात्रा बलं साम सन्तानः.. इत्युक्तश्शीँक्षाध्यायः ।**

वर्णः अकारादिः । उदात्तादयः स्वराः । ह्रस्वदीर्घप्लुताः मात्राः बलं - स्यानप्रयत्नौ । साम-निषादादयः सप्तस्वराः । सन्तानः विकर्षणादयः । संप्रति तु ३० सङ्ख्याकाः शिक्षाग्रन्थाः उपलभ्यन्ते ।

श्रौत-गृह्य-धर्म-शुल्बसूत्राणां कल्पसूत्राणि इति पारिभाषिकी संज्ञा । वेदविहितश्रुतिप्रतिपादित यज्ञयागादिविधानतद्विवरणप्रतिपादकग्रन्थाः श्रुतिमूलकत्वात् श्रौतसूत्राणि । गृहाश्रमिणाम् आजन्ममरणपर्यन्ता ये वेदोक्ताः संस्कारादयः कर्तव्यविशेषा यत्र विव्रियन्ते तानि गृह्यसूत्राणि येषु पुनः पारमार्थिकाः सामाजिका राजनीतिविषयकाश्च धर्मविशेषा उपदिश्यन्ते तानि धर्मसूत्राणि । वेदोक्तयज्ञयागानुष्ठानाय यज्ञवेदिकादिनिर्माणविषयकसूत्राणि शुल्बसूत्राणि ।

व्याकरणस्य च पुनः प्रकृतिप्रत्ययाद्यनुशासनेन पदस्वरूपनिर्माणाय तदर्थनिर्धारणाय च पुनः

परमोपयोगः । पाणिनिः लौकिकवैदिकव्याकरणं रचितवान् । वैदिकव्याकरणे वेदोक्तपदानाम् उच्चारण-स्वरविचाराश्च सम्यक् प्रतिपादिताः ।

यास्काचार्येण निरुक्तं रचितमस्ति । अत्र वैदिकानां शाब्दानां नामाख्यातोपसर्गनिपातरूपेण प्रविभक्तानां च निर्वचनरूपेण अर्थादिकं निरूप्य निरुपितांश्च तान् उदाहरणेन उपपादयन् निर्वचनप्रकारमवगमयति ।

वेदाङ्गेषु छन्दश्शास्त्रमतीव महत्त्वं भजते । 'पश्य देवस्य काव्यं न ममार न जीर्यति' 'कविर्मनीषी परिभूः स्वयम्भूः' इति वेदवाणी । श्रुतिरपि छन्दोनिबद्धा काव्यमयी वागित्यभिहितम् । वेदाभिधं काव्यमपि गद्य-पद्य-तदुभयभेदात् त्रिविधमेव । तत्पद्यशालिनी ऋग्लक्षणा श्रुतिततिः छन्दोज्ञानमन्तरा सम्यक्परिशीलयितुं न शक्या वेदेषु गायत्र्यादि छन्दांसि सन्ति । तेषामवगमनाय छन्दश्शास्त्राध्ययनमवश्यमेव ।

कालविज्ञापकं शास्त्रं ज्यौतिषम् । सुमुहूर्तम् अनुरुध्य क्रियमाणा यज्ञयागादिक्रियाविशेषाः फलाय कल्पन्ते न तु यदृच्छया सम्पद्यमानाः । तन्मुहूर्तज्ञानं च ज्योतिषज्ञानमन्तरा न सम्भवति इति हेतोः अस्य यज्ञाङ्गत्वं प्रयुक्तम् । वेदचतुष्टयस्य अपि प्रतिवेदं भिन्नं ज्यौतिषशास्त्रमुपलभ्यते । लगधाचार्यकृतं वेदाङ्ग-ज्यौतिषं प्रसिद्धमस्ति तदुक्तमार्यज्यौतिषे (श्लो.६३)

'वेदा हि यज्ञार्थमभिप्रवृत्ताः । कालानुपूर्वाविहिताश्च यज्ञाः ।
तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञान् ।। इति ।

अस्य वेदाङ्ग-ज्यौतिषस्य प्रवर्तकाः अष्टादशमहर्षयः । तद्यथा -

'सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः ।
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः ।।
लोमशः पोलिशश्चैव च्यवनो यवनो भृगुः ।
शौनकोऽष्टादशाश्चैते ज्यौतिश्शास्त्रप्रवर्तकाः ।। इति ।

### अधुना वेदरक्षणाय अनुष्ठेयाः क्रमाः

इदानीन्तनकाले वेदाध्ययनार्थमागच्छन्तः छात्राः विरलास्सन्ति । आधुनिकविद्याभ्यासफलग्राहिणः जनाः अस्मदीयप्राचीनवैदिकवाङ्मयाध्यायनार्थं स्वस्वापत्यानि प्रेषयितुं नैव समुत्सुकास्सान्ति । अथापि अल्पीयांसः जनाः अपि वेदाध्यायनं कर्तुं समुत्सुकाः मठमन्दिरविद्यालयान् समागच्छन्ति

इति तु समाधानकरोंऽशः । अधुना वेदरक्षणाय वेदाध्ययनपरिरक्षणाय वेदाध्ययननिरतविद्यार्थि-प्रोत्साहनाय अस्माभिः अनेके क्रमाः अनुष्ठेया एव ।

१. देशभेदेन प्रादेशिकभेदेन वेदानां शाखाः भिन्नाः सन्ति । तासां शाखानां पाठक्रमाः अपि भिन्नाः एव । देशे कासु कासु शाखासु वेदानामध्ययनम् अध्यापनं च प्रचलदस्ति इति समीक्षाः करणीयाः । ततः तत्तच्छाखासु अध्ययनाध्यापननिरतानां जनानां स्थितिगतयः कथं सन्ति इति ज्ञात्वा तेषामशनवसनादिव्यवस्थाः प्रकल्प्य तत्तच्छाखाध्यायनं निरन्तरं यथा भवेत् तथा कार्यं करणीयम् ।

२. सर्वकारीयशालामहाविद्यालयेषु चतुर्णां वेदानामध्ययनाध्यापनाय सदवकाशाः प्रकल्पनीयाः । पाठ्यक्रमेषु चत्वारो वेदाः वेदाङ्गानि प्रतिशाख्य अनुक्रमणीयादयश्च ये सन्ति तेषां पाठ्यविषयाः संयोजनीयाः ।

३. समग्रवेदाध्ययनस्य वेदवेदाङ्गानामध्ययनमावश्यकम् । वेदविदुषां वेदशाखानां परिचयः वेदपाठक्रमाः वेदाङ्गादीनां ग्रन्थानां परिचयाः सम्यग्भवेयुः अतः एतेषामध्ययनाय प्रवचनाय च अवकाशाः प्रकल्पनीयाः ।

४. प्राचीनवेदपाठक्रमाः संरक्षणीयाः । तदर्थम् स्वाध्यायनिष्ठा विद्वांसः ये सन्ति तेषां समीपं गत्वा तैस्संल्लाप्य प्राचीनपाठक्रमान् ध्वनिमुद्रणद्वारा संरक्षेयुः आसक्ताः जनाः ।

५. संहिता-ब्राह्मण- आरण्यक-उपनिषदादयः ग्रन्थाः के के, व्याख्यातारः के के ? कुत्र कुत्र काः काः शाखाः सन्ति, कासु कासु शाखासु अध्ययनम् अध्यापनं च प्रचलदस्ति इति ज्ञात्वा ग्रन्थान् पठेयुः जनाः ।

६. प्रादेशिकभेदेन शाखाभेदेन यद्यपि पाठक्रमाः उच्चारणक्रमाश्च भिन्नाः सन्ति । अथापि तैस्तैः क्रमैरेव अध्ययनादिकं कर्तुं सर्वे सन्नद्धा भवेयुः ।

७. वेदाध्ययनं वेदाध्यापनं च कर्तुम् आगच्छान्तः जनाः अङ्गुलिगणनास्सन्ति । यतः वेदाध्ययन-परिसमापनानन्तरं जीविकायै किं करणीयमिति प्रश्नः समुदेति । अतः अधुना सर्वकार-विद्यालयादिषु उद्योगसंस्थासु पर्याप्तानि उद्योगस्थानानि नैवोपलभ्यन्ते । अत्र कुत्रापि उद्योगेषु निरतानां वेतनादिकं अत्यल्पम् । वेदाध्ययनं कृत्वा निष्णाताः ये पण्डिताः सन्ति ते आधुनिकसमाजे आधुनिकजीवनक्रमेण न वर्तन्ते इति तिरस्कारभावनाऽपि जनेषु वर्तते ।

अतः बहवो जनाः स्वस्वबालान् वेदाध्ययनाय नैव प्रेषयन्ति, ताम् न प्रोत्साहयन्ति । इमां कुप्रथां दूरीकृत्य वेदाध्ययनेन लभ्यमानं ज्ञानं गौरवं महिमादिकं च प्रकथ्य वेदाध्ययनं कर्तुं तान् आकर्षयेयुर्जनाः । तथा प्रयत्नाः भवेयुः ।

८. अधुनाऽपि केषुचिन्मठेषु कासुचित् संस्थासु वेदाध्ययनाय वेदाध्यापनाय च पाठशालाः महविद्यालयास्सन्ति । छात्रा अपि शिक्षणं स्वीकुर्वन्तस्सन्ति । परं तावन्मात्रेण नालम् । सर्वकारीयक्षेत्रेष्वपि एतेषाम् अवकाशाः प्रकल्पनीयाः । चतुर्षु वेदेषु - संहिता-ब्राह्मण-आरण्यक-उपनिषदां वेदाङ्गानां प्रातिशाख्यादिग्रन्थानाम् अध्यनाय भूरिव्यवस्थाः करणीयाः । ग्रन्थालयेषु एतत्सम्बन्धिनः ग्रन्थाः यथा लभेरन् तथा व्यवस्थाः करणीयाः । एतत्सम्बन्धिनः ग्रन्थाः सर्वकारेणैव मुद्रापयित्वा सुलभमूल्येन यथा लभेयुस्तथा यत्नः करणीयः ।

९. ये च वेदाध्यायनं कुर्वन्ति ते वेदमन्त्राणाम् अर्थान् पर्याप्तं न जानन्ति । एताः याज्ञिकादिक्रियाः किमर्थं कुर्यासुः इति बहवो जनाः नैव जानन्ति । अतः तत्तन्मन्त्राणां तत्तत्क्रियाणाम् महत्वं सर्वे जानीयुस्तदा वेदमन्त्रोपयुक्तविधिषु जनानामासक्तिः गौरवं च सञ्जायते ।

१०. वेदाध्ययनार्थमागतेभ्यः छात्रेभ्यः जनाः अशनवसनाध्ययनादिकल्पनद्वारा तान् प्रोत्साहयेयुः । सर्वकारप्रशासकाः अपि वेदाध्ययनाय पर्याप्तान् अवकाशान् प्रकल्पयेयुः । वेदाध्ययन-परिसमाप्त्यनन्तरं तेभ्यः जीविकार्थं पर्याप्तोद्योगादिकं प्रकल्पयेयुः ।

११. विश्वे एव अति प्राचीनतमं साहित्यं वेदवाङ्मयम् । तद्रक्षणार्थे वयं सर्वे भरतीयाः सर्वदा कटिबद्धा भवेयुः ।

१२. अधुना वैदिकक्षेत्रे स्थितानां जनानां मन्त्रार्थपरिचयः याज्ञिकप्रयोगपरिचयः एव अधिकं नास्ति । इमानि कर्माणि किमर्थं वयं कुर्मः । तेन किं प्रयोजनम् इत्यादिकं नैव जानन्ति । एवमेव वेदावाङ्मये कियन्ति प्रमाणानि प्राचीनाधुनिकज्ञानानि वर्तन्ते इत्येव न जानन्ति । परं वेदेषु वैज्ञानिकाः शैक्षणिकाः सामाजिकाः सास्कृतिकाः साहित्यिकाः आर्थिकाः पारम्परिकाः चतुर्विधपुरुषार्थप्रतिपादकाः भूरि भूरि विषयाः सन्ति । तान् सम्यक् ज्ञात्वा जनान् सम्यक् उपदिशेयुः तत्तद्वेदविषयपारङ्गताः जनाः । अस्माकं भारतदेशस्य रहस्यतमं ज्ञानं तस्य गाम्भीर्यं तस्य प्रयोजनं च जनान् प्रति वेदवाङ्मयज्ञातारः समीचीनं वदेयुः ।

१३. वेदोक्तविधिना पूजाश्च यज्ञयागादिक्रियाः षोडश कर्मविधयः सम्भवन्ति । तत्र विशेषतः याज्ञिकप्रक्रियाः यजमानः ऋत्विजश्च जानीयुः । कर्मसु अध्ययने अध्यापने श्रद्धा भक्तिः

निष्ठा कर्तव्यप्रज्ञा दैवीभावना पापपर्यालोचनं पुण्यश्रेष्ठता निरीहता गौरवं च सर्वदा भवेयुः । विशेषतः अस्माकं भारतदेशस्य परम्परासु संस्कृतिषु ज्ञानेषु अभिमानः आदरः श्रद्धा भक्तिः गौरवं चिकिर्षाबुद्धिः करणीयोत्साहः निष्ठा च तिष्ठेयुः ।

१४. अधुना आधुनिकवैज्ञानिकयुगे सर्वेषु क्षेत्रेषु बहूनि आनुकूल्यानि समुपलभ्यन्ते । विशेषतः वेदवाङ्मयक्षेत्रे व्यापकाध्ययनाय शिक्षणाय उपदेशप्रदानाय च आधुनिकक्रमाननुसृत्य सौलभ्यानि प्रदातुमवकाशाः भूरि वर्तन्ते । एतानि उपयुज्य वेदावाङ्मयस्य प्राचीनपुस्तकानि अप्रकटितान् ग्रन्थान् मुद्रापयेयुः आसक्ताः जनाः । देशभाषाङ्ग्लभाषादिव्याख्यानानुवादकानि दत्वा वेदग्रन्थान् प्रकाशयेयुः । विशेषतः भारते स्थिताः वेदशाखाः वेदपाठपरम्पराः चतुर्षु वेदेषु निष्णाताः वेदविद्वांसः वेदाध्ययनार्थं वेदपाठनार्थमेव संस्थापिताः वेदपाठशालाः महाविद्यालयाः के के सन्ति ? वेदशाखासु कासु कासु शाखासु वेदाध्ययनं वेदप्रचाराः वेदप्रसाराश्च प्रचलन्तस्सन्ति । कति सङ्ख्याकाः छात्राः विद्यन्ते ? तेषामशनवसन-वासोशिक्षणेभ्यः कानि कानि सौलभ्यानि आनुकूल्यानि सन्ति इत्येतान् सर्वान् विषयान् ज्ञात्वा तत्र तत्र गत्वा सङ्गृह्य - एतान् सर्वान् रक्षितुं प्रोत्साहयितुं च वेदशास्त्रविद्वांसः मठाधिपतयः आसक्ताः जनाः प्रशासकाः जनाः जागरूकाः सहायपराः क्रियाशीलाश्च भवेयुः । अन्तर्जाल-दूरदर्शन-आकाशवाणीप्रभृतिभिः माध्यमैः वेदवाङ्मयस्य विविधप्रकाराणां विषयाणां प्रचाराः प्रसाराश्च वेदविद्भिः शास्त्रविद्भिः आसक्तैः विद्वद्भिश्च भवेयुः । तदा जनाः वेदसम्बन्धिनः विचारान् ज्ञात्वा वेदाध्ययने आसक्तिं विधास्यन्ति ।

१५. विश्वविद्यालयेषु महाविद्यालयेषु पाठशालासु सर्वकारीयमहाविद्यालयेषु च चतुर्वेदानाम् अध्ययनानि कर्तुं विशेषावकाशाः प्रशासकजनैरेव प्रकल्पनीयाः । एतदर्थं प्रत्येकं वेदविभागान् संस्थाप्य तद्द्वारा वेदाध्ययनानि छात्राः कर्तुं अवकाशाः सम्प्रकल्पनीयाः ।

१६. वेदशास्त्रविद्वांसः वेदमन्त्राणामर्थान् शास्त्रीयलौकिकदृष्ट्या सम्यक् वदेयुः । यज्ञयागादिप्रक्रियाः किमर्थं जनाः कुर्युः ? तासां महिमादिकं प्रयोजनादिकं च किं किमिति सम्यक् प्रतिपादयेयुः । वैज्ञानिक-वैद्यकीय-सांस्कृतिक-धार्मिक-लोकमार्गदर्शकादयो विचाराः वेदमन्त्रेषु कथं निबद्धाः इति सम्यक् जनान् प्रतिपाद्य वेदवाङ्मये प्रीतिं विश्वासम् आसक्तिं गौरवं च विधातुं प्रामाणिकप्रयत्नान् विदग्धाः जनाः कुर्युः । तदा अस्मदीयं भारतीयं वेदवाङ्मयम् आचन्द्रार्क सूर्यवत् विलसत् तिष्ठति ।

*****

# आगामिनि विंशतिवर्षावधौ संस्कृतक्षेत्रे साधनीयस्य कर्मणो विषये किञ्चित्

**डा. एस्.जगन्नाथः, मैसूरु**

**(सूचना-अत्र प्रथम भागत्रयं मम ग्रन्थात् संस्कृतवाङ्मये विश्वकोशो इति नामकात् उद्धृतम् ।)**

## १. पुनः प्रकाशनयोग्यो ग्रन्थः - लघुशब्दार्थसर्वस्वम्

'विश्वकोश' इति शब्दस्य अधुना प्रायः मातृकाक्रमेण दत्तानां शब्दानां, सम्पादकेन यथाशक्ति दत्तानां विविधविषयाणां सविस्तराणाम् अविस्तराणां प्रबन्धानां महासमुच्चय इत्यभिप्रायो भवति । विषयानुगुण्येन प्रबन्धानां सङ्कलनमपि कदाचिद् गोचरीभवति, परन्तु इत्थम्भूतलक्षणा विश्वकोशा विरलाः । संस्कृतेतरासु भाषासु विरचितेषु विश्वकोशेषु साधारणमिदं स्वरूपम् । परन्तु संस्कृते रचितेषु विश्वकोशेषु उद्धृतानामेव ग्रन्थांशानां साम्राज्यम् । प्रसिद्धयोर्विश्वकोशयोः शब्दकल्पद्रुम-वाचस्पत्योस्तु शब्दविवरणप्रसङ्गे भूयस्या मात्रया तत्सम्बद्धा ग्रन्थाभाग उद्धृताः । कोशकर्त्रैव स्वयं रचिता लेखभागस्तत्राल्पा एव । 'विश्वकोश' इति शब्दं श्रुत्वा अस्माकं मनसि याऽऽकृतिरवतरति, तया आकृत्या सुसदृशीम् आकृतिं बिभ्राणो विश्वकोस्तु 'लघुशब्दार्थसर्वस्व' नामा यस्तत्रभवता परवस्तुवेङ्कटरङ्गाचार्येण विरचितः ।

ग्रन्थस्योपक्रमे द्वादशोत्तरशतं पद्यानि सन्ति यत्र कोशकर्तारमधिकृत्येत्थं ज्ञापितम् -

पूर्वं केचन भट्टोपाह्वयाः वेदविद्वांसो भरद्वाजगोत्रजाः श्रीशैले अथ च तं परितो वसन्ति स्म । तेषां सर्वेषु वेदेषु सत्यपि पूर्णाधिकारे एते सामवेदिन आसन् । तस्मादेवैते यज्ञेषु उद्गातार आसन् । ते सदा लौकिकचिन्ताविदूराः परस्मिन् वस्तुनि निरन्तरं कृतबुद्धय आसन्नतस्तेषां परवस्तु इत्येव पूर्वसञ्ज्ञा बभूव । एतेषां मध्ये कश्चन भट्टनाथनामा साङ्गोपाङ्गवेदवित् सन् भगवद्रामानुजाचार्यस्यैव सकाशात् श्रीभाष्यमध्यगीष्ट । तद्वंशजो गोविन्दाचार्यो यो वरवराह्वयाद् द्रविडवेदत्वेन प्रसिद्धं तिरुवायमोळीवाङ्मयम् अशिक्षत । कस्यचित्त्वथ कालस्य संन्यासी बभूव सः । गृहीतसंन्यासः सन्नेष शेषाचलं गत्वा श्रीनिवाससेवी समभूत् । तद्वंशीयानां ब्राह्मणानां पोषक आसीद् वेङ्कटगिरिराजः । ते नानावाक्यार्थसभासु व्याकरणवेदान्तन्यायमीमांसासु वादिनः सन्तः प्रायो विजयं प्रापुः । तद्वंशे जातस्य कस्यचन नामधेयं श्रीनिवासः । तत्पुत्रो रामानुजः । तत्पुत्रः (द्वितीयः) श्रीनिवासः । एष द्वितीयः श्रीनिवासः बाल्य एव नष्टमातापितृकोऽपि बन्धुभिरेव प्रापितोपनयनसंस्कारो विद्यां

ग्राहितः । ततो वेङ्कटनाथाख्यादुद्दण्डात् पण्डितात् मन्त्रसंस्कारं प्रापितः । तस्मिन् काले हैदर्नामकात् मुस्लिमात् वेङ्कटगिरिराजस्य प्राप्ते क्लेशे, एष परवस्तुश्रीनिवासः सकुटुम्बः सन् विजयनगरराजमुपससर्प । तत्र कश्चित् कालं विद्वत्समवायेन अभिवर्धितज्ञानः सुखमुवास । कतिपयवर्षानन्तरं स्वदेशं प्रशान्तोपप्लवं विज्ञाय तत्र निवर्तनं चिकीर्षन् मध्येमार्गं विशाखपत्तन-माससाद । तत्र आङ्ग्लानाम् आस्थाने प्राप्तमन्त्रीपदवीकः कश्चन जग्गरायनामा सज्जनः एतं विद्याप्राप्तये प्रार्थितवान् । सः जग्गरायः स्वयं विद्वान् धार्मिकश्च । स जग्गरायोऽस्यैव शिष्यो भूत्वा एतस्य शिक्षणकारणात् केषुचन शास्त्रग्रन्थेषु पाण्डित्यमाससाद । जग्गरायस्य सुताः सूर्यप्रकाशरायो भास्कररायः सूर्यनारायणश्चापि तस्य शिष्या अभूवन् । दैवदुर्विपाकाद् भास्कररायः, हठान्निधनं गतः । तृतीयः सूर्यनारायणाख्यो वैष्णवं मतं राममन्त्रं चाग्रहीत् । जग्गूरायाख्यः कस्यचित् कालस्य कालवशं गतः ।

एतेन नितरां निर्विण्णोऽभूत् श्रीनिवासविद्वान् । कथञ्चिन् समाहितमना भूत्वा बोब्बिलिराजेन तेलुगुभाषायां कृतायाः प्रश्नोत्तरात्मिकाया वेदान्तकृतेः सुगमानाम्नीं व्याख्यां तेलुगुभाषया कृत्वा तेलुगुभाषायामश्वलक्षणग्रन्थश्च कृतः । संस्कृतभाषायामनेन कश्चन निघण्टुरप्यकारादक्रमिकः कृतः ।

तस्य श्रीनिवासस्य द्वौ तनयौ । प्रथमो रामानुजः । द्वितीयस्तु वेङ्कटरङ्गेशः । द्वावपि स्वपित्रैव विद्याप्रारम्भशिक्षां प्रापितौ । परन्तु दुर्दैवात् श्रीनिवासो दिवं गतो यदा परवस्तुवेङ्कटरङ्गेशः केवलं द्वादशवर्ष आसीत् । परन्तु पित्रा संभृतं ग्रन्थराशिमवलम्ब्य स्वयमेवानुवर्तितविद्याभ्यासौ द्वावपि सहोदरौ स्वयमाचार्यकं प्राप्तौ । व्याकरणस्य केचन विषया ज्येष्ठेन रामानुजेनानुजे, न्यायस्य च केचन विषयाः कनिष्ठेन वेङ्कटङ्गेशेनाग्रजे सङ्क्रामिताः । ततः कश्चन वेङ्कटाचार्याख्यो विद्वन् वादकथायाम् एतयोः पाण्डित्यं ग्राहयामास । वेदान्तशास्त्रविचारं तु पित्रा कृतस्य ग्रन्थस्याध्ययनेन स्वयं प्राप्तावेतौ । वेङ्कयनाथ (= वेदान्त-देशिक) विरचितग्रन्थानामध्ययनेन वेदान्तज्ञानमनयोरुपा-चीयत । यदृच्छया तत्राऽगतः कश्चन रामानुजभट्टनाथाह्वयो भाष्यादिपाठनेऽभ्यर्थितः सन् एतयोर्विद्याप्रेमाणं दृष्ट्वा प्रीतान्तरङ्गः सन् 'स्वयमेव सकलानां भाष्याणामर्थाः स्फूर्यासुर्युवयोः' इत्याशिषोऽदात् । 'अन्यो गुरुर्मा भूद् युवयोः' इत्यपि स्पष्टमभाषिष्ट । तस्य वाक्सिद्धि-बलादेतयोर्द्वयोरप भाष्यादिष्वनितरसाधारणं प्रभुत्वं सम्पन्नम् ।

परवस्तुश्रीनिवासस्य यः शिष्य आसीत् मन्त्री तस्य जग्गरायस्य यस्तनयः सूर्यप्रकाश-रायाख्यस्तस्य द्वौ तनयौ । प्रथमो वेङ्कटजग्गरायः । द्वितीयः सौम्यनारायणः । वेङ्कटजग्गरायो

ज्यौतिषशास्त्रे प्रचण्डः । प्रकृतं कोशकर्तारं च गुरुं निश्चिकाय । दर्शनानि चाधिजगे । परन्त्वल्पायुष्को दिवं यातः ।

अपरेषामापि केषांचन विदुषां बन्धूनां गुणवतां चाल्पे वयसि निधनं दुःखाकरोति स्म परवस्तु वेङ्कटरङ्गेशम् । संसारस्य अनित्यतां दृष्ट्वा तत्र निरादरो बभूव । केषाञ्चिदभ्यर्थनया केचिद् ग्रन्था रचिताः अनेन । यथा राजचूडामणिदीक्षितीयस्य कमलिनीकलहंसस्य तेलुगुभाषानुवादः, वेदान्तसङ्ग्रहः - तेलुगुभाषायां, गीतप्रबन्धस्तेलुगुभाषायाम्, अभिज्ञानशाकुन्तलस्य तथा मञ्जुल-नैषधस्य च कथा संस्कृतभाषायाम् ।

ततोऽनेन विपुलेभ्यो ग्रन्थेभ्यो विषयान् सङ्गृह्य कोषरचनाऽऽरब्धा । नारायणगजपतिरायाख्यो धनिक एतच्छ्रुत्वा सन्तुष्टान्तरङ्गो धनव्यवस्थायां प्रतिज्ञां तु यद्यपि कृतवान् परन्तु ग्रन्थमुद्रणाकाले प्रतिज्ञां न निरवहरत् । एतदन्तरे विशाखपत्तने पाठशालायाः स्थापनार्थं ततश्च तन्निर्वाहायावश्यकं धनं च प्राप्तुं देशाटनमचिकीर्षद् वेङ्कटरङ्गेशः । बोब्बिलिपुरे इनुगण्टिनामकवंशकुलोत्पन्नः सीता-रामाख्यो राजा प्रतिवर्षं पाठशालाया निर्वाहार्थं धनप्रदानं प्रतिज्ञातवान् । तत्र विद्वान् वेङ्कटकृष्णसोमयाजी तत्रत्यानां धनिकानां सकाशाद्धनं कोशकर्त्रे प्रदाने महदेव साहाय्यं कृतवान् । मेल्विल्(Mill-ville ?)नामक आङ्ग्लाधिकार्यपि पाठाशालायाः प्रचालने महदेव साहाय्यमाचरितवान् ।

एतदन्तरे बोब्बिलीपुराधीशस्य राज्ञी लक्ष्मीचेल्लम्मा स्वश्वशुरेण क्रीतं मुद्रायन्त्रं कोशकर्त्रे दापयामास । (Car Michael ? / Colonel Michael ?) नामकेन आङ्ग्लेन सज्जनेन 'कोशस्य मुद्रणायै धनराशिर्दीयते दाप्यते च । परन्तु कोशोऽयं महत्तमोऽस्ति । तस्मादस्मिन् कोशे वर्तमानानां प्रविष्टीनां (Entries) मध्ये या गौणास्तासामपवारणं क्रियतां मुद्राप्यतां च । तदा मया दीयमानो दाप्यमानश्च धनराशिस्तन्मुद्रणायै पर्याप्तं भवेत्' इति कस्याञ्चित् सभायाम् अवदत् । ततो ग्रन्थकर्त्रा कोशस्य सङ्ग्रहः कृतो 'लघुशब्दार्थसर्वस्वम्' इति नामधेयमपि दत्तम् । क्रमशः सङ्ग्रहकोशरचना समाप्ता । मुद्रणा चाऽरब्धा ।

महाकोशस्यास्य प्रथमः सम्पुटः ए.सि. श्रीनिवासचारियर् नामकेन १८७७ ईसव्यां विशाखपत्तने आर्षमुद्रणालये मुद्रापितः । १८७८ ईसव्यां च द्वितीयः सम्पुटस्तत्रैवार्षमुद्राणालये राचकोण्ड अप्पलनरसिंहनामकेन मुद्रापितः । तेलुगुलिप्यां मुद्रितोऽयं ग्रन्थः । संस्कृतस्य मुद्रणार्थं यद्यत्वे देवनागरीलिप्या उपयोगोऽधिकतरं क्रियते तत्रोत्तरप्रदेशीयमुद्रणालयेषु समुपयुक्तायाः तत्प्रान्तलिप्या

देवनागर्याः प्रभाव एव हेतुरिति, पूर्वं तु संस्कृतमुद्रणायै तत्तत्प्रदेशव्यापिका हृदयङ्गमा लिपय एव प्रयुक्ता आसन्नेदानीमिव उत्तरप्रदेशीयमुम्बयीप्रदेशीयप्रान्तलिपिर्देवनागरीति कृतनामधेयेति च विदितवेदितव्यानां न विस्मयाय विचार एषः ।

कति सम्पुटेषु समग्रतामनायि कोशोऽयमिति न ज्ञायते । रचना तु पूर्णैवेति किल स्पष्टमभाषिष्ट ग्रन्थकर्ता । अस्मद्दृष्टिपथमागता तु केवलं प्राथमिकी सम्पुटद्वितयी कृतेरस्याः ।

प्रथमे सम्पुटे 'अ'कारादयः प्रविष्टयः (Entries) । द्वितीये च सम्पुटे 'आ'-कारादयः प्रविष्टयः (Entries) । मुद्रणा समग्रस्यैव कोशस्य जाता वा, आहोस्वित् कुतश्चित् कारणाद् द्वितीयसम्पुटमुद्रणानन्तरं स्थगिता वा मुद्रणाऽस्येति तु वक्तुं न प्रभवामः ।

यदि लघुनामधारिणः कोशस्य तदुपनामरहितस्य महतश्च मूल-कोशस्य (प्रायः 'शब्दार्थसर्वस्वम्' इति कृतनामधेयस्य) मुद्रणा समग्रैव सम्पन्ना, तत्प्राप्तिः तस्य च पुनर्मुद्रणायोजना संस्कृतज्ञानां परमो धर्मो भवतीत्यत्र न संशयः । अमुद्रितेऽपि कोशयोरनयोर्मूलहस्तप्रतिरधुना यदि कुत्राप्यवशिष्टा- कुत्र सा वर्तते, कस्यां स्थितौ वा वर्तते इत्येतदादिकं सम्यगेव विशोध्य अस्मिन् विषये पर्याप्तं प्रकाशं वितरीतुं तज्ज्ञाः विज्ञाप्यन्ते । अद्यैतत्कोशस्य विशाखपत्तनेऽन्वेषणा करणीयेति प्रतिभाति ।

अन्यश्च । अकारादिक्रमवान् कश्चन कोशः स्वपित्रा श्रीनिवासविदुषा रचित इति किल प्रकृतकोशकर्ता ब्रवीति । स कोशः किंसंज्ञक इति न विदितम् । तस्य पर्याप्तया मात्रया परिचयप्रदाने ग्रन्थकर्त्रीया पीठिका सर्वथैवोदास्ते । तस्मिन् विषयेऽपि संशोधनस्याऽवश्यकता समस्ति । तस्य कोशस्य दर्शनेनैव तदपेक्षया महत्तरः कश्चन कोशः किं परवस्तुवेङ्कट-रङ्गाचार्येण रिरचयिषितोऽभूद्वा न वेति विचारः संशोधनसापेक्षः ।

शास्त्रीयान् विचारान् बुभुत्सूनां तु महानेवोत्सवोऽत्र यत्र वैशद्येन सकला अपि शास्त्रार्था विवृताः । अत्र मुख्यानां सर्वेषां पदरूपाणां सधातुनिर्देशाः प्रविष्टयो वर्तन्ते । येषु -घञ्प्रत्ययादिषु - अकार एव शिष्यते तेषां सर्वेषां प्रत्ययानामुल्लेखः 'अ'इत्यत्र कृतः । 'अख्यातिः', 'अनिर्वचनीयख्यातिः' 'असत्ख्यातिः' इत्यादिषु तत्तत्परिचयकरम्भिता लेखा एव सन्ति, न केवलम् एकेन वाक्येन द्वाभ्यां वा वाक्याभ्यां सङ्क्षिप्तं परिचयमात्रम् । 'आकडाराधिकार' इति प्रविष्टिरप्यत्र द्रष्टव्या यत्र-कुत्र कुत्र सञ्ज्ञयोर्द्वयोरुपस्थितिः, कां संज्ञां बाधित्वा का संज्ञा विधीयत इति सुविशदमुपन्यस्तम् । 'एका संज्ञा' इत्यस्य विवरणमत्र तथा दत्तं यथा व्याख्योपव्याख्यास्वपि

न गोचरीभवति तत् कदाचित् । अष्टाध्याय्याः सुस्पष्टा सविवरणा च विषयानुक्रमणिका संस्कृतग्रन्थेषु कुत्राप्यन्यत्र न मया दृष्टा यथाऽत्र । अवच्छेदकविषये त्वत्र दत्तं क्रोडपत्रसोदरं परिचयपत्रं दृष्ट्वा नवीनन्यायमधिजिगांसूनां हृदयं सन्तोषेण नृत्यतीव । 'अर्जुन' इत्यत्र महाभारतीया अर्जुनकथा समग्रैव प्रत्ता । गद्यमत्रत्यमतीवोन्नतस्तरीयं च सरलं च दोषलेशहीनं च । 'अलङ्कार' इत्यत्रालङ्काराणां लक्षणानि सोदाहरणानि दत्तानि । यद्यपि उदाहरणान्यत्रत्यानि पूर्वग्रन्थेभ्य उद्धृतानि परन्तु लक्षणवाक्यानि प्रायः पूर्वरचनीयानां लक्षणानां सारमादाय गद्ये स्वयं रचितानि ग्रन्थकर्त्रा । अलङ्कारविभागानां सविस्तरं निर्देशनमत्र प्राप्यते । 'आदिवृद्धि'रित्यत्र कुत्र कुत्राऽदिवृद्धिर्भवति तद्धितेषु कुत्र नेति स्पष्टतरो निर्देशः प्राप्यते - येन 'यत्र यत्र तद्धितो वर्तते तत्र तत्रादिवृद्धि'रिति भ्रान्त्या मन्यमानानां प्राधीतानां तद्विषयकभ्रान्तिनिवारणपूर्वकं केवलं 'कितां, ञितां, णितां च प्रत्ययानाम् आदिवृद्ध्युपादनक्षमत्वम्' इति च संविज्ञानपूर्वकं शुद्धो बोधो जायते । 'अश्व' इति शब्दस्य याऽत्र प्रविष्टिस्तत्र अश्वशास्त्रविषयिका लघुकायिका कृती रचिताः । अकारादीनाम् आकारादीनां वेदान्तमीमांसाधिकरणानां वा व्याकरणपरिभाषाणां वा सुविस्तरः परिचयोऽत्र गोचरीभवति । शारीरकाधिकरणानां शङ्कररामानुजमध्वभाष्यानुसारेण सारोऽसन्देग्धव्यया दृढया च भाषया तथाऽत्र सङ्गृहीतो यथैतत्ठनानुपदं सशिरःकम्पं ग्रन्थकर्तारम् अनभिनन्दन् जनो नूनं विरलः ।

अत्रेदं ज्ञातव्यम् । वस्तुतस्तु संस्कृतस्योन्नतो भाषास्तरः शास्त्रगोचरः । विशिष्य, व्याकरणन्यायवेदान्त मीमांसाज्यौतिषायुर्वेदाख्य-शास्त्रप्रतिष्ठापितः । विस्मृत्येदं संस्कृतस्य संस्कृतत्वं न शिष्यते । विषयमेतं सम्यगेव ज्ञाता ग्रन्थकर्ता परवस्तुवेङ्कटरङ्गाचार्यः । परम्परीरणया पद्धत्या कृताध्ययना विद्वांसो यदि मनोहत्य कार्यं कुर्वन्ति, कान्यद्भुतानि ते साधयितुं (?)ध्नोतुं शक्नुवन्तीत्यस्य प्रबलं प्रमाणमिदं लघुशब्दार्थसर्वस्वम् ।

ममाभिप्रायेण ग्रन्थस्यास्य तेलुगुलिप्यां यथावत् पुनर्मुद्रणं प्रथमतः करणीयम् । ततः किमपि साफ्ट्वेर् निर्माय समग्रस्य ग्रन्थस्य देवनागर्यां परिवर्तनं करणीयम् । मम मित्रेण युवविदुषा श्रीमता स.कार्त्तिक्वर्येण एवं ज्ञापितोऽस्मि यदस्य षट् सम्पुटाः बेङ्गलूरुस्थ-कन्नडासाहित्यपरिषदो ग्रन्थालये वर्तन्त इति । तत्रान्विष्य सम्पुटानामेतेषां पुनर्मुद्रणं विद्वज्जगतो भूयस उपकाराय कल्पते ।

## २. प्रकाशनदशां प्रापणीयो ग्रन्थः संस्कृतवङ्मयविश्वकोशः

एष विश्वकोशः समस्तानामपि भारतीयानाम् अभिमानस्य हेतुभूतो महतो विश्वकोशस्य बृहती योजना । महासम्पुटस्यास्य मूलयोजनं महामहोपाध्यायस्य तत्रभवतो मथुराप्रसाददीक्षितस्य स्वप्नः ।

स्वप्नश्चायं विश्वविख्याते वाराणसेयसम्पूर्णानन्दविश्वविद्यानिलये जन्म लेभे । सम्पूर्णायाम् अस्यां योजनायां 'न केवलं संस्कृते परन्तु भारतीयायां कस्यामप्यपरस्यां भाषायाम् एतेन सदृशः कोशो न जातः' इति कीर्तिं प्राप्स्यति ।

अत्रत्याः प्रविष्टयः कया विधया वर्तन्त इति सारस्वते प्रपञ्चे ज्ञापनार्थम् अत्रत्या काचित् प्रविष्टिः 'अत्रि'नाम्नी पार्थक्येन लघु-पुस्तकाकारं लम्भितः प्रकाशितश्च । 'अत्रिनिर्वचनम्' इति संज्ञावत्यस्मिन् लघ्व्यां कृत्यां ९६ पुटाः सन्ति । अत्रिमहर्षिमधिकृत्य ये वेदशास्त्रपुराणादिषु समुपलभ्यन्ते विचारास्ते सर्वत्र सम्पुञ्जिताः । अत्र पूर्वग्रन्थादुद्धृतानां वाक्यानां केवलमनुवादाः सन्तीति न भ्रमितव्यम् । यद्यप्यनुवादा विपुला वर्तन्ते । परन्तु सम्पादकीया विचारा ये योजिता अधिकतरया मात्रया ते दर्शयन्ति विचारविश्लेषमुत्कृष्टस्तरीयम् । अत्रिमहर्षिमधिकृत्य संशोधनं चिकीर्षूणामाकरग्रन्थोऽयम् ।

एष सारोऽत्रत्यायाः पीठिकायाः - एतादृशस्य विश्वकोशस्य रचना तत्रभवतो दिवङ्गतस्य महामहोपाध्यायस्य गङ्गानाथझावर्यस्य मस्तिष्के प्रापावतरणम् । तत्पुत्रेण श्रीमता महामहोपाध्यायेन मथुराप्रसाददीक्षितेन विश्वकोशस्यास्य प्रस्तावो विश्वविद्यानिलये कृतः । विश्वकोशरचनापरिशीलनार्थं समितिः काचिद् रूपिता । तत्रैते विद्वन्मणय आसन् - श्रीमान् आदित्यनाथझा, क्षेत्रेशचन्द्र-चट्टोपाध्यायः, महामहोपाध्यायः पण्डितो मथुराप्रसाददीक्षितः, कुबेरनाथशुक्लः, रामनरेशमिश्रः, बदरीनाथशुक्लश्च । समितिरेषा कार्यारम्भं १९५९ ईसव्याः सेप्टम्बर्मासे कृतवती । अत्यल्प एव समये वेदोपनिषत्पुराणोपपुराणमहाभारतालङ्कारशास्त्रतन्त्रस्मृतिकोशदर्शनानां शब्दसङ्ग्रहः कृतः ।

पारिभाषिकाणां शब्दानाम् अतिविस्तृतं विवेचनमनेन योक्ष्यते । दार्शनिकीनां सर्वासामपि ज्ञेयानां सामग्रीणां विश्लेषणमत्रेतरविश्वकोशदुर्लभमेतदीयं वैशिष्ट्यं भविष्यति । यदाऽयं विश्वकोशः समाप्तिं गमिष्यति, तदाऽतिविशालो ब्रह्मकोशोऽयं भविष्यतीत्यत्र न संशयकणिका ।

अधुना किं सञ्जातमस्या योजनाया इति न वयं विद्मः । यद्यार्थिकाः क्लेशा योजनाया एतस्या विघ्नहेतवः, तन्निवारणार्थं निश्वविद्यानिलयीयाः सर्वेऽपि विद्वन्मणयः सम्प्रार्थ्यन्ते । समस्तमपि संस्कृतजगन्निरुद्धश्वासं सत् कोशस्यास्य प्रकटनं सकुतूहलं प्रतीक्षमाणामस्ति ।

समग्रस्यापि राष्ट्रस्य गर्वं समेधयतोऽस्य ब्रह्मराशेः प्रकाशनं संस्कृतज्ञानां धमनीषु नूतनं प्राणसञ्चारं कृषीष्ट, संस्कृतस्य पुनरुज्जीवनप्रातःसन्ध्यायाः भानुवद् भूयादेष कोष इति च वयमाशास्महे ।

### ३. कन्नडभाषायाम् अनुवादयोग्यो ग्रन्थः हंसविलासः

हंसविलासो वस्तुतस्तन्त्रग्रन्थः । एतं रचयिता हंसमिट्ठुर्गुर्जरीयः । अस्य जन्मतिथिरपि निश्चिताऽस्ति यथा वैक्रमाब्दे (१७९४वर्षे (क्रि.श. १७३७) फाल्गुण पञ्चदश्यां जातोऽयम् । एतदीयस्य वैयक्तिकस्य जीवस्य द्वित्राणि चरित्राण्येवम्प्रकाराणि -

पिताऽस्य कृपारामः, माता च सूरीनाम्नी । जन्मनाम च मिट्ठु । अयं सामवेदी । पञ्चवर्षः सन् प्रापितोपनयनसंस्कारोऽयं गायत्रीदेव्या अनुग्रहेण शीघ्रतरं सिद्धश्रीविद्याको मिट्ठुशुक्लनामकस्य पुत्रीं धूलीनाम्नीम् उपयेमे । सम्प्राप्तसप्तदशवर्षो जातवैराग्यस्त्यक्तगृहश्चैष काशीं गतवान् । तत्र परमहंसेन केनचिल्लब्धाध्यात्मोपदेशः सन् 'अहं हंसोऽस्मि' इति भावनया सम्पूरितहृदयः प्रतिन्यवर्तत । स्वपत्नीं वैराग्यपरां विदित्वा सप्रमोदमुपदिदेश तस्या अध्यात्मविद्याम् । ततो धूलि-हंसमिट्ठु-संवाद-रूपस्य प्रकृतस्य हंसविलासनामकस्य ग्रन्थस्य रचनामप्यारब्धवान् ।

तन्त्रग्रन्थोऽयमिति ज्ञापितपूर्वम् । परन्तु प्रासङ्गिकमत्रत्यं वस्तु-वैविध्यं सर्वानपि विस्मयोदधौ निमज्जयति । एवं च विश्वकोशानां मध्ये गणनीयं स्थानमाक्रामत्येतद् ग्रन्थरत्नम् ।

हंसी (=हंसमिट्ठोः पत्नी धूली, या दीक्षानन्तरं हंसीति परिवर्तितनामधेया) सकौतुकं प्रश्नान् पृच्छति, हंसेन तदुत्तराणि दीयन्ते । अनयैव विधया ग्रन्थस्य विषयाणां क्रमवती गतिः । अत्र गद्यानि पद्यानि च वर्तन्ते । गद्यानि ग्रन्थं रचयित्रैव प्रणीतानि । परन्तु पद्यभागेषु १. अन्यैर्मूलैः सङ्गृहीतानि, २. ग्रन्थं कर्त्रा रचितानि च - एवं प्रकारेण द्वैविध्यं द्रष्टव्यम् ।

ग्रन्थकर्तुर्गद्यं प्रसन्नमञ्जुलं चित्ताकर्षकं च । प्रायिकं दैर्घ्यमस्य सर्वत्र गोचरः । ५२ अध्यायैर्विभक्तोऽयं ग्रन्थः ३२३ पुटेषु मुद्रितः । अधुना अत्रत्येषु विषयेषु कश्चन कटाक्षः पात्यते-

कलियुगलक्षणं, नरकवर्णनं, कपिलोक्तजीविनां वर्णनं, सप्तज्ञानभूमिकाः, सत्पुरुष-मुमुक्षु-सद्गुरु-सच्छिष्याणां लक्षणं, मीमांसा-योग-न्याय-वैशेषिक-साङ्ख्य-वेदान्तविचाराः, तन्त्रशास्त्र-प्रतिपादिताया दीक्षाया विधानं, तान्त्रिका आचाराः, सात्त्विकाः सिद्धान्ताः, विविधानां मन्त्राणाम् उद्धारक्रमाः, जपयोगः, पूजावैविध्यं, छन्दांसि, अलङ्कारः, रसलक्षणं, सङ्गीत-नृत्यरासादीनां लक्षणानि, ऋतुवर्णनं, कामशास्त्रं, रासयोगश्च ।

'अमुकैर्ग्रन्थैरमुका विचारा आदत्ता' इति ग्रन्थकर्त्रैव व्यक्तमुक्तत्वात्, विचारेऽस्मिन् ऊहापोहस्य कीदृशस्यापि नावसरः । आध्यत्मिक एव क्षीरोदधौ निमज्जितवतोऽस्य लौकिकेषु विषयेष्वतादृशं कौतुकं परमेव विस्मयमादधाति । विषयवैविध्यसम्पादने ग्रन्थं रचयिता आसन्नत्र्यशीति (८३)

ग्रन्थानाम् अधमर्णोऽस्ति । तथापि शास्त्रीयेषु विचारेषु स्वकीयान् अभिप्रायान् तत्र तत्र स्पष्टमभिदधाति । तस्मात् प्राचीनेषु विश्वकोशेषु स्वोपज्ञतां साधितवतां विश्वकोशानां मध्ये परमोत्कृष्टस्तरीयमस्य स्थानमित्यत्र न कोऽपि सचेताः सन्देग्धि ।

प्रायः सर्वेऽपि विश्वकोशाः पद्यमयाः । परन्तु हंसविलासो गद्ये रचित इति विशेषः ।

बरोडानगरे ग्रन्थस्यास्य प्रकटितत्वात् प्रायो गुर्जरीयैर्महाराष्ट्रीयैर्वा विद्वद्भिरेतद्विषये कृतसंशोधनग्रन्थैरथ विहितानुवादैरेव भाव्यम् । तद्विचार्य एतद्विषये अधुनैव कृताध्ययनानां विदुषां साहाय्यं प्राप्य कन्नडभाषायामस्यानुवादो निर्वर्तनीयः । दैवादधुना डिजिटल् लैब्ररी आफ् इण्डिया इत्यत्र ग्रन्थस्यास्य समग्रं मूलमुपलभ्यते । ग्रन्थाङ्कः - १९९००१००८७८४९ । एतस्यानुवादे समग्रं मूलं दातव्यम् । मुख्यानां शब्दानां सूची, प्रौढाध्ययनानुकूला पीठिका इत्येतदादिकं समग्रमेव योज्यम् ।

**४. प्रकाशनयोग्या मातृकास्था कृतिः मनुस्मृतिव्याख्या**

भारुचिप्रणीता मनुस्मृतिव्याख्या मैसूरुनगरस्थे प्राच्यविद्यासंशोधनालये समग्रा समुपलभ्यते । सर्वप्रथममस्य अन्वेषणं दिवङ्गतेन श्रीमता फाटक्वर्येण कृतम् । प्रवासं कुर्वाणेनानेन चिक्कमगळूरुजिल्लायां बाळेहोन्नूरुस्थे रम्भापुरीवीरसिंहासनमठे भारुचिकृतया मनुस्मृतिव्याख्यया समग्रया युक्ता मातृका त्रिनवत्युत्तरैकोनविंशाब्दे (१९९३) दृष्टा । मठाधिकारिभिश्च औदार्येण दत्ता च मातृका । झटिति एतं विषयं स कुलपतये श्रीमते मादय्यवर्याय ज्ञापयामास । तस्य प्रकाशनार्थं धनराशिप्रदानं कस्याश्चित् सभायां प्रतिज्ञातम् । दुर्दैवात् अद्यपर्यन्तं नैतत् कृतम् ।

भारतीयविद्याभवने भारुचिप्रणीता व्याख्या प्रकाशिता परन्तु न समग्रशः । षष्ठादध्यायादारभ्य प्रकाशिता तत्रैयम् ।

व्याख्याया अस्या नामधेयं मनुशास्त्रविवरणम् अथवा मनुमीमांसा । ऋजुविमलेति शब्दस्तत्र तत्र पुष्पिकावाक्ये गोचरीभवति । वस्तुतस्तु ऋजुविमल इति पुंसि व्याख्यातुर्विशेषणं न पुनर्व्याख्याया अभिधानम् । भारुचिरात्मानम् आनर्तीयं प्रथमाध्यायगतायां पुष्पिकायां तथा आनर्तकीयं च तृतीय-सप्तम-द्वादशाध्यायगतासु च पुष्पिकासु विशेषयति । आप्टेकोशानुसारम् आनर्तः नवीनकालिकं वटनगारं, यदधुना उत्तरगुर्जरप्रदेशस्थ काथेवाड् एव । तृतीयसप्तमाद्यायगते पुष्पिके व्याख्याकृदेष श्लाघ्यस्मृतिसायुज्याचार्यगुरुरिति ब्रूतः । कोऽस्याभिप्राय इति न स्पष्टम् । अन्तिमध्यायगते पुष्पिकावाक्ये श्लाघ्य इति पदे लोड्च इति पाठः । आलोड्च सर्वशास्त्राणि

इत्यादीनि किल प्रसिद्धानि । तदभिप्रायकः किमेष पाठ इति परिशीलनीयम् । लोङ्च इति शब्दस्यार्थमजानन् लेखकः किं श्लाघ्य इति पाठपरिवर्तनं कृतवान् वेति शङ्काऽत्र समुन्मिषति ।

अत्र वैचित्र्यमिदमेव यत्पुष्पिकासु वैसादृश्यम् । चतुर्थाध्यायगतायां पुष्पिकायां व्याख्याया व्याख्याकृतो वा नाम नास्त्येव । अत्र मृग्यो हेतुः ।

**अत्र दत्तानि पुष्पिकावाक्यानि -**

१. स्मृतिसायुज्यगुरोरानर्तीयस्य ऋजुविमलकृतौ मनुशास्त्रस्मृतिविवरणमीमांसायां प्रथमोऽध्यायः । (पत्रम् १३)

२. मनुशास्त्रे भृगुप्रोक्तसंहिताविवरणे भारुचिकृते द्वितीयोऽध्यायः । (पत्रम् ४०)

३. इति श्लाघ्यस्मृतिसायुज्याचार्यगुरोरानर्तकीयस्य कृतौ मनुशास्त्रविवरणे तृतीयोऽध्यायः । (पत्रम् ५९)

४. इति चतुर्थोऽध्यायः । (पत्रम् ७७)

५. इति भारुचिकृतौ मनुशास्त्रविवरणे पञ्चमोऽध्यायः । (पत्रम् ९०)

६. इति ऋजुविम(ल)भारुचिकृतौ षष्ठोऽध्यायः । (पत्रम् ९५)

७. इति श्लाघ्यस्मृतिसायुज्याचार्यगुरोरानर्तकीयस्य ऋजुविमलस्य भारुचेः कृतौ मनुशास्त्रस्मृति-विवरणमीमांसायां सप्तमोऽध्यायः । (पत्रम् १०८)

८. इति ऋजुविमलकृतौ मनुशास्त्रविवरणे मनुमीमांसायां अष्टमोऽध्यायः । (पत्रम् १३६)

९. इति ऋजुविमलस्य कृतौ मनुशास्त्रविवरणे नवमोऽध्यायः । (पत्रम् १५३)

१०. इति ऋजुविमलस्य कृतौ मनुशास्त्रविवरणे दशमोऽध्यायः । (पत्रम् १६५)

११. इति मनुशास्त्रविवरणे तु ऋषिप्रोक्ते एकादशोऽध्यायः । (पत्रम् १८२)

१२. इति लोङ्चस्मृतिसायुज्याचार्यगुरोरानर्तकीयस्य ऋजुविमलस्य कृतौ मनुमीमांसायां द्वादशोऽ-ध्यायः । समाप्तं चेदं मानवं शास्त्रम् ।। (पत्रम् १८९)

**मातृकाविवरणम् -**

| | |
|---|---|
| ग्रन्थस्य नाम | - मनुस्मृतिः |
| मातृकाङ्कः | - अपरिहार्यायाः समस्यायाः कारणात् मातृकाङ्को न दत्तः । |
| कर्तृनाम | - मनुः |
| व्याख्याया नाम | - मनुशास्त्रविवरणम् अथवा मनुमीमांसा । |
| व्याख्याकर्तुर्नाम | - भारुचिः, ऋजुविमलः । |

भाषाः - संस्कृतम्

लिपिः - तिगळारी

मापनम् - ५० X ६.५ से.मी.

पत्रसङ्ख्या - १८९

प्रतिपत्रं पङ्क्तिसङ्ख्याः - १४

प्रतिपङ्क्ति अक्षरसङ्ख्याः - ७६

समग्रा असमग्रा वा - समग्रा

स्थितिः - साधारणी

लेखनतिथिः - आनन्दसंवत्सर शिशिरर्तौ उत्तरायणे फाल्गुनमासे कुम्भनक्षत्र (राशि ?) दशमी शुक्लपक्षे भृगुवासरे

लेखकस्य नाम - विठ्ठलः

लेखनं स्पष्टं वा अस्पष्टं वा - अत्यन्तं स्पष्टम् ।

लेखनं शुद्धं वा अशुद्धं वा - नातीव शुद्धम् । पौनः पुन्येन भाषाप्रमादा गोचरीभवन्ति ।

प्रथमपत्रे प्रान्तभागे एवं लिखितम् - बाळेकुद्रुमठद नरसिंहभण्डारद पुस्तक

**उपक्रमः -**

स्वस्ति श्रीगणाधिपतये नमः । अविघ्नमस्तु ।
प्रशासितारं परमं परेषामनादिमादि भुवनत्रयस्य ।
हिरण्यगर्भं प्रणिपत्य मूर्ध्ना स्मृतेरहं व्याकरणं करिष्ये ।
स्वायम्भुवानुशिष्टं च मनुं स्वायम्भुवं तथा ।
यस्य प्रसादाल्लोकोऽयं धर्मचक्षुरजायत ।
तच्छिष्यं च भृगुं येन व्याख्यातमिदमादितः ।
अनुज्ञातेन मनुना सर्वप्रत्यक्षदर्शिना ।
तच्छिष्यशिष्यानन्यांश्च सर्वशास्त्रकृता(त)श्रमान् ।
यैरियं वेदशास्त्रज्ञैर्व्याख्यात(ता) कर(रु)णात्मभिः ।
अविज्ञानादविज्ञाय धर्मशास्त्रमहोदयम् ।
(ग्र)न्थे तदिति वा कृत्वा दुर्बोधमिति वा पुनः ।
दृष्टिभेदेन वा भेदं व्याख्यातं यैरपण्डितैः ।

सम्यगश्रुतशास्त्रार्थैरर्थवादविमोहितैः ।
प्रत्यादेशाय सर्वेषां तेषामुन्मार्गगामिनाम् ।
धर्मप्रीत्या च सततमिदं वक्ष्यामि तत्त्वतः ।
रमणीयं विचारं च विचित्रार्थं निराकुलम् ।
सततं को न विब्रूयात् पदवाक्यप्रमाणवत् ?

कोऽस्याभिसम्बन्धः ? अयमुच्यते -

पुरुषस्येष्टानिष्टभोगप्रयोजनैः शरीरेन्द्रियविषयैः संयोगवियोगरूपो जन्ममरणप्रबन्धपर्यायः संसारः धर्माधर्मनिमित्तो नानाज्ञानाधिकारहेतुको यथा केचिदाहुः । तौ च पुनर्धर्माधर्मावभिप्रेतानभि-प्रेतोपभोग-हेतुत्वात् पुरुषस्वोपादानपरिवर्जनार्हौ नित्यं भवतः । यथा लोके सुधादयो विषादयश्च तदुपपादानपरिवर्जनोपायनिश्चयज्ञानं च वेदस्मृतिशास्त्रप्रमाणं यथा विषयं न प्रत्यक्षानुमान-प्रमाणमन्यागमप्रमाणं वास्तवं च । यथैव वेदात् पुरुषस्य श्रेयोऽग्निहोत्रादि तदर्थानुष्ठानद्वारेणेत्यतो वेदागमैः श्रेयोऽर्थिभिः क्रियते, एवं स्मृतितोऽप्यष्टकादिकर्माचारानुष्ठानात्तस्योत्कर्षो यतस्तदधिष्ठाऽ-गमो(?)प्यादरणीयः । इदं धर्मशास्त्रमष्टकादिकर्माचरणानुष्ठानप्रतिपत्तिकारणमारभ्यते ।

**मनुमेकाग्रमासीनमभिगम्य महर्षयः । प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ।**

तत्र मनुर्नाम विशिष्टस्थानाधिकारकार्यनिवृत्ति(?)समर्थः पुरुषविशेषः । स्वायम्भुवोऽनन्यः । तथा च विशेषयि(इ)ष्यते । इदं शास्त्रं तु कृत्वा सावित्र्येवं च स्मृत्यन्तराणि मनुः स्वायम्वुवोऽब्रवीदिति ।

**उपसंहारः -**

इत्येतन्मानवं शास्त्रं भृगुप्रोक्तं परं द्विजः ।
भवत्याचारवान्नित्यं यथेष्टं चाप्नुयाद् गतिम् ।

प्रबोध्यमानोपत्य(?)माचारवान् भवत्यविनेयोऽपि कालान्तरेण । किं पुनं तिनेयो(नर्विनेयो) येनन्ये तेन सन्त्यपश्यन्ती(??) विफलं लोके दृष्टम् । तदनुष्ठाने चेष्टकामसिद्धिरस्य प्रायोणोत्तरकालत्वावश्यंभाविनी । शास्त्रस्य शक्यत्वादिति ।

हानोपादानविज्ञानसाधनम् । यतो दृष्टस्य सतः साक्षाच्छास्त्रं पुरुषार्थकस्मृतिं चेतः । भयं भवत्यविगृणम् । (?)

ओमस्मत् परमं ज्ञेयं परमार्थानुशासनम् ।
एवं च सति विज्ञेयमिदं सम्यक् (स)माधिना ।

परस्य श्रेयसो पारं वेदादपि विशेषतः ।
अधर्मपरिहाराय धर्मस्वीकरणाय च ।
न तर्कशास्त्रव्यापारः कश्चिदस्ति मनावापि ।
अदूरमपि गत्वैदे(?) देव सिद्ध्यति ।
इदं कार्यमकार्यं वा न नेयं (?) कथञ्चन ।
यदि द्रव्यं गुणादयश्च तथान्यत् कुशस्तयोः ।
पुरुषार्थं न पश्यामो विज्ञानपारलौकिकम् ।
अतानृभ्यः । (?)
परं तत्त्वं मन स्यात् (?) किं ततो भवेत् ।
यदीह नास्ति हानिः स्यात् पुरुषार्थस्य कस्यचित् ।
निदर्शनाय शास्त्रस्य सर्वं शास्त्रमनर्थकम् ।
पृथिव्यादिपदार्थानां ब्रह्मसद्भावदर्शनम् ।
दोषाय यदविज्ञानं यद्विज्ञानं गुणाय च ।
तत्रोपदेश(:)फलवान् दृश्यते लोकशास्त्रयोः ।
विनिन्द्यौ(?)मदरागेण भारुचिः ।
कृतवानिदं मनुशास्त्रागमोत्सवदो माहृदस्य (?)कृति(तिं) विना ।

**पुष्पिका :** इति लोडच्यस्मृतिसायुज्याचार्यगुरोरानर्तकीयस्य ऋजुविमलस्य कृतौ मनुमीमांसायां द्वादशोऽध्यायः । समाप्तं चेदं मानवं शास्त्रम् । शिवाय नमः । नरसिंहार्पणमस्तु ।

**उत्तरपुष्पिकाः -**

आनन्दाब्दे वर्तमाने शश्यर्तौ(शिशिरर्तौ ?)चोत्तरायणे ।
मासे फाल्गुनकुम्भर्क्षे दशम्यां शुक्लपक्षके ।
भृगुवारे च मध्याह्ने सर्वशास्त्रसमन्विता ।
मनुस्मृतिसर्वप्रायश्चित्तं लिखितं विठलस्त्विदम् ।
परगुणपरिदानप्रस्तुताऽशेषकृत्यम् ।
जितगुणकलिकाभिर्लोकमामोदयन्तः ।
अविदितपरदोषा ज्ञानपीयूषपूर्णाः
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

**वक्तव्यविशेषः** - यद्यपि मातृकागतः पाठो दोषदूर इति वक्तुं न शक्यते, परन्तु अस्य भाषापरिष्कारं सम्पाद्य झटिति प्रकाशनीयेयं अस्मिन् विश्वस्मिन् समग्राया भारुचिव्याख्या अस्यामेकस्यामेव मातृकायाम् उपलभ्यमानत्वात् ।

**संस्कृतभाषायाम् अनुवादयोग्यो ग्रन्थः**

मुम्मडिकृष्णराजओडेयर्नामको राजा मैसूरुराज्यस्य राजा आसीदिति प्रसिद्धमिदम् । टिप्पूसुल्तान् निधनानन्तरमेष राज्यभारं चकार (१७९९-१८६८) । परन्तु सदा ब्रिटिष्जनानाम् आधीन्यमासीदस्येति नितरां भूरि विषाद्यम् । सङ्गीतं, चित्रं साहित्यमित्यादिष्वनेकेषु विषयेष्वेतस्य महदेवासीत् कुतूहलम् । अनेकेषां विदुषां प्रोत्साहप्रद आसीदेषः । शताधिकाः कृतयोऽनेन विरचिता इति कथ्यते । केषाञ्चन कर्तृत्वमेतततप्रोत्साहितानां विदुषां स्यात् । परन्तु, स्वयं ग्रन्थकर्ता आसीदेष राजेत्यत्र न संशयः । एतत्कर्तृकत्वेन प्रसिद्धानां ग्रन्थानां मध्ये प्रायोऽत्र दर्शिता ग्रन्था वस्तुत एतेनैव रचिताः-

**१. संस्कृते-**

| | |
|---|---|
| १. गणितसङ्ग्रहः | २. गणेशरत्नमाला |
| ३. ग्रहणदर्पणः | ४. चामुण्डात्रिशति |
| ५. चामुण्डा(ण्डिका)लघुनिघण्टुः | ६. देवताध्यानमालिका |
| ७. नञ्जुण्डशतकम् | ८. महाकोशसुधाकरः |
| ९. महाविष्णुत्रिशती | १०. मृत्युञ्जयशतकम् |
| ११. रामकथापुष्पमञ्जरी | १२. रामकृष्णस्तोत्रम् |
| १३. शङ्करनारायणस्तोत्रम् | १४. श्रीराघवेन्द्रस्वाम्यष्टोत्तरशतनामस्तोत्रम् |
| १५. श्रीतत्त्वनिधिः | १६. सङ्ख्यारत्नकोशः |
| १७. सङ्ख्यारत्नमाला | १८. सूर्यचन्द्रवंशावतरणम् (सूर्यचन्द्रवंशानुचरितम्) |
| १९. सूर्यचन्द्रस्तोत्रम् | २०. स्वरचूडामणिः |

**२. कन्नडे -**

| | |
|---|---|
| १. अद्यात्मरामायणकन्नडटीका | २. अभिज्ञानशाकुन्तलदकन्नडटीका |
| ३. कृष्णकथारत्नाकर | ४. कृष्णकथासारसङ्ग्रह |
| ५. कृष्णराजवाणीविलास | ६. देवीमाहात्म्ये कन्नडविवरणे |
| ७. पञ्चतन्त्र | ८. भागवत कन्नडटीका |

९. भामाकथायां
१०. मालविकाग्निमित्रद कन्नडटीका
११. रामायणतात्पर्यदीपिकाटीका
१२. वत्सराजकथायां
१३. विक्रमोर्वशीयद कन्नडटीका
१४. शङ्करसंहिता कन्नडविवरणे
१५. शिवकथासङ्ग्रह
१६. सारसङ्ग्रहश्रीरामकथाकल्पवृक्ष
१७. सिरिनञ्जुण्डशतक
१८. सौगन्धिकापरिणय
१९. हरिश्चन्द्रोपाख्यानकन्नडटीका

एतेन राज्ञा विरचितः सौगन्धिकापरिणयः सुदीर्घैः वाक्यैर्गद्यकाव्यमिव भासते । अस्मिन् ग्रन्थे कथावस्तु मुम्मडिकृष्णराजेन स्वयं कल्पितम् । दुर्वाससा इन्द्रः कदाचित् शप्यते यत्फलत्वेन इन्द्रः सुगन्धराज इति नाम्ना कर्णाटके जायते । यद्यपि दुर्वाससा इन्द्रः शप्त इति कथा प्रसिद्धा । परन्तु तदन्तरकालिकं वस्तु न क्वापि प्रसिद्धम् । सुगन्धराजस्य शिक्षणं वर्णितम् । सौगन्धिकानाम्न्याः राजकुमार्याः स्वयंवरः कलिङ्गदेशे प्रचलति । अष्टदिव्यवस्तूनि य आहरति तमेव परिणेष्यामीति सौगन्धिका वदति । अन्यै राजकुमारैस्तानि दिव्यानि वस्तून्याहर्तुं न शक्यते । परन्तु सुगन्धराजस्तानि सर्वाणि वस्तून्यानयति, सौगन्धिकां परिणेष्यति च । कथावस्तु एतावदेव ! धर्मः, दर्शनं, योगः, ज्यौतिषं, कामशास्त्रं, सस्यशास्त्रं, प्राणिशास्त्रं, गजायुर्वेदः, खड्गविद्या, वृक्षायुर्वेदः, वापीकूपतटाकादिनिर्माणम् इत्यादिराजयोग्या विषया वर्णिता अत्र ।

अस्य ग्रन्थस्य संस्कृतानुवादः करणीया इति सूचयामि । परन्त्वस्य ग्रन्थस्य समग्रोऽनुवाद आवश्यको वा इति प्रश्न उदेति । वाक्यानि अत्रत्यानि अतीव दीर्घतमानि । कदाचिन्नीरसानि । तेषु बाणभट्टीया शैली नैवास्ति । विरसानां सप्रयोजनहीनानां दीर्घतमानां सर्वेषामपि अनुवादोऽनावश्यक इव । यत्र ज्ञानवर्धका विषया वर्तन्ते तत्र पूर्णमनुवादं कृत्वा अन्यत्र कथासारमात्रं दातुं शक्यत इति मम मनीषा । वैरस्यकराणामतीवदीर्घवाक्यानां विश्लेषणं कृत्वा सति चावश्यकत्वे वाक्यानेकत्वं सम्पादनीयम् । सौगन्धिकापरिणय एषः शिलायन्त्रे मुद्रित आसीत् । शिलायन्त्रमुद्रितस्यास्य कतिचन संस्करणान्युपलभ्यन्ते । केषुचन संस्करणेषु वर्णमयानि चित्राणि, केषुचन संस्करणेषु पुनर्वर्णरहितानि चित्राणि वर्तन्ते । संस्कृतानुवादे सर्वेषां चित्राणां (वर्णमयानां वर्णरहितानाम् उभयेषां) चित्राणां मुद्रणं करणीयमेव येन मुम्मडिकृष्णराज्ञानेन कुतूहलार्थं कृतानां चित्रमुद्रणप्रयोगाणां (experiments) विषये संस्कृतज्ञा अपि जानीयुः । मुम्मडीकृष्णप्रभुः स्वयं चित्रकलावेत्ता आसीदिति ज्ञायते ।

*****

# बौद्धदर्शने – ज्ञानस्वरूपम्

✍ डा.नारायणः
व्याख्याता, द्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**'सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिः'** इति समस्तसन्निकृष्टविप्रकृष्टलौकिकलोकोत्तरहेयोपादेयोपेक्षणीयार्थसिद्धिः सम्यग्ज्ञानेनैव भवति । तादृशसम्यग्ज्ञानव्युत्पादनाय समस्तशास्त्रप्रवृत्तिः । किन्तत् सम्यग्ज्ञानमित्याह-

**'अविसंवादकं ज्ञानं सम्यग्ज्ञानम्'** (न्या.बि.ध.टी.पु.सं.१०)

**प्रमाणमविसंवादि ज्ञानमर्थक्रियास्थितिः ।**
**अविसंवादनं शाब्देऽप्यभिप्रायनिवेदनात् ।।** (प्र.वा.प्र.परि.श्लो.३)

ज्ञानेऽविसंवादकत्वं कीदृशम् ? इत्याह अर्थक्रियास्थितिरेवाविसंवादकत्वं नाम । यच्च ज्ञानं प्रदर्शितार्थप्रापकं तत् सम्यग्ज्ञानम् । यच्च प्रदर्शितार्थाप्रापकं तत् मिथ्याज्ञानम् ।

केचन एवमभिप्रयन्ति वस्तुप्रदर्शकं ज्ञानमुत्पद्यते । समानवस्तु-विषयकज्ञानान्तरेण तस्मिन् वस्तुनि पुरुषप्रवृत्तिर्भवति । तदनन्तरज्ञानेन तमर्थं प्राप्नोति पुरुष इति एकस्मिन्नेवार्थे त्रयाणां ज्ञानानां प्रदर्शक-प्रवर्तक-प्रापकभेदेन प्रामाण्यमस्तीति ।

किन्तु बौद्धानामयमाशयः-अर्थाधिगतिरेव प्रमाणस्य मुख्यं फलम् । अर्थे चाधिगते पुरुषप्रवृत्तिर्भवति । प्रदर्शितार्थे यत् प्रवर्तकं तदेवार्थप्रापकं नान्यत् । एवं चार्थाधिगमात् समाप्तः प्रमाणव्यापारः । यतः स्वविषयनिश्चयजनकत्वं खलु प्रमाणव्यापारः । निश्चिते च विषये तावतैव पुरुषः प्रवर्तते । अतः न पुरुषप्रवृत्तौ द्वितीयादिज्ञानानां विशेषोपकारः। एवं प्रथमज्ञानसमानानां द्वितीयादिज्ञानानाम् अधिगतार्थगन्तृत्वान्न प्रामाण्यम् ।

एतच्च सम्यग्ज्ञानं 'अर्थक्रियानिर्भासम्' अर्थक्रियासमर्थे च प्रवर्तकम् इति द्विविधं भवति । अर्थक्रियानिर्भासं तु प्रत्यक्षं स्वत एवार्थक्रियानुभवात्मकं न तत्र परार्थक्रियाऽपेक्ष्यत इति तत्र प्रामाण्यं स्वतः । क्वचिद् अनभ्यासदशायां प्रामाण्यसन्देहे सति तत्रार्थक्रियाज्ञानाद् वाऽनुमानाद् वा प्रामाण्यं निश्चीयते । एवमर्थक्रियानिर्भासेन तु साक्षादर्थसिद्धिसद्भावान्न जनास्तत्र साशङ्काः भवन्ति । यच्च ज्ञानम् अर्थक्रियासमर्थे प्रवर्तकम्, न साक्षादर्थसिद्धिं प्रति कारणं तत्र च जनास्साशङ्काः भवन्ति । तदेव च ज्ञानं शास्त्रे परीक्ष्यते । (न्या.वि.ध.टी.पृ.सं.१४)

अर्थक्रियासमर्थे प्रवर्तकं तु ज्ञानं न साक्षादर्थप्राप्तिसाधकम् । तथा हि- पूर्वं सम्यग्ज्ञानं, ततः पूर्वदृष्टस्मरणं, स्मरणाद्रागः, रागात्प्रवृत्तिः, प्रवृत्तेश्च प्राप्तिः इति ।

यद्यर्थक्रियासाधनं प्रमाणं स्यात्तर्हि शब्दजनितज्ञानं कथं प्रमाणं स्यात्? इत्यत आह-

**'शाब्देऽप्यभिप्रायनिवेदनात्'** (प्र.वा.प्र.परि.श्लो.३)

अर्थक्रिया हि क्वचित् स्वरूपप्रतिपत्तिः क्वचिच्च ततोऽन्या व्यवहार-विषयरूपा । अतः शब्दस्यार्थप्रतिबन्धाभावान्न शाब्देन परमार्थक्रियाऽनुभूयते । किन्तु शब्देन अभिप्रेतार्थक्रिया व्यवह्रियते । तत्र शब्दस्य प्रामाण्यमिष्यतेऽनुमानत्वात् ।

**वक्तृव्यापारविषयो योऽर्थो बुद्धौ प्रकाशते ।**
**प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम् ।।** (प्र.वा.प्र.परि.श्लो.४)

वक्तुः व्यापारः विवक्षा । विवक्षायाः विषयो योऽर्थः श्रोतृबुद्धौ प्रकाशते, तत्रैव=श्रोतृबुद्धौ योऽर्थः प्रतिभासते तत्रैव शब्दः प्रमाणम् । न तु प्रतिपाद्यार्थप्रापकत्वेन तदर्थे प्रमाणम् । यः बुद्धौ प्रतिभातः अर्थः, स न तदाऽस्ति । तदर्थी च न तमर्थमाप्नोति इति न शब्दप्रामाण्यमर्थतत्त्व-निबन्धनम् । तस्माद् वक्तृव्यापारविषयो योऽर्थो बुद्धौ प्रकाशते स अध्यारोपित एव अनादिवासनाकल्पितो वा भवति ।

यद्यर्थक्रियास्थितिरेवाविसंवादित्वं 'सोऽयं घटः' इत्यादिप्रत्य-भिज्ञाऽपि प्रमाणं स्यात् । यतः 'सोऽयं घटः' इति ज्ञानानन्तरं प्रवृत्तः पुरुषः अवश्यं घटं प्राप्नोत्येव अतः तस्याप्यविसंवादित्वात् प्रामाण्यमस्त्येव । परन्तु प्रत्यभिज्ञायाः विकल्पपूर्वकत्वात्प्रामाण्यं नेष्टम् ।

सोऽयं घटः इत्यत्र तत्पदार्थेदंपदार्थयोरेकत्वं बोध्यते । तच्चैकत्वं पूर्वोत्पन्नेन 'अयं घटः' इति ज्ञानेनैवावगतम् । तच्चेदानीं पुनरनुसन्धीयत इति गृहीतग्रहणरूपत्वान्न प्रमाणम् ।

यथा इन्द्रियसन्निकर्षजं निर्विकल्पकम् अविसंवादित्वात् प्रमाणं तथा प्रत्यभिज्ञारूपं ज्ञानम् इन्द्रियार्थसन्निकर्षजेन निर्विकल्पकेन ज्ञातं सत् अविसंवादि दृष्टं कथं तस्याप्रामाण्यम् ? अत आह-

**गृहीतग्रहणान्नेष्टं सांवृतं धीप्रमाणता ।**
**प्रवृत्तेस्तत्प्रधानत्वाद् हेयोपादेयवस्तुनि ।।** (प्र.वा.प्र.परि.५)

यज्ज्ञानम् उपादेयेऽर्थे प्रवर्तकं निवर्तकं च हेयात् तदेव प्रमाणम् । एवं प्रवृत्तौ निवृत्तौ वा

अर्थज्ञानमेव प्रधानं भवति । अभ्याससत्वे केवलं चक्षुरादिना प्रथमोत्पन्नज्ञानादेव विकल्पमन्तरेणाऽपि प्रवृत्तिर्भवति । क्वचिदनभ्यासदशायां विकल्पादेव । अनभ्यासदशायां प्रत्यभिज्ञानादिकं प्रवर्तनात् प्रमाणम् । प्रत्यभिज्ञायाम् अयमिति प्रत्यक्षेणैव पुरुषः प्रवर्तते । अतः तदेव प्रमाणम् । स इति स्मृतिरूपत्वान्न तदंशस्य प्रामाण्यम् । एवं प्रत्यभिज्ञायां ज्ञानद्वयं स्वीक्रियते ।

प्रवृत्तौ ज्ञानमेव प्रधानम् । तथाऽपि न ज्ञानं प्रवर्तनात् । प्रमाणमित्युच्यते, कदाचित् ज्ञाने सत्यपि प्रवृत्तिर्न भवति परन्तु अर्थतथाभावं तु तत्र भवत्येव । तच्च ज्ञानं प्रमाणमेवेष्टम् । अतः प्रतिपत्तिकारणत्वात् प्रवर्तनयोग्यत्वाद् ज्ञानं प्रमाणमुच्यते । प्रवर्तनयोग्यत्वं पुनः न प्रतिपत्तितः भिन्नमिति ज्ञानमेव प्रमा (साध्यं), प्रमाणं च (साधनं च) ।

विषयाकारभेदेन प्रतिपत्तिरपि भिद्यते । यतः ज्ञानस्य विषयाकारत्वात् । विषयाकार इव आकारः यस्य, विषयाकारं ज्ञानम् । ज्ञानगतविषयाकार एव प्रामाण्यप्रयोजको भवति । अतः स विषयाकारः ज्ञानस्वरूपमेवेति ज्ञानमेव प्रमाणम् । नेन्द्रियाणि न तत्सन्निकर्षः ।

यदि कारका अपि चक्षुरादयः न प्रमाणं, तर्हि ज्ञानगतविषयाकारोऽपि न प्रमाणं स्यात्, इत्याह-

**विषयाकारभेदाच्च धियोऽधिगमभेदतः ।**
**भावादेवास्य तद्भावे स्वरूपस्य स्वतो गतिः ।।** (प्र.वा.प्र.परि..६)

विषयाकारसद्भावे एव विषयाधिगतिः नान्यथेति विषयाधिगमे विषयाकारस्य साधकत्वमत्वं प्रतीयते । सर्वत्रेन्द्रियप्रत्यक्षे इन्द्रियादिकं साधनमेव । किन्तु तत्तद्विषयाधिगमे तत्तद्विषयाकारे एव साधकतमत्वमिति, स च विषयाकारः ज्ञानस्वरूपमिति ज्ञानमेव प्रमाणं प्रमा च भवति । 'चक्षुषा पश्यति रूपम्' इत्यादिव्यवहारस्तु औपचारिक एव । ज्ञानस्वरूपं तु स्वतः ज्ञायते ।

**प्रामाण्यं व्यवहारेण**

अविसंवादित्वरूपं प्रामाण्यं न ज्ञानस्वरूपमेव । तथा सति ज्ञाने तत्प्रामाण्यमपि ज्ञातमेवेति न परीक्षावकाशः । अर्थक्रियास्थितिरेव प्रामाण्यम् । अर्थक्रियास्थितिस्तु ज्ञानोत्तरकालभाविनी । अतः ज्ञाने सत्यपि तत्प्रामाण्यं न गृहीतमिति तत्परीक्षणीयं भवति तदुक्तम्-

**प्रामाण्यं व्यवहारेण शास्त्रं मोहनिवर्तनम् ।**
**अज्ञातार्थप्रकाशो वा स्वरूपाधिगतेः परम् ।।** (प्र.वा.प्रपरी.७)

अग्निज्ञाने सति तस्य प्रामाण्यं न स्वतः ज्ञायते । किन्तु तदुत्तरकालभाविन्या दाहपाकाद्यर्थक्रियया

एव तत्प्रमाण्यं गृह्यते । यद्येवं ज्ञानोत्तरकालभाविन्याऽर्थक्रियया ज्ञानप्रमाण्यं गृह्यते इति स्यात् तर्हि ज्ञानस्य क्षणिकत्वाद् अर्थक्रियास्थितिकाले तज्ज्ञानमेव विनष्टमिति अर्थक्रियास्थित्या कुत्र प्रामाण्यं गृह्यते ? इत्यत आह 'सांव्यावहारिकमेव प्रमाण्यं' संव्यवहारश्च विचार्यमाणे विशीर्यते । एवं प्रतिपादयता एकमेव स्वसंवेदनं प्रत्यक्षमित्युक्तं भवति । तस्मादुक्तम्-

**'व्यवहारपरामर्शाच्छास्त्रं मोहनिवर्तनम् ।'** (प्र.वा.भाष्य.वार्ति.अ.२२३)

अत एव सर्वज्ञोक्तेन शास्त्रेणैव मोहनिवर्तनं नान्येनेति सर्वज्ञज्ञानमेव प्रमाणं नापरमिति परमार्थः । अत एवोक्तम् 'अज्ञातार्थप्रकाशो वा प्रमाणम्' अर्थाद् अज्ञातपरमार्थप्रकाशकं प्रमाणमिति प्रमाणलक्षणम् । अनेन द्विचन्द्रादिप्रत्ययस्य शुक्तिरजतादिप्रत्ययस्य गृहीतग्रहणात्मकस्य स्मरणादिकस्य च प्रामाण्यं वारितं भवति ।

'सांव्यावहारिकं प्रमाणज्ञानं द्विविधम्-

**मानं द्विविधं विषयद्वैविध्यात् शक्त्यशक्तिनः ।**
**अर्थक्रियायां केशादिर्नार्थोऽनर्थाधिमोक्षतः ।।** (प्र.वा.द्विपरि.१)

मेयस्य द्वैविध्यात् मानं द्विविधम् । लोके तु प्रत्यक्षानुमानवेद्यादपरं प्रमेयं नास्ति । शब्दादीनामर्थप्रतिबन्ध एव नास्ति । यत्तु प्रमेयाव्यभिचारि तत्प्रमाणम् । मेयाभावे प्रमेयाव्यभिचारित्वं कथं स्यात् ?

स्वलक्षणं सामान्यलक्षणश्चेति द्विविधं वस्तुतत्त्वम् । अत्र स्वलक्षणविषयं प्रत्यक्षम् । सामान्यलक्षणविषयमनुमानमिति प्रतिपाद्यते । यच्चान्यसदृशं सत् उपलभ्यते तत्सामान्यं सर्वव्यक्ति-साधारणत्वात्, यदसदृशं सत् उपलभ्यते तत्स्वलक्षणं सर्वतो व्यावृत्तत्वात् । अथ यदि कल्प्यमानमन्यसदृशं तत्सामान्यम् अथासदृशं तत्स्वलक्षणमेव ।

किञ्च यदा वस्तुतत्त्वं साक्षाज्ज्ञानजननं प्रति शक्तत्वेन प्रतीयते तदाऽसौ स्वेन रूपेण लक्ष्यमाणत्वात् स्वलक्षणम् । यदा तु पारम्पर्येण ज्ञानजनने शक्तं भवति तदा सामान्यरूपेणेति सामान्यलक्षणम् ।

भ्रमविषयस्य शाब्दादुपलब्धस्य च नार्थनिश्चायकशक्तिः साक्षाद्वा पारम्पर्येण विद्यत इति स न प्रमेयः । उक्तं च-

**सदृशासदृशत्वाच्च विषयाविषयतत्वतः ।**
**शब्दस्यान्यनिमित्तानां भावे धीसदसत्त्वतः ।।** (प्र.वा.द्विपरि.२)

शब्दस्य यः विषयः स सामान्यलक्षणम् । यस्त्वविषयः स स्वलक्षणम् । अयमर्थः शब्दस्यैव विषयः सामान्यम् । न तु यो यो शब्दस्य विषयः स सामान्यमेव । एवमविषयोऽपि न स्वलक्षणमेव । अपि तु अविषय एव स्वलक्षणम् । यतः शब्दविषयोऽपि कश्चिदनर्थः । शब्दाविषयोऽपि कश्चिदनर्थः ।

एवं विषयादन्येषां निमित्तानां भावे गुणसङ्ख्यासङ्केतादिविषया धीः यत्र प्रवर्तते स सामान्य-लक्षणमेव । यत्र तु विषयव्यतिरिक्तनिमित्ताभावे बुद्धिर्भवति सः स्वलक्षणमेव ।

यत् परमार्थसत् तत् स्वलक्षणमेव । यच्च संवृतसत् तत् सामान्यलक्षणम् । अर्थक्रियासमर्थमेव परमार्थसत् । असमर्थं च सांवृतम् । एवं यदसदृशं शब्दाविषयः अन्यनिमित्तभावेऽपि तज्ज्ञानाभावश्च तत् परमार्थसत् स्वलक्षणम् । यच्च सदृशं शब्दविषयः अन्यनिमित्तभावे बुद्धिविषयः तत् संवृत्तिसत् सामान्यलक्षणम् । एवं प्रमेयद्वयमनुसृत्य प्रमाणमपि द्विविधमेव भवति ।

**न प्रत्यक्षपरोक्षाभ्यां मेयस्यान्यस्य सम्भवः ।**
**तस्मात् प्रमेयद्वित्वेन प्रमाणद्वित्वमिष्यते ।।** (प्र.वा.द्विपरि.३)

**सम्यग्ज्ञानं द्विविधं प्रत्यक्षमनुमानं चेति ।** (न्या.बि.मु.र.३)

**स्वलक्षणे च प्रत्यक्षमविकल्पतया विना ।**
**विकल्पेन न सामान्यग्रहस्तस्मिंस्ततोऽनुमा ।।** (प्र.वा.द्विपरि.७५)

प्रत्यक्षं स्वविषयं नियतमर्थं दर्शयति । अनुमानं तु लिङ्गसम्बद्धं नियतमर्थं दर्शयति । नियतार्थ-प्रदर्शकत्वात् द्वेऽपि प्रमाणे । यथा प्रत्यक्षमनुमानं वा स्वोपदर्शितार्थप्रापकं न तथा संशयादिकं, नियतार्थस्यैवाभावात् ।

'इह कूपे जलम्' इति ज्ञानं न प्रत्यक्षं तत्र जलस्य परोक्षत्वात्, नानुमानं लिङ्गाभावात्, न संशयः कोटिद्वयाभावात्, न विपर्ययः विपरीतार्थाभावात्, एतदपि प्रमाणान्तरं किल ? इत्यत्राऽह नेदं प्रमाणमेव । नियतार्थाप्रदर्शकत्वात् । यद्यपीदं संशयलक्षणरहितं तथाऽपि संशयविकल्पं जनयत् संशयजातीयमेव । इह कूपे जलं स्यात् कदाचित् इत्यर्थकत्वान्न प्रमाणम् । यत्र तु 'इह कूपे जलम्' इति ज्ञानानन्तरं प्रवृत्तेन कदाचिज्जलं प्राप्यते तत्र जलप्रापकं ज्ञानान्तरमेवाङ्गीक्रियते ।

**प्रत्यक्षलक्षणम्-**

**प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिद्ध्यति ।**
**प्रत्यात्मवेद्याः सर्वेषां विकल्पो नामसंश्रयः ।।** (प्र.वा.द्विपरि.१२३)

**'प्रत्यक्षं कल्पनापोढमभ्रान्तम्'** (न्या.वि.सू.४)

अत्र प्रत्यक्षशब्दस्य 'अक्षाश्रितं ज्ञानं प्रत्यक्षम्' इत्यर्थः । 'प्रतिगतमक्षमिति प्रत्यक्षम्' गतिसमास एवाभिप्रेतः । न तु अक्षमक्षं प्रति प्रत्यक्षमित्यव्ययीभावसमासः । तथा सति 'प्रत्यक्षम्' इति नियमेन नपुंसकलिङ्गता स्यात्तस्य । 'प्रत्यक्षा बुद्धिः' 'प्रत्यक्षो घटः' इत्यादिप्रयोगा अपीष्टाः । अतोऽत्र गतिसमास एवाभिप्रेतः । गतिसमासे कृतेऽभिधेयवल्लिङ्गं लोकसिद्धं सिद्धम् । यद्यपि अर्थसाक्षात्कारित्वमेव प्रत्यक्षशब्दप्रवृत्तिनिमित्तम् अक्षाश्रितत्वं तु शब्दव्युत्पत्तिनिमित्तमेव । एकार्थसमवेतत्वेन (इन्द्रियज्ञाने 'अक्षाश्रितत्वम्' 'अर्थसाक्षात्कारित्वं चोभयमपि समवेत'मिति) द्वयोः अक्षाश्रितत्वार्थसाक्षात्कारित्वयोः प्रत्यक्षशब्दप्रवृत्तिनिमित्तत्वं सम्भवति । यद्यक्षाश्रितत्वमेव प्रवृत्तिनिमित्तं स्यात्तदा इन्द्रियज्ञानस्यैव प्रत्यक्षत्वं सम्पादितं भवति । न मानसज्ञानादिकस्य ।

विशेषणादिसम्बद्धवस्तुविषयकप्रतीतिः कल्पना । अर्थक्रियाक्षमे वस्तुरूपेऽविपर्यस्तम् अभ्रान्तम् । एवं पूर्वोक्तकल्पनया अपोढं - अपेतं (विकल्परहितं) अभ्रान्तं च यज्ज्ञानं तत् 'प्रत्यक्षम्' । कल्पनापोढ-मित्यनेन सविकल्पकं न प्रत्यक्षमिति अभ्रान्तमित्यनेन द्विचन्द्रादि-प्रत्ययः न प्रत्यक्षमिति विप्रतिपत्तिनिरासार्थमेव लक्षणद्वयम् ।

अभिलापसंसर्गयोग्यप्रतिभासप्रतीतिः 'कल्पना' । अभिलप्यतेऽनेनेति अभिलापः शब्दः । यस्यां प्रतीतौ भासमानः अभिधेयाकारः शब्दसंसर्गयोग्यः सा प्रतीतिः कल्पना । अनया च कल्पनया रहितं तिमिराशुभ्रमणनौयानसङ्क्षोभाद्यनाहितविभ्रमं ज्ञानं प्रत्यक्षम् ।

तिमिरमक्ष्णोर्विप्लवः । तेन केशोण्ड्रकादिभ्रमो भवति (इन्द्रियगतम्) अलातस्याशुभ्रमणेन चक्रभ्रमो जायते (विषयगतम्) । गच्छन्त्यां नावि स्थितस्य गच्छद्वृक्षभ्रमो जायते (बाह्याश्रयस्थितं) । वातपित्त-श्लेष्माणां सङ्क्षोभेन ज्वलितस्तम्भादिभ्रमो जायते । (अध्यात्मगतं) एवमादिभ्रमकरणैः आहितो विभ्रमो यस्मिन् आहितविभ्रमं तत् न भवतीति अनाहितविभ्रमं ज्ञानं प्रत्यक्षम् ।

प्रत्यक्षं कल्पनापोढमिति कथं ज्ञायते ? भ्रान्तत्वं तु प्रत्यक्षेणान्यथादर्शनाद् ज्ञायते । अर्थक्रिययाऽभ्रान्तत्वमपि ।

१. न तावदनुमानं तस्य प्रत्यक्षपूर्वकत्वात् । परिशेषात्प्रत्यक्षमेव वक्तव्यम् । प्रत्यक्षं तावत् 'नीलो घटः' इत्याद्याकारकमेव सर्वानुभवसिद्धम् । तच्च नीलादिविकल्पसहितमेवेति सविकल्पकं कथं वा प्रत्यक्षस्य निर्विकल्पकत्वे प्रमाणं स्यात् ?

२. किञ्चेन्द्रियेणार्थसन्निकर्षे प्रथममालोचनात्मकं निर्विकल्पकमेवार्थज्ञानमुपजायत इत्यङ्गीकारेऽपि द्वितीयादिक्षणे स्मरणादिसामग्रीवशात् सविकल्पकज्ञानोत्पत्तिरिति च । तदपि इन्द्रियव्यापारकालीनमेवेति प्रत्यक्षमेव भवति । तत्र कल्पनापोढत्वं नास्तीत्यव्याप्तिरेव प्रत्यक्षलक्षणे ।

निर्विकल्पकप्रत्यक्षे स्वसंवेदनप्रत्यक्षमेव प्रमाणम् । निर्विकल्पकप्रत्यक्षस्य निर्विकल्पकत्वं तेनैव प्रत्यक्षेणानुभूयत इत्यर्थः । यदुक्तं द्वितीयक्षणोत्पन्नं 'नीलो घटः' इत्यादिकं तत्तु विकल्पजन्यमेव । विकल्पः खलु ज्ञाने नामादिकं विषयीकरोति । स च विकल्पः मानसव्यापारः । एवं निर्विकल्पके चक्षुर्जन्यत्वं नामाद्यविषकत्वं चास्ति सविकल्पके च विकल्पजन्यत्वं नामाद्याश्रयत्वं चेति विरुद्धधर्माध्यासेन तयोर्भेदः अस्त्येव । यदप्युक्तं प्रत्यक्षं सर्वदा नामादिविषयकमेवोपजायत इति । तन्नेत्याह-

**संहृत्य सर्वतश्चिन्तां स्तिमितेनान्तरात्मना ।**
**स्थितोऽपि चक्षुषा रूपमीक्षते साऽक्षजा मतिः ।।** (प्र.वा.द्विपरि.१२४)

संहृतविकल्पावस्थायां चक्षुषा रूपज्ञानं यदुत्पद्यते तदेव निर्विकल्पकं प्रत्यक्षम् । एतदनन्तरं हि विकल्पोऽनुवर्तते । तत्र च पूर्वसंस्कार एव कारणम् । न निर्विकल्पकविषयः स्वलक्षणम् । तदाह-

**पुनर्विकल्पयन् किञ्चिदासीन्मे कल्पनेदृशी ।**
**वेत्ति चेति न पूर्वोक्तावस्थायामिन्द्रियाद् गतौ ।।** (प्र.वा.द्विपरि.१२५)

'एतच्च प्रत्यक्षं चतुर्विधम्- १. इन्द्रियप्रत्यक्षम् २. मानसप्रत्यक्षम्
३. स्वसंवेदनप्रत्यक्षम् ४. योगिप्रत्यक्षम्

**इन्द्रियप्रत्यक्षम्**

ज्ञानोत्पत्तिस्तावत् विषयाधीना भवति । अतः विषयेणैव हि व्यपदेश युक्तः । अतः प्रतिविषयमित्येव व्यपदेशो युक्तः । न हीन्द्रियेण जनितमित्येव प्रत्यक्षम् । विषयोऽपि कारणमेव । इत्यत्राऽह-

**समीक्ष्य गमकत्वं हि व्यपदेशो नियुज्यते ।**
**तच्चाक्षव्यपदेशेऽस्ति तद्धर्मश्च नियोज्यताम् ।।** (प्र.वा.द्विपरि.१८२)

विषयो हि मनोविज्ञानान्यसन्तानिकविज्ञानहेतुत्वात् साधारणः । इन्द्रियजन्यज्ञाने तु इन्द्रियमेवासाधारणकारणं तस्याऽश्रयं च भवतीति प्रत्यक्षमित्येव व्यवदेशो युक्तः । इन्द्रियाणि तज्जन्यं ज्ञानम् इन्द्रियप्रत्यक्षम् ।

**'मानसप्रत्यक्षम्'** (प्र.वा.द्विपरि.२३१)

**मानसं चार्थरागादि स्वसंवित्तिरकल्पिका ।** (प्रमाणसमुच्चय)

इन्द्रियज्ञानसमनन्तरमेव तत्समानविषये हेयोपादेयतां मनः गृह्णाति, एतदपि निर्विकल्पकमेव भवति ।

**'सर्वसंवेदनप्रत्यक्षम्'** (प्र.वा.द्विपरि.२४१)

रागद्वेषसुखदुःखादिकं चित्तचैतसिकधर्मांश्च विषयीकुर्वन् ज्ञानं स्वसंवेदनमुच्यते । रागादि-स्वरूपन्तु नान्यज्ञानगम्यं किन्तु तत्तज्ज्ञानगम्यमिति स्वसंवेदनमित्युच्यते ।

**योगिप्रत्यक्षम्**

चतुरार्यसत्यविषयकं योगिज्ञानम् । तच्च भावनामयमित्युच्यते । विशदावभासकारणत्वात् । एवं तेषां सर्वमपि ज्ञानं निर्विकल्पकं तस्य च स्वलक्षणमेव विषयः । अनुमानं तु स्वार्थानुमानं परार्थानुमानश्चेति द्विविधम् । तस्य विषयः । सामान्यलक्षणमेव ।

**मोक्षकारणीभूतज्ञानम्**

**स्थिरं सुखं ममाहं चेत्यादिसत्यचतुष्टये ।**
**अभूतान् षोडशाकारान् आरोप्य परितृष्यति ।।** (प्र.वा.प्रपरि.२७३)

चतुर्णामार्यसत्यानां सम्यग्ज्ञानमेव तु नैरात्म्यदृष्टिः इयं च स्थिराद्याकारतावरोधनी । यदा चतुर्षु आर्यसत्येषु चतुराकारता विनष्टा भवति स्वयं तृष्णा विनश्यति ।

**दुःखं संसारिणः स्कन्धा रागादेः पाटवेक्षणात् ।** (प्र.वा.प्रपरि.१४९)

रागादयः अभ्यासात् पञ्चस्कन्धैः संसारिणः दुःखं जनयन्ति । रागादीनामभ्यासस्तु सत्कायदृष्ट्या सम्भवति । सत्कायदृष्टिस्तु अज्ञानमूला । अविद्या च तृष्णमूला । तृष्णा च चतुरार्यसत्यानां सम्यग्ज्ञानेन निवर्तत इति नैरात्म्यदृष्टिरेव बहुधोपायैः सम्पादनीया ।

**तदत्र सिद्धान्तसंक्षेपः**

बुद्धस्य निर्वाणानन्तरं तत्पथपरिव्रजां भिक्षूणां सङ्घः क्रमशः बहुषु निकायेषु विभक्तमभूत् । तत्रैते चत्वारः प्रमुखास्सन्ति । वैभाषिकनिकायः, सौत्रान्तिकनिकायः, माध्यमिकनिकायः, योगाचारनिकायः इति । ज्ञानस्वरूपविषयेऽपि एषु निकायेषु विभिन्नाभिप्रायास्सन्ति ।

वैभाषिकाः ज्ञानग्राहकं मनः चित्तं वा मन्यन्ते । विषयसन्निकर्षेण इन्द्रियैर्यज्ज्ञानं प्राप्यते तज्ज्ञानं चित्ताय समर्प्य इन्द्रियाण्युपरतानि भवन्ति । बाह्यार्थस्य सत्वेऽपि क्षणिक एव सर्वोऽपि बाह्यार्थः । स्वलक्षण इत्येषां मतम् ।

सौत्रान्तिकाः बाह्यजगतः सत्तामनुमानेन प्रतिष्ठापयन्ति । सर्वस्यापि क्षणिकत्वाद् ज्ञानस्य च

विषयाकारत्वात् कथं वा प्रत्यक्षं वस्तुस्वरूपं सम्भवति ? अतः जगतः सत्ताऽनुमानेनैव ज्ञायते । एते ज्ञानं स्वसंवेदकमाहुः । एतच्च वैभाषिका अप्यङ्गीकुर्वन्ति । माध्यमिकाः पुनः सर्वशून्यवादिनः ।

योगाचाराः विज्ञानवादिनः ते वैभाषिकाणां नैरात्म्यवादं सौत्रान्तिकानां क्षणिकवादं माध्यमिकानां शून्यवादं च स्वीकृत्य स्वकीयं विज्ञानवादं प्रतिपादयन्ति । विज्ञानातिरिक्तं द्रव्यं नास्तीत्येषां मतम् । सर्वं विज्ञानाश्रितं विज्ञानादुत्पद्यते विज्ञाने लीयते तदेव विज्ञानमालयविज्ञानं देश-काल-स्थिति भेदेनानन्तभेदयुतमिदम् आलयविज्ञानम् । नात्र ज्ञातृ-ज्ञेययोः भेदोऽस्ति । अस्मिन् मतेऽष्टौ विज्ञानानि सन्ति चक्षुरादीन्द्रियविज्ञानानि चत्वारि । पञ्चमं कायविज्ञानम् । षष्ठं मनोविज्ञानम् । सप्तमं क्लिष्टमनोविज्ञानम् । अष्टमं चाऽलयविज्ञानमिति ।

योगाचारमते ज्ञानत्रैविध्यं स्वीकृतम् । परिकल्पितं ज्ञानम् । परतन्त्रं ज्ञानम् । परिनिष्पन्नं ज्ञानमिति ज्ञाने त्रैविध्यम् ।

१. स्वप्नावस्थायां प्राप्तं ज्ञानं परिकल्पितं भवति । तत्र विषयाणां कल्पितत्वात् । परिकल्पितं च ज्ञानं भ्रान्तिमात्रं यथा शुक्तौ रजतज्ञानम् ।

२. परतन्त्रज्ञानं नाम यज्ज्ञानं पूर्वज्ञानसापेक्षं तत्परतन्त्रम् । तस्य पूर्वज्ञानाधीनत्वात् । यथा भाविघटज्ञाने इदानीन्तनघटज्ञानं कारणम् अत भाविघटज्ञानं परतन्त्रम् । तत्र इदानीन्तनघटज्ञानस्य बीजरूपत्वात् । एतच्च व्यवहारमात्रं ज्ञानम् ।

३. यदा तु बीजरूपपूर्वज्ञानानि विलीयन्ते परं झटिति सर्वविषयज्ञानमुत्पद्यते चेत् तज्ज्ञातं परिनिष्पन्नमुच्यते । यच्च परिनिष्पन्नं तदेव पारमार्थिकं सत् यथा 'सर्वं बुद्धिमयं जगत् ।' एतत्तु योगेनैव सम्पादनीयम् । विज्ञानस्य कर्मसंस्कारैस्सह संयोगेनाविद्या, अविद्या-मूलको व्यक्तिभेदः, अविद्ययैव सर्वस्यापि भेदप्रपञ्चस्य प्रतीतिः । अतः नैरात्म्यदृष्टिः, सर्वशून्यताभावः, सर्वक्षणिकत्व-विज्ञानं च सम्यग्ज्ञानं तदेव च विज्ञानस्य शुद्धं रूपमिति बौद्धमतसङ्क्षेपः ।

नैरात्म्यदर्शनं च ग्राह्यग्राहकशून्यताधीमूलम् । तदुक्तं बुद्धेन- **'निःस्वभावः सर्वधर्म प्रकाशितः'** इति । एवं पञ्चस्कन्धा अपि अविद्योपाधिकाः न तात्त्विकाः । इत्येवमादिक्रमेण सम्यग्दृष्टिः सम्पादनीया । एवम् आत्मीयपदार्थेषु अविद्याकल्पितत्वेनाऽसत्वेऽवगते भोक्ताऽप्यात्मा नास्तीति नैरात्म्यदृष्टिर्जायते । तदुक्तम्-

**आत्मीयमेव यो नेच्छेत् भोक्ताऽप्यस्य न विद्यते ।**
**आत्माऽपि न तदा तस्य क्रियाभोगौ हि लक्षणम् ।।** (प्र.वा.प्रपरि.२५७)

*****

# काव्यप्रकाशाद्युक्तानि काव्यप्रयोजनानि

— डा. रङ्गनाथकट्टि
उपनिदेशकः, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

अयि मान्याः ! तत्रभवन्तः भवन्तः महान्तः जानन्त्येव यत् जगति विद्यमानासु सर्वासु भाषासु संस्कृतभाषैव मुख्या मधुरा चेति । यस्यां भाषायां देवाः दैनन्दिनं व्यवहारं कुर्वन्ति तस्याः महत्त्वं किं वर्णनीयम् ? तथा चोक्तं सुभाषितभाण्डागारे -

'भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती'[१] इति ।

गीर्वाणवाण्या अपि मधुरम् एकमस्ति चेत् जगति तत् काव्यमेवेति निश्चप्रचम् । यच्च दृश्य-श्रव्य-चम्पूभेदेन त्रिविधम् इति प्रथितम् । अस्मत्प्राचीनाः काव्याध्ययनेन वा शास्त्राध्ययनेन वा कालहरणं कुर्वन्ति स्म । तथा च श्रूयते -

'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्'[२] इति ।

काव्याध्ययनेन किमपि प्रयोजनं न भवति चेत्, अस्मत्पूर्वजाः काव्याध्ययने किमर्थं प्रवृत्तिं कुर्युः ? 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इत्युक्तेः । तस्मात् काव्येन तावत् केनापि प्रयोजनेन भाव्यमिति सर्वैरपि अभ्युपगन्तव्यमेव । किं तत् प्रयोजनम् ? अत्राऽह काव्यप्रकाशकर्ता मम्मटाचार्यः -

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।।[३]

**काव्यस्य षट्प्रयोजनानि -**

काव्यस्य तावदाहत्य षट्प्रयोजनानि भवन्तीति मम्मटाचार्योऽभिप्रेति । १. कीर्तिः २. धनप्राप्तिः ३. व्यवहारज्ञानं ४. शिवेतरक्षतिः - (शिवेतरस्य अमङ्गलस्य रोगरुजिनपापादेः अनर्थस्य निवारणम्) ५. सद्यः परनिर्वृतिः ६. कान्तासम्मितोपदेशप्राप्तिः

**१. कीर्तिः -**

काव्यप्रयोजनेषु प्रथमतया कीर्तिः परिगणिता मम्मटेन । काव्येन कीर्तिः सम्पादिता कविभिः । काळिदासादयः कवयः नैकानि अपूर्वकाव्यानि विरचय्य कीर्तिभाजोऽभवन् इति प्रसिद्धमेव ।

कालिदासस्य 'अभिज्ञानशाकुन्तलम्' इति नाटकेन, भवभूतेः 'उत्तरामचरितम्' इति नाटकेन, 'भासस्य 'स्वप्नवासवदत्ता' इति नाटकेन कीर्तिः सर्वत्र प्रसृताऽभूत् इति संस्कृतासाहित्यचरित्रे प्रसिद्धमेव ।

**२. धनप्राप्तिः -**

काव्यप्रयोजनेषु द्वितीयं प्रयोजनं धनम् । काव्यनिर्माणेनापारं धनमलभन्त कवयः । धावकनामा कविः रत्नावलीनामकं नाटकं विरच्य, श्रीहर्षनृपतेः सकाशादपारं धनमलभत इति विद्याचक्रवर्त्यादयः काव्यप्रकाशस्य व्याख्यातारोऽभिप्रयन्ति ।

**३. व्यवहारज्ञानम् -**

काव्यप्रयोजनेषु तृतीयं व्यवहारज्ञानम् । राज-मन्त्रि-गुरुप्रभृतीनां समुचिताचारप्रदर्शकं काव्यं भवति । तस्माद् राजादिगतोचिताचारज्ञानार्थं काव्यमेव शरणम् इति ज्ञेयम् ।

**४. शिवेतरक्षतिः -**

काव्यप्रयोजनेषु तुरीयतया शिवेतरक्षतिः मम्मटेन परिगणिता । 'शिवं भद्रं कल्याणं मङ्गलं शुभम्' इति अमरोक्त्या शिवशब्दो भद्रवाची । शिवेतरं नाम अमङ्गलं रोगाद्यनिष्टम् तस्य क्षतिः (नाशः) काव्येन भवति । मयूरनामकः कश्चन कविः कुष्ठरोगपीडितः सन् 'सूर्यशतकम्' इति सूर्यस्तवं विरचय्य सूर्यानुग्रहेण नीरोगी जातः इति काचन कथा संस्कृतसाहित्ये श्रूयते । कविर्मयूरः ऋतुस्नानं कृत्वाऽऽगच्छन्तीं स्वपुत्रीं दृष्ट्वा-

'एषा का स्तनपीनभारकठिणा मध्ये दरिद्रावती ।
विभ्रान्ता हरिणी विलोलनयना सन्त्रस्तयूथोद्गता ।
अन्तःस्वेदगजेन्द्रगण्डगलिता संलीलया गच्छति'
दृष्ट्वा रूपमिदं प्रियाङ्गगहनं वृद्धोऽपि कामायते ।।'[४]

इत्यादिश्लोकाष्टकेनाङ्गसौन्दर्यं वर्णयामास । तच्च संस्कृतसाहित्ये 'मयूराष्टकम्' इति प्रसिद्धम् । तदा कुपिता मयूरस्य पुत्री तं शशाप' तेन 'मयूरः कुष्ठरोगपीडितोऽभूत् । पश्चात् स सूर्यशतकेन सूर्यं स्तुत्वा तदनुग्रहेण कुष्ठरोगान्मुक्तोऽभूत् । अनेन रोगाद्यनिष्टनिवृत्तिः काव्येन भवतीति ज्ञायते ।

**५. सद्यः परनिर्वृतिः -**

काव्यप्रयोजनेषु पञ्चमतया परिगणिता 'सद्यः परनिर्वृतिः' मम्मटेन । इयं सकलप्रयोजनमौलिभूता

इति ज्ञेयम् । काव्याध्ययनसमनन्तरमेव काव्यामृतरसास्वादसमुद्भूतः विषयान्तरसञ्चाररहितः आनन्दोऽत्र सद्यःपरनिर्वृतिशब्देन विवक्षितः । एतादृशस्य उत्तमोत्तमस्याऽनन्दस्य प्राप्त्यर्थं काव्यमवश्यमध्येतव्यम् ।

**६. कान्तासम्मितोपदेशः**

काव्यप्रयोजनेषु चरमतया परिगणितः कान्तासम्मितोपादेशः । उपदेशस्तावत् त्रिविधः ।

१. प्रभुसम्मितोपदेशः २. मित्रसम्मितोपदेशः

३. कान्तासम्मितोपदेशश्चेति ।

तत्राऽद्यस्य प्रभुसम्मितोपदेशस्य उदाहणानि शब्दप्रधानानि वेदादिशास्त्राणि । तेषां प्रभुसम्मितत्वं च- यथा प्रभुः अनिष्टसाधने निष्फलेऽपि नियोजयति, तथा वेदोऽपि अनिष्टसाधने श्येनादौ, निष्फले सन्ध्यावन्दनादौ च नियोजति इति काव्यप्रकाशस्य मधुमतीटीकायां श्रीरविभट्टाचार्यविरचिताया-मुक्तम् । सुहृत्सम्मितोपदेशस्य निदर्शनम् - इतिहासपुराणादि । अर्थप्रधानानां तेषां सुहृत्सम्मितत्वं च तस्य (सहृदयस्य) हितसाधने एव प्रवर्तनादिति ज्ञेयम् ।

केचित्तु पुराणस्य शब्दप्राधान्यं, इतिहासस्य तु अर्थप्राधान्यम्' इति अभिप्रयन्ति । तथा चोक्तम्- 'पुराणं मानवो धर्मः साङ्गो वेदः चिकित्सितम् । आज्ञासिद्धानि चत्वारि.... ' (काव्यप्रकाश-व्याख्योदाहृत प्रमाणवचनम्) इति ।

कान्तासम्मितोपदेशस्योदाहरणं - काव्यम् । यथा कान्ता एकान्ते स्वकटाक्षवीक्षणेन, लावण्येन हावभावादिविलासैश्च स्वकान्तं वशीकृत्य उपदिशति तं सन्मार्गगामिनं च करोति, तथा काव्यमपि सरसताऽऽपादनेन अभिमुखीकृत्य 'रामादिवद् वर्तितव्यं, न रावणादिवत्' इत्युपदेशं सहृदयस्य विदधाति । अत्र सुहृत् - काव्ययोः इष्टोपदेशकत्वं यद्यपि समानम्, तथाऽपि स्ववशीकरणेन कान्तैव प्रकृष्यत इति, कान्तासम्मितकाव्यस्यापि प्रकृष्टत्वमिति ज्ञेयम्' एवं च सप्रयोजनत्वात् काव्यं सर्वैरध्येतव्यमिति सिध्यति' उक्तं चैतत् सर्वं मम्मटाचार्येण काव्यप्रकाशे प्रथमोल्लासे -

**'कालिदासादीनामिव यशः, श्रीहर्षादेः धावकादीनामिव धनम्, राजादिगतोचिताचार-परिज्ञानम्, आदित्यादेः मयूरादीनामिव अनर्थनिवारणम्, सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरम् आनन्दं, प्रभुसम्मितशब्दप्रधान-वेदादिशास्त्रेभ्यः, सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोः गुणभावेन**

**रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत् काव्यं लोकोत्तरवर्णनानिपुणकविकर्म, तत् कान्तेव सरसताऽऽपादनेन अभिमुखीकृत्य 'रामादिवत् वर्तितव्यं, न रावणादिवत्' इत्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम् ।। २ ।।**

अत्र - यशः, अर्थः अनर्थनिवारणं च द्वयोरपि कविसहृदययोः । व्यवहारज्ञानं, आनन्दः उपेदशश्च सहृदयस्यैव इति ज्ञेयम् ।

ननु कवेः कथं रसास्वादः सम्पद्यते ? यतस्तस्य काव्यार्थचिन्तनपरस्य सर्वदैव दुःखमग्नत्वात् । यदुक्तम्- 'कविरेव विजानाति कवेः काव्यपरिश्रमम्' इति न च वाच्यम् । कवेरपि भावकत्वलक्षणद्वितीयावस्थायां रसास्वादः सम्पद्यत एव । प्रथमकारकत्वावस्थायां तु भवतु वा दुःखम् ? परमार्थतः कविः भावकावस्थायां सहृदय एवेति, प्रीतिः सहृदयस्यैव इति ज्ञेयम् ।

**अन्यान्यालङ्कारिकैः उक्तानि काव्यप्रयोजनानि-**

विश्वनाथेन तु साहित्यदर्पणे काव्यप्रयोजनानि एवं न्यरूपि -

'चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ।।'[६] इति ।

चतुर्वर्गफलप्राप्तिर्हि काव्यतो 'रामादिवत् प्रवर्तितव्यम् न रावणादिवत्' इत्यादिः कृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतीतैव । उक्तं च भामहेन -

'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ।।'[७] इति ।

हेमचन्द्रः 'काव्यमानन्दाय यशसे कान्तातुल्यतयोपदेशाय' इति त्रीणि प्रयोजनान्याह । वामनस्तु 'काव्यं सत् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात्' इति प्रीति-कीर्त्याख्यं प्रयोजनद्वयमाह । प्रीतिर्नाम आनन्दः । कवेः कीर्त्याऽपि प्रीतिरेव सम्पाद्या । अतः सर्वाण्यपि प्रयोजनानि प्रीतावेवान्तर्भवन्तीति अभिनवगुप्तोऽभिप्रैति ।

ननु यदुक्तम् - काव्यतो 'रामादिवत् प्रवर्तितव्यं न रावणादिवत्' इत्येवंरूपेणोपदेशः इति, तत्कथं सङ्गच्छते ? तत्रैतस्य साक्षादुपदेशाभावादिति चेत् ? सत्यम् । यथा विद्यालये शिक्षकेण विहितो निजछात्रेषु गुणिनः पुरस्कारः, दोषिणश्च तिरस्कारोऽन्येष्वप्युपदेशतामाश्रयति, तथा

रामायणादिकाव्यमपि रामादीनामभ्युदयं रावणादीनां चानभ्युदयं निरूपयत् अन्येष्वपि रामादिवत् कर्तुं रावणादिवच्चाकर्तुमुपदेशतामाश्रयतीति तथाविधसाक्षादुपदेशाभावेऽपि न क्षतिरिति ज्ञातव्यम् ।

**END NOTES :**

१. सुभाषितभाण्डागारोदाहृतवचनम्

२. सुभाषितभाण्डागारोदाहृतवचनम्

३. काव्यप्रकाशः - उल्लास -१, श्लो.२

४. मयूराष्टकम्

५. मयूरकविः, चक्रवर्तिनः श्रीहर्षस्याऽस्थानविद्वानासीत्, कादम्बरीग्रन्थकर्ता बाणभट्टोऽस्य जामाता इति ऐतिह्यम् ।

६. साहित्यदर्पणः - प्रथमपरिच्छेदः - श्लो.१

७. साहित्यदर्पणोदाहृतवचनम् - प्रथमपरिच्छेदणोः

*****

# सम्बन्धविषये अद्वैतदर्शनस्य दायित्वम् इत्यत्र एका समीक्षा

- डा. शङ्करनारायण अडिगः
उपनिदेशकः, पूर्णप्रज्ञसंशोधनमन्दिरम

तत्र भवतां भवतां मानसमन्दिरगोचरीभूतोऽयमर्थः यद् आस्तिकदर्शनेषु द्वैताद्वैतविशिष्टाद्वैतानां महत्त्वपूर्णं स्थानमस्तीति । तत्र जीवब्रह्मणोरैक्यं प्रतिपादयद् अद्वैतदर्शनं भेदप्रतिपादकद्वैत-विशिष्टाद्वैतदर्शनाभ्यां विभिन्नं सत् स्वोपज्ञवैशिष्ट्योपेतमित्यत्र नास्ति कश्चित् सन्देहगन्धोऽपि । एतत्समयस्य प्रधानतत्त्वानि एकस्यां कारिकायामेवं सङ्गृहीतानि -

श्रीमच्छाङ्करदर्शने परशिवः सत्यो जगद् वै मृषा
भेदो हि व्यवहारतः परशिवस्यांशाः समस्ता अमी ।
तादात्म्यानुभवो हि मुक्तिरमला भक्तिश्च तत्साधनं
प्रत्यक्षादिकषट्प्रमाणमखिलाम्नायैकलक्ष्यः शिवः ।। इति ।

एतादृशमद्वैतदर्शनं सम्बन्धविषये द्वैतविशिष्टाद्वैतदर्शनाभ्यां न्यायदर्शनेन च विलक्षणपद्धत्या स्ववादसरणिं प्रतिपादयति ।

सम्बन्धाश्च संयोगसमवायस्वरूपादयः भवन्ति । तत्र प्रत्यक्षसिद्धस्य संयोगस्य विषये न केऽपि संशेरते । समवायस्य चातीन्द्रियत्वात् तत्रैव विवादः न्यायाद्वैतदर्शनयोः । एषा खलु नैयायिकानां विचारपद्धतिः ।

**समवायविषये नैयायिकानामाशयः**

अयुतसिद्धयोः सम्बन्धः समवायः । स च नित्यः एकश्च । ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थ-मपराश्रितमेवावतिष्ठते तौ अयुतसिद्धौ । यथा घटकपालौ, रूपघटौ इत्यादि । तथा च अपृथक्सिद्धयोः अवयवावयविनोः गुणगुणिनोः क्रियाक्रियावतोः जातिव्यक्त्योः विशेषनित्यद्रव्ययोश्च सम्बन्धः समवायः । तथा चोक्तं कारिकावल्यां विश्वनाथेन—

'घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ।।' इति । (का.प्रत्यक्षखण्ड.का.सं. ११)

अत्राद्वैतादर्शनानुसारेण प्रमाणाभावः एवं समर्थ्यते -

उत्पत्तिमतोः गुणगुणिनोः कश्चित् नित्यसम्बन्धोऽस्तीत्यत्र प्रमाणं नास्ति । तत्र न तावत् 'शुक्लो

घटः' इति प्रतीतिः प्रमाणम् । तस्य अभेदविषयत्वात् । नहि शुक्लघटयोः समवायरूप-भेदसमबन्धवत्त्वे तादृशप्रतीतिः युज्यते । भेदसम्बन्धवतोः दण्डपुरुषयोः 'दण्डः पुरुषः' इति सामानाधिकरण्यप्रतीत्यभावात् ।

नैयायिकाः समवायविषये अनुमानं प्रमाणतया उदाहरन्ति, तच्चानुमानं 'शुक्लो घटः' इति विशिष्टप्रत्ययः विशेषणविशेष्यसम्बन्धविषयः विशिष्टप्रत्ययत्वात् 'दण्डी पुरुषः' इति विशिष्टप्रत्ययवत् इति । परन्तु समवायसम्बन्धं विनाऽपि 'घटाभाववत् भूतलम्' इति विशिष्टप्रत्ययवत् क्लृप्तस्वरूपसम्बन्धेनैव अयं विशिष्टप्रत्ययः युज्यते । न च परस्परव्यावृत्तं स्वरूपं न विशिष्टप्रत्ययनियामकम् इति वाच्यम् । तथा सति अभावप्रत्ययेऽपि स्वरूपं सम्बन्ध इति न स्यात् ।

किञ्च, 'मृदा घटो जायते' इत्यस्य मृदेव घटाकारेण अवभासते इत्यर्थः । 'तन्तुभ्यः पटो जायते' इत्यस्य तन्तव एव पटाकारेण प्रतीयन्ते इति भावः । एवं च घटपटादादयो अवयविनः शशशृङ्गसमानाः । तेषामवयवेन सह समवायसम्बन्धः सर्वथा न युज्यते । सम्बन्धस्य सतोः पदार्थयोरङ्गीकार्यत्वात् । तदुक्तम् - विद्यासागरान्दपूर्णमुनीन्द्रेण न्यायकल्पलतिकायाम् -

शशशृङ्गादिकल्पस्य घटस्य स (१.स्वकारणसमवायः) न युज्यते ।
स्वहेतुसत्तासम्बन्धः सम्बन्धस्य सदाश्रयात् ।।(न्या. क.३.२) इति ।

**अयमेवाभिप्रायो आविष्कृतः शङ्करभगवत्पादाचार्यैः शारीरकभाष्ये -**

'न हि कार्यकारणयोः भेदः आश्रिताश्रयभावो वा वेदान्तवादिभिरभ्युपगम्यते । कारणस्यैव संस्थामात्रं कार्यम् इत्यभ्युपगमात्' (शा.भा.अ.१, पा.१. अ.३.सू.१७) इति ।

किञ्च समवायः समवायिभ्यां सम्बद्धः सन् विशिष्टबुद्धिनियामकः उत असम्बद्धः । न द्वितीयः । असम्बद्धत्वाविशेषात् पटेऽपि 'रूपी घटः' इति प्रत्ययः स्यात् । आद्ये तस्य समवायस्य सम्बद्धत्वनियामकोऽन्यः सम्बन्धः, तस्यान्यः सम्बन्धः कल्पनीय इति अनवस्थापत्तेः । ननु समवायिभ्यां समवायः नित्यसम्बद्ध एव प्रतीतिविषयो भवति । अतो नानवस्था इति चेत् तर्हि संयोगोऽपि संयोगिभिः नित्यसम्बद्ध एव गृह्यते इति वक्तुं शक्यते अतस्तत्र न समवायसिद्धिः ।

तथा हि - संयोगस्य संयोगिभ्यां न सम्बन्धान्तरम् अपेक्षेत । यथा समवायस्य समवायिभ्यां स्वरूपेणैव स्थितिः अनवस्थावारणाय कल्प्यते, तथा संयोगेऽपि कल्पने संयोगिनोः संयोगेन साकं

समवायकल्पनं व्यर्थं भवेत् । तस्माद् अतिरिक्तसमवायकल्पनं विनाऽपि गुणगुणिनोः स्वरूपेणैव स्थितिकल्पनेनैव सामञ्जस्ये समवायकल्पना न युक्ता ।

**न्यायमते क्वचित् स्वरूपस्य सम्बन्धत्वस्वीकारेण सर्वत्र तस्यैव सम्बन्धत्वापादनम् -**

किञ्च समवायेऽङ्गीकृतं सम्बन्धत्वं कीदृशम् ? नियामकत्वं तदिति चेत्, न । क्वचित् स्वरूपस्यापि नियामकत्वाङ्गीकारात् । 'सत्ता सती' इत्यादिप्रतीतिनियामकः कोऽपि सम्बन्धः तार्किकैः नाङ्गीक्रियते । सत्तैव स्वरूपतः तत्र नियामिका, इत्यभ्युपगमात् । अतः 'नियामकत्वं सम्बन्धत्वं' इति लक्षणं स्वरूपे अतिप्रसक्तम् । ननु स्वरूपमपि सम्बन्धे अन्तर्भवति अतो नातिव्याप्तिः इति चेत्, यदि कस्यचित् वस्तुनः स्वरूपस्य सम्बन्धत्वमभ्युपगम्यते तदा सर्वस्वभावस्यापि सम्बन्धत्वमङ्गीक्रियताम् ? स्वभावत्वाविशेषात् । तथा च द्रव्यादिस्वरूपाणामेव गुणादिषु सम्बन्धत्वमिति पक्षः स्थिरीकृतः स्यात् ।

**अद्वैतदर्शनानुसारेण सम्बन्धनिरूपणम्**

तत्र गुणगुणिनोः तादात्म्यमेव सम्बन्धः इति अद्वैतदर्शनम् । किं नाम तादात्म्यम् ? तादात्म्यं नाम नाभेदः । तथा सति द्रव्यगुणयोः धर्मधर्मिभावो नोपपद्येत । किञ्च अभेदस्य सम्बन्धत्वमेव न युज्यते । नापि तादात्म्यं नाम भेदसहचरिताभेदः, भेदाभेदौ वा । तयोरेकत्र एकदा स्वीकारे भावाभावप्रयुक्तविरोधः क्वापि न सिद्ध्येत् । मृदादिना घटादीनामभेदे मृदा घटोत्पत्तेरनुपपत्तिप्रसङ्गश्च स्यात् । ननु भेदोऽप्यस्ति । ततः उत्पत्तिर्युज्यते इति चेत् । तर्हि जायमानो घटः मृद्भिन्न एव सन् प्राङ् नाऽसीद् इति वाच्यम् । एवं च प्राग् असतः घटादेः पूर्वं सतो मृदादेर्भेद एव इति अभेदो मृद्घटयोः स्वीकर्तुं न शक्यते ।

तस्माद् अद्वैतमते विलक्षणं तादात्म्यं नाम सम्बन्धः । तदनुसारेण तादात्म्यं नाम भिन्नत्वे सति अभिन्नसत्ताकत्वम् । सत्तानवच्छेदकभेदवत्त्वमिति परमार्थः । रूपघटयोः 'भिन्नौ एतौ सन्तौ' इति प्रत्यक्षप्रतीत्यभावात् तन्निष्ठसत्तायां भेदः अवच्छेदको न भवति । एवं च रूपघटयोः सत्तानवच्छेदकभेदवत्त्वरूपतादात्म्यसम्बन्धो युज्यते । पटनिष्ठरूपस्य घटादिना च नायं सम्बन्धः उपपद्यते । तत्र 'भिन्नौ एतौ सन्तौ' इति प्रत्यक्षप्रतीतेः सद्भावात् सत्तावच्छेदकभेदवत्त्वमेव तयोरिति नायं सम्बन्धोऽन्यत्र अतिप्रसज्यते । अत्र गुणगुणिनोः विद्यमानो भेदः असन् इति परमतात्पर्यार्थ इति भावः ।

तथा च मृद्घटयोः भेदे विद्यमाने स मृन्निष्ठसत्तावच्छेदको न भवति । मृत्सत्त्वं विना घटस्यातिरिक्तसत्तायाः अभावात् । तथा च वेदान्ततत्त्वविवेके श्रीनृसिंहाश्रमिणा उक्तम् - 'मृद्घटः' इति भेदो विद्यमानोऽपि नात्मसत्तावच्छेदक इति असन्' । एवं च अद्वैतदर्शने इयं जिज्ञासा भवति ।

रूपस्य घटादिकं विहाय अतिरिक्तसत्त्वं नास्ति । तयोः भेदोऽपि असन् इति अद्वैतदर्शने तयोः अभेदाङ्गीकारे तात्पर्यं पर्यवस्यति । एवं च शुक्लरूपघटयोः भेदसम्बन्धानङ्गीकारे 'शुक्लः घटः' इति सामानाधिकरण्यप्रतीतिः नोपपद्येत । 'दण्डी' 'कुण्डली' इत्यादौ भेदसम्बन्धे सत्येव सामानाधिकरण्यप्रतीतिदर्शनात् । न च 'शुक्लः घटः' इति प्रत्ययः शुक्लरूपघटयोरभेदमात्रविषयकत्वेन सम्बन्धविषयकत्वाभावेऽपि युज्यते इति वाच्यम् । 'शुक्लः घटः' इति सामानाधिकरण्यव्यवहारस्य शौक्ल्याश्रयघटत्वाश्रययोरभेदाश्रयत्वेऽपि 'दण्डी देवदत्तः' 'कुण्डली देवदत्तः' इत्यादौ दण्डादेः देवदत्तेनेव शौक्ल्यस्य घटेन सम्बन्धमात्रावगाहित्वेन न तादृशप्रतीतेरभेदावलम्बनं युज्यते । अभेदावलम्बनेन तादृशप्रतीतिनिर्वाहे 'दण्डी देवदत्तः' इति प्रतीतेरपि दण्डदेवदत्ताभेदावलम्बनेन निर्वाहापत्त्या दण्डसंयोगो देवदत्ते न सिद्ध्येत् ।

न च 'दण्डी' इत्यत्र सम्बन्धार्थक- इनिप्रत्यययोगेन तस्य सम्बन्धावगाहित्वेऽपि 'शुक्लः घटः' इत्यत्र सम्बन्धार्थकप्रत्ययादर्शनात् न 'शुक्लः' इत्यादिप्रतीतेः सम्बन्धावगाहित्वमिति वाच्यम् ।

'शुक्लं अस्यास्तीति'त्यर्थे 'अर्शआदिभ्योऽच्'(पा.सू.५.२.१२७) इति अच्प्रत्ययविधानाद् अत्रापि सम्बन्धार्थकप्रत्ययसद्भावेन 'शुक्लः घटः' इत्यस्य 'घटस्य शौक्ल्यम्' इत्यभियुक्तव्याख्यानानुसारेण सम्बन्धावगाहित्वावश्यम्भावात् । अत्र सम्बन्धविषयकसामानाधिकरण्यप्रतीतिनिर्वाहाय अवश्यं तादात्म्यातिरिक्तो भेदसम्बन्धो गुणगुणिनोरङ्गीकार्यः आपतेद्वा ? इति जिज्ञासा अद्वैतसिद्धान्ते जायते ।

किञ्च यत्र केवलं अभेदः सन्, भेदः असन्, तत्र न सामानाधिकरण्यव्यवहारः । यथा 'घटः कलशः' इत्यत्र । अतः 'शुक्लः घटः' इत्यत्र अभेदमात्रमङ्गीकृत्य सामानाधिकरण्यव्यवहारः कथं सङ्गमनीयः ? अभेदेऽपि द्रव्यगुणयोः द्वैतमते इव भेदप्रतिनिधिरूपविशेषः कश्चनाङ्गीकार्यो भवति वा ? इति च जिज्ञासाऽस्ति ।

**समवायस्थधर्मेष्विव गुणादीनामपि विना समवायेन द्रव्यस्थत्वव्यवहारः -**

इदमपि आपादनं तार्किकाणामुपरि अद्वैतदर्शने कर्तुं शक्यते इति मन्ये ।

तार्किकैः समवाये अस्तित्वाभिधेयत्वसम्बन्धत्वादयो धर्मा अभ्युपगताः । ते तु समवायाद् न स्वरूपतः भिद्यन्ते । भेदे हि तेषां समवायेन सम्बन्धो वाच्यः । अन्यथा कथं तेषां तत्र व्यवहारः? न च तेषां समवायेन सम्बन्धो युज्यते । स च भवन् संयोगो वा समवायो वा स्यात् । नाऽऽद्यः । संयोगस्य गुणत्वेन द्रव्यमात्रवृत्तेः । न द्वितीयः । स्वस्यैव समवायत्वेन अभेदात् । यदि तैः धर्मैः साकं समवायस्य अभेदः तदा, कथं अपर्यायशब्दवाच्यत्वं, धर्मधर्मिभावः, 'समवायस्य अस्तित्वम्'- इत्यादिषष्ठीप्रयोगः, समवाये ज्ञातेऽपि तेषामज्ञातत्वं, समवायस्य एकत्वेऽपि तेषामनेकत्वम् इत्यादि युज्यते ? इति ।

किञ्च तादात्म्यं नाम सत्तानवच्छेदकभेद इति । तत्र सत्तावच्छेदकभेदाभावो वा सम्बन्धत्वेन अभिमतः तदनवच्छेदकभेदो वा । नाऽऽद्यः भेदाभावस्याभेदरूपत्वेन अभेदे धर्मधर्मिभावाद्यनुपपत्त्या तादृशतादात्म्यस्य सम्बन्धत्वाभावात् । सत्तानवच्छेदकभेदः सम्बन्धः इत्यपि पक्षो नोपपद्यते । घटपटयोर्भेदे सत्यपि विशिष्टप्रत्ययादर्शनेन भेदस्य विशिष्टज्ञाननियामकत्वाभावात् । 'सुवर्णं कुण्डलम्' इत्यादौ विशिष्टप्रत्यये भेदाप्रतीतेश्च, भेदस्य विशिष्टबुद्धिनियामकत्वं न युज्यते ।

अत्रेदमभिमतम् - 'पृथक्सत्त्वाप्रयोजको भेदः तादात्म्यम्' भेदश्च धर्मविशेष एव न अन्योन्याभावः । नञर्थानुल्लेखनेनापि 'शुक्लः पटः' इत्यत्र तत्प्रतीतेः । घटादौ अपि विभागाख्यविलक्षणधर्मविशेष एव भेदः ।

एवं च तार्किकमते अपृथक्सिद्धयोः समवायाख्यः धर्मविशेषः अङ्गीक्रियते । अद्वैतमते पृथक्सत्त्वाप्रयोजकभेदाख्यधर्मविशेषः तादात्म्यनामकः कश्चित् अभ्युपगम्यते इति नामान्तरेण समवायाङ्गीकारः आपतितो वा इति जिज्ञासा भवति ।

*****

# श्रीविद्याधिराजतीर्थीया विष्णुसहस्रनामव्याख्या

-डा. माधव एन्. पाण्डुरङ्गी
सहायकसंशोधकः, पूर्णप्रज्ञसंशोदनमन्दिरम्

## भारतं तद्वैभवं च-

अयमेव निरवधिकृपापयंपारावारः परमपुरुषः कृष्णद्वैपायनो वेदव्यासो वेदार्थस्य सुखप्रतिपत्त्यै वेदोपबृंहहणान्यनेकानि पुराणान्यन्यांश्च अनेकान् धर्मग्रन्थान् विरचय्य संसारसागरनिमग्नसर्वलोक-समुद्दिधीर्षया समस्तविद्यास्थानभूतमखिपुरषार्थबोधकं भारतं नाम इतिहासरत्नं रचयामास । यदेतत 'भारतः पञ्चमो वेदः' इति वेदवदखिलपुरुषार्थप्रतिपादकतया वेदसमानवैभवं प्रचकस्ति । धर्मार्थकाममोक्षेषु चतुर्ष्वपि पुरुषार्थेषु अत्रोक्ता एव अन्यत्रोक्ताः, अत्र अनुक्ता अन्यत्र नोक्ता सति अनन्यादृशमस्य माहात्म्यम् ।

तदुक्तम्- 'धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ !
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्'[१] ।। इत्यादिना ।।

## स्तोत्रवैभवम्

महर्षयोऽपि लोकान् उज्जिघृक्षयैव एतेषु पुराणेतिहासादिषु तत्र तत्र शैववैष्णवैनायक-सारस्वतादीन्यनेकानि स्तोत्राणि परिजगुः । स्तुतिभिश्च सर्वेऽपि तृप्यन्ति । लोके जनैः स्वस्वेष्टसम्पादनाय स्वाम्यादयः स्तूयमाना दृश्यन्ते । वेदेष्वति इन्द्रादस्तत्र तत्र स्तूयन्ते ।

तद्यथा—

'यद्याव इन्द्र ते शतꣳ शतं भूमीरुत स्युः ।
न त्वा वज्रिन् सहस्रꣳ सूर्या अनु न जातमष्ट रोदसी'[२] ।।

'त्वꣳ सोमासि सत्पतिः । त्वꣳ राजोत वृहिा ।
त्वं भद्रो असि क्रतुः''[३] ।। इत्यादि ।

देवताश्च स्तुत्यादिना प्रसन्नाः पुरुषान् तदभिलषितेन योजयन्ति इत्येतदपि- 'स एवैनं भूतिं गमयति'[४] । 'तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति'[५] । इत्यादि निगमेनैवावगम्यते ।

किञ्च स्तुत्या असाधारण्येन स्तूयमानस्य स्वरूपं सुपरिचीयते । चेतोऽवस्थितिश्च स्तुत्ये तत्स्वरूपपरिचयेनैव भवति । गुणैः सहस्रशः स्वरूपे निरूपिते स्तुत्यस्य असादारणपरिचयात् तत्सौख्यातिशयेन अन्यत्रानासक्तं चित्तं तत्रैव निलीयते । तदनुगुणतया क्रमशो विषयेभ्यो विनिवृत्तं मनःस्तुत्यैकनिष्ठं परिचिततदसाधारणस्वरूपतया पुनर्विषयेषु अनासक्तं न बाह्येषु प्रवर्तते । तदेवं क्रियासमभिहारेण अर्थानुचिन्तया नामावृत्तौ मनसो नामार्थे स्थैर्यं सम्भवति । तदत्र शिवविष्णु-देव्यादिपराण्यनेकानि स्तोत्राण्युक्तविधया मनसः स्तुत्यैकनिष्ठतापादनेन तत्तत्स्वरूपासाधारण-परिचयावहानि भवन्ति । तथा च सर्वमपि स्तोत्रजातं भगवदुद्देशेन क्रियमाणं मनसो भगवन्निष्ठतां सम्पादयत् भगवतः स्तोतृजनाभिमुखीकरणेन स्तोतुर्भगवत्कृपाविषयताम् आपादयति । जातायाश्च भगवत्कृपायां सर्वमपि स्तोतृमीहितं भगवान् स्वयमेव पूरयतीति महदिदं स्तोत्रमाहात्म्यम् ।

**विष्णुसहस्रनामस्तोत्रावतारः तत्प्राशस्त्यं च -**

तदिह विष्णुसहस्रनामस्तोत्रमपि भगवत्प्रीत्युद्देशेन विधीयमानं भगवदेकमनस्कस्य स्तोतुः भगवत्प्रियतमत्वापादनेन तम् अनन्यसाधारणैहिकामुष्मिकवैभवेन संयोज्य, अन्ते निरतिशयपरमानन्देन योजयति ।

तदुक्तमत्र फलश्रुतौ - 'युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः' इति ।

मन्त्रास्तद्द्रष्टारो महर्षयश्च एकैकमपि भगवतो विष्णोर्नाम तत्तत्फलविशेषसधकं, सर्वपलसाधकं च मन्वानास्तानि नामानि मन्त्रेषु पुराणेतिहासादिषु च ददृशुः परिजगुश्च ।

तदुक्तम् -

'ऋग्वेदे च यजुर्वेद तथैवाथर्वसामसु ।<br>
पुराणे सोपनिषदि तथैव ज्योतिषेऽर्जुन ॥<br>
साङ्ख्ये च योगशास्त्रे च आयुर्वेदे तथैव च ।<br>
बहूनि मम नामानि कीर्तितानि महर्षिभिः ।<br>
गौणानि तत्र नामानि कर्मजानि च कानिचित्'' ॥ इति ।

अत्रापि च 'ऋषिभिः परिगीतानि'[६] इति ।

भगवान् कृष्णद्वैपायनस्तु कृतत्रेताद्वापरयुगेषु क्रमेण ध्यानयजनार्चनैरायाससाध्यैः

यत्फलमवाप्यते तत्कलियुगे भक्त्या भगवन्नामकीर्तनेनैव अनायासेन सुखसाध्यं मन्वानस्तानि ऋषिपरिगीतानि सर्वादारणीयानि विशिष्य कलियुगजनिजुषां मनुष्याणाम् अत्यादरणीयानि सकलशास्त्रसारभूतविष्णुप्रतिपादकतया सारभूतभगवन्नामानि सहस्रनामस्तोत्रात्मना सङ्गृह्य सकलवेदपुराणेतिहाससाराकरेऽस्मिन् भारते अनुशासनपर्वणि निबबन्ध ।

सत्स्वपि अनेकेषु विष्णोर्मुक्तकनामासु अनायासेन सकलपुरुषार्थसाधकम् अखिलपापभयापहमिदं विष्णुसहस्रनामस्तोत्रं तेभ्यो वेदाधिकान्तमुक्तकनामभ्यो महत्तमं स्मर्यते ।

तदुक्तम्- 'विष्णोरेकैकनामानि सर्ववेदाधिकानि च ।
तेभ्योऽनन्तनामभ्यो अधिकं नामसहस्रकम् ।।' इति ।

अत एव आसेतुहिमाचलान्तर्वर्तिभिः अनेकैः आस्तिकमहाजनैः प्रत्यहं सायं प्रातः सन्ध्यात्रयेऽपि वा भगवतो विष्णोः प्रियचिकीर्षया स्तोत्रमिदं विशेषतः पठ्यते । तत्तत्फलाकाङ्क्षिभिश्च तदा तदा स्तोमिदं आवर्तयद्भिः स्वस्वेष्टसिद्धिरवाप्यत इति अनेकजनविदितं तथाऽनुभूतमद्याप्यनुभूयते च ।

**विष्णुसहस्रनामस्तोत्रस्य सर्वधर्मोत्कर्षः**

बहुलायाससाध्यदेशकालादिनियमान् एककारकसापेक्षश्रौतादिकर्माणां सहसैवानुष्ठातुम् अशक्यतया न सुखसाध्या ततोऽभ्युदयनिःश्रेयसावाप्तिः । भगवन्नामसङ्कीर्तनस्य तु यागहोमादाविव हिंसायाः, कायक्लेशस्य, ऋत्विगादिपुररुषान्तरस्य, चरुपुरोडाशादिद्रव्यनियमस्य, प्राचीनप्रवणादि-देशनियमस्य, दर्शादिकालनियमस्य च अनपेक्षितत्वात् द्रागेवानुष्ठातुं सुशकतया अनायासेनैव एतत्सहस्रनामकीर्तनतोऽभ्युदयनिःश्रेयसप्राप्तिः सुलभेति विज्ञायते ।

किञ्च बहुलायाससाधितमपि श्रौतस्मार्तधर्माजातं प्रामादिकापराधलेशतो न फलस्य कल्पते । भगवन्नामसु न तादृशं वैगुण्यापादकं किञ्चिदस्ति । भगवन्नामस्वपि सत्वस्वपि सन्निन्दादिनामापराधेषु-

'नामापराधयुक्तानां नामान्येव हरन्त्यघम् ।
अविनान्तप्रयुक्तानि तान्येवार्तकराणि च ।।'

इति पद्मपुराणवचनेन भगवन्नामसङ्कीर्तनस्यैव अनवरताभ्यासात् सन्निन्दादिनामापराध-निवारकत्वात् इतराभ्युदयनिःनेयससाधनापेक्षयाधिकतमत्वमविप्रतिपन्नमेव ।

**भगवन्नामस्मरणस्य प्रायश्चित्तोत्तमता-**

आयाससाध्यतपः कर्माद्यनेकेषु प्रायश्चित्तेष्वपि अनायाससाध्यभगवन्नामस्मरणस्यैव उत्कृष्ट-प्रायश्चित्तता स्मर्यते ।

'प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि च ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम्'[७] ।। इत्यादिना

'यस्य स्मृत्या च नामोक्त्या तपो होमक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।।'

इत्यादिना च भगवात्स्मरणतन्नामकीर्तनादेः तपोहोमादिसर्वधर्मसञ्जातन्यूनतापरिहारेण तेषां सकलगुणपूर्णतापादकत्वं स्पष्टमेव ।।

**विष्णुसहस्रनामस्तवपाठस्य सर्वधर्मश्रैष्ठ्यम्-**

'अयं गौः गवां श्रेष्ठः' इत्यादौ निर्धारणषष्ठ्यन्तपदसमभिव्याहारे श्रेष्ठदिशब्दैः एकस्य गोः सजातीय इतरसकलगवापेक्षया श्रैष्ठ्यप्रतिपादनवदत्रापि स्तोत्रे (श्लो.८)-

'एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ।।'

इति पूर्वोक्तश्रौतस्मार्तादिसकलधर्माणां मध्ये कः परम इति प्रश्नस्य प्रतिवचने 'एष सर्वधर्माणां अधिकतम' इति पूर्वोक्तसजातीय इतरसकलधर्मापेक्षया भक्त्या भगवन्नामकीर्तनरूपधर्मस्यैव अधिकतमत्वं कण्ठत एव अभिहितम् ।

जपयज्ञश्च हिंसाराहित्येन इतरसकलधर्मनियमराहित्येन च प्रवर्तते । अत एव सर्वधर्मोत्कर्षोऽस्य इत्यभिप्रायेणैव भगवता 'यज्ञानां जपयमोऽस्मि'[८] इत्यभिहितं गीतायाम् । तदेवमाद्यनेककारणैः। पूर्वं शान्त्यनुशानसपर्वणोरन्यत्र च तत्र तत्र प्रतिपादितदेशकालादिसापेक्षसकलधर्मापेक्षय एतत्सहस्रनामजपयज्ञस्य अनायाससाध्यत्वात् इतरसकलधर्माधिकतमत्वं निर्विवादमेव ।

**विष्णुसहस्रनामस्तवजपे भकतेरावश्यकता -**

अत्र 'यद्भक्त्या' इत्युक्त्या भगवति स्नेहरूपाभक्तिरपि आवश्यकी इत्युक्तं भवति । भक्तिस्तावद्भावव्युत्पत्त्या भक्तिर्भजनम् अन्तःकरणस्य भगवति निष्ठा, प्रीत्यतिशयरूपा वा ।

तदुक्तम्- ‘द्रुतस्य भगवद्धर्माद्धारवाहिकतां गता ।
सर्वेशे मनसो वृत्तिः भक्तिरित्यभिधीयते ।।’[९] इति ।

भज्यते- सेव्यते अनेन भगवदाकारमन्तःकरणं क्रियत इति करणव्युत्पत्त्या भक्तिशब्देन श्रवणकीर्तनादिसाधनं च अभिधीयते । अन्तःकरणस्य सदा भगवदाकारत्वमपि चिवद्रवीभावेनैव भवति । चित्तं हि जतुवत्स्वतः कठिनम् । जतुनस्त्वनन्तराग्निसंयोगं न द्रवीभावः । द्रवीभूतश्च अग्न्यादिना काकलादौ यत्र क्वापि वा संलग्नं तत्रैव दृढं निलीयते तदा भगवानपि तच्चित्तं स्वायत्तीकृत्य तादृशान्तःकरणयुतं भक्तं मृत्युसंसारसागरात् समुद्धरति ।

मृत्युर्हि बन्धकः । अविद्यापि स्वकार्यविषयद्वारैव पुरुषं बध्नाति । अतो विषय एवेन्द्रियद्वारा मनः स्वस्मिन् विशेषेण षिणोति-बध्नाति-बन्धको भवति । बन्धनार्थक ‘षिञ् धातोः’ उपसृष्टान्निष्पन्नस्य तदर्थकत्वात् । तत्तदिन्द्रियद्वारा विषयसम्बन्धात् द्रवीभूतं चेतो जतुवद्विषये निलीय विषयनाशे नश्यदिव सत् पुनर्विषयान्तरं गृह्णाति । तन्नाशे च पुनर्विषयान्तरमित्येवम् अनवरतोर्मिमालिसागरोपमासङ्ख्यविषयसम्बन्धात् पुनः पुनजायते, विषयनाशे नश्यति च इति विषयराग एव सदा विनाशशरीलः सागरोपमो मृत्युः ।

भगवांस्तु सच्चिदानन्दात्मकोऽविनश्वरः । अतस्तत्र मनोलये मनसो विनश्वरविषयसम्बन्धराहित्यात् सदा भगवदाकारमानसं भक्तं भगवान् पुनर्बन्धकविषयविमुखीकरणेन स्वात्मन्येवावस्तापयन्नचिरादेव मृत्युसंसारसागरात् समुद्धरति ।

तदुक्तं भगवता– ‘तेषामहं समुद्धर्ता मृत्युसंसारसागरात् । भवामि न चिरात् पार्थ मय्यवेशितचेतसाम्’[१०] इत्यादि । एतादृशभक्तिसाधनमपि श्रवणादिभेदेन नवविधम ।

तदुक्तम्— ‘श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । ‘अर्चनं वन्दनं दास्यं सख्यम् आत्मनिवेदनम्’[११] । इति ।

१. तत्र श्रवणं नाम सगुणस्य भगवतः शब्दादवगतिः तादृशशब्दस्य श्रोत्रेण ग्रहणं च ।

२. सगुणस्य बोधकशब्दस्योचच्चारणं कीर्तनम् ।

३. ‘स चैवंगुणः’ इत्याकारिका स्मृतिः स्मरणम् ।

४. विष्णुप्रतिमादिपादसम्बन्धिगृहलेपनादिकं विष्णुभक्तानां पादसंवाहनादि च पादसेवनम् ।

५. विष्णुप्रतिमादौ गन्धपुष्पाद्यर्पणरूपो विष्णुप्रीतिहेतुः श्रवणादिभिन्नो व्यापारः अर्चनम् ।

६. विष्णुप्रतिमादेः विष्णुभक्तानां च पूजाबहिर्भूतनमस्कारो वन्दनम् ।

७. दासस्येव परमेश्वरप्रीतिफलकत्वेन तस्मिन् सकलकर्मार्पणं दास्यम् ।

८. विश्वासो मित्रवृत्तिन्च सख्यम् । तत्राद्यः 'न मे भक्तः पशश्यति' इत्यादिभगवद्वाक्यविषयकः । द्वितीया तु बन्धुभावेन हिताशंसनरूपा ।

९. स्वस्वीयदेहादिसङ्घातस्य भगवदेकभजनार्थं भगवत्यर्पणम् आत्मनिवेदनम् ।

एव भगवद्गुणतत्कथाश्रवण-तत्कीर्तन-तत्स्मरण-तदीयालयादिशोधन-तद्भक्तपादवाहन-तदर्चन-तद्वन्दन-तद्दास्य-तदात्मनिवेदनरूपनवविधभक्त्या भगवत्परत्वमापादितस्य मनसः सर्वदा स्थिरतया तदाकारतैव परमभक्तिः ।

**भुक्तेर्योगादिसाधनेभ्योऽतिशयः -**

इयं च भक्तिर्योगादिसाधनेभ्यो विशिष्यते ।

तदुक्तं भागवते - 'नो साधयति मां योगो न साङ्ख्यं धर्म उद्धव । 'न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता'[१२] ।। इति ।

गीतायां च - 'न वेदयज्ञाध्ययनैर्नदानैः न च क्रियाभिर्न तपोभिरुग्रैः'[१३] इत्यादिना वेदाध्ययनादीनां भगवद्दर्शनसाधनत्वमपोह्य 'भक्त्या त्वनन्यया शक्यः'[१४] 'भक्त्या मामभिजानाति'[१५] इत्यादिना तद्दर्शने भक्तेः परमोपायता निरूपिता ।

**भक्त्या नामसभ्कीर्तनस्य सर्वधर्मोवमत्वोपसहांरः -**

अतश्च 'कलौ सङ्कीर्त्य केशवम्' इत्यादिवचनपर्यालोचनतया कलियुगे चेतसः स्थिरतया भगवदाकारतापादनपूर्वकभगवन्नामसङ्कीर्तनरूपार्चनस्यैव भगवत्प्रियतमत्वे मुख्योपायत्वावगमात्त् अयमुपायः श्रेयःकाङ्क्षिभिः श्रद्धया विधेयः । अनेन च भगवति वशीकृते भक्तपरायणो भगवानपि प्रह्लादादिकमिव भक्तमिमं 'न मे भक्त। प्रणश्यति'[१६] सत्युक्तरीत्या संसारसागरादुद्धृत्य सच्चिदाननन्दात्मकं स्वस्वरूपमनुभावयन् तस्मै नानाविधाः परमाश्चर्यकारीः सिद्धीश्च प्रदर्शयन् सर्वदैनं- 'निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः'[१७] इत्युक्तरीत्या निस्संशयं स्वलोके परमानन्देऽवस्तापयति । अत एवात्रापि– 'एष मे सर्वधर्माणां धर्माऽधिकतमो मतः । यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नर सदा' । इति सदा भगवदाकारतापन्नमनसा तन्नामसङ्कीर्तनमेव सर्वधर्मावमम् इति व्यक्तमभ्यधायि ।

**श्रीविद्याधिराजतीर्थाः -**

इयं च व्याख्या श्रीमद्विद्याधिराजतीर्थप्रणीता अत्र शोधिता । श्रीमद्विद्याधिराजतीर्थचरणाश्च श्रीमन्न्यायसुदाप्रबन्दप्रणयनेन विदितविभवानां समस्तपरमहंसपरिव्राजकाचार्य समाराधित-कमनीयचरणानां श्रीमज्जयतीर्थपूज्यचरणानां विनेयप्रवराः । एभिः विरचिता भगवद्गीताव्याख्या मुद्रिता समुपलभ्यते । इयं च व्याख्या श्रीमध्वभगवत्पादाचार्यप्रणीत सर्वमूलग्रन्थस्थ-पदनिर्वचनोपजीविनी निरुक्तनिघण्ड्वादिप्रदर्शितरीत्या नैकविधनिर्वचनपटीयसी विराजितेतमाम् ।

**END NOTES : (30.11.2019)**

१. म.भा.स्वर्गा.प, ५.४४
२. तं.सं. २.४.१४
३. तं.सं. ४.३.१३
४. तं.सं. २.१.१
५. तं.सं. २.५.४
६. विष्णु.स. १३
७. वि.पु.२.६.३९
८. भ.गी.१०.२५
९. भक्तिरसा, श्लो.३
१०. भ.गी.१२.७
११. श्रीभाग. ७.५.२३
१२. श्रीभाग. ११.१४.२०
१३. भ.गी. ११.४८
१४. भ.गी. ११.५४
१५. भ.गी. १८.५५
१६. भ.गी. ९.३१
१७. भ.गी. १२.८

*****

# अद्वैतमतानुसारेण समवायखण्डनम्

- डा. श्रीकान्तबायरि
सहायकसंशोधकः, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

'रूपी घटः' 'मृद् घटः' शुक्लो घटः' इत्यादौ सामानाधिकरण्यप्रतीतिरनुभूयते । तत्र गुणगुणिनोः अवयवावयविनोश्च अत्यन्तभेदे तयोः समवायरूपभेदसम्बन्धवत्त्वे सा प्रतीतिर्न युज्यते । न हि भेदसम्बन्धवतोः दण्डपुरुषयोः 'दण्डः पुरुषः' इति प्रतीतिरस्ति ।

किञ्च समवायः समवायिभ्यां सम्बद्धः सन् विशिष्टबुद्धिनियामकः उतासम्बद्धः ? नाऽद्यः । तत्राप्यन्यसमवायरूसम्बन्धः कल्पनीय इति अनवस्थापत्तेः । ननु समवायिभ्यामयं समवायः नित्यसम्बद्ध एव प्रतीतिविषयो भवति । नातोऽनवस्था इति चेत् तर्हि संयोगोऽपि संयोगिभिः नित्यसम्बद्ध एव गृह्यते इति वक्तुं शक्यत्वात् तत्रापि सम्बन्धान्तरं नापेक्षणीयं स्यात् । यथा समवायस्य समवायिभ्यां स्वरूपेणैव स्थितिः अनवस्थाप्रसङ्गेन कल्प्यते, तथाऽत्रापि समवायनामकसम्बन्धान्तरकल्पनं विनाऽपि स्वरूपेण स्थितिकल्पनेनैव सामञ्जस्ये समवाय-स्थितिकल्पना न युक्ता । तस्माद् रूपघटयोः तादात्म्यमेव सम्बन्धः ।

द्वितीये असम्बद्धत्वाविशेषात् असम्बद्धेन पटेनापि रूपी घटः इति प्रत्ययः स्यात् ।

'सम्बन्धत्वम्' (खण्डनखण्डनखाद्यकर्ता श्रीहर्षः)

'नियामकत्वं' तदिति चेत् न स्वभावस्यापि क्वचित् नियामकत्वाङ्गीकारात् । सत्ता सती सत्तादिप्रतीतिनियामकः कोऽपि सम्बन्धः नाङ्गीक्रियते । सत्तैव स्वरूपतः तत्र नियामिका इत्यभ्युपगमात् । अतः 'नियामकत्वं सम्बन्धत्वं' इति लक्षणं स्वरूपेऽतिप्रसक्तम् । स्वरूपमपि सम्बन्धेऽन्तर्भवति अतः नातिव्याप्तिः इति चेत् यदि कस्यचित् वस्तुनः स्वरूपस्य सम्बन्धत्व-मभ्युपगम्यते, तदा सर्वस्वभावस्यापि सम्बन्धत्वं अभ्युपगम्यताम् स्वभावत्वाविशेषात् ।

१. गुणगुण्यादीनां अत्यन्तभेदः व्यवहारभेदरूपप्रमाणसिद्धः । अन्यथा स्तम्भकुम्भादीनामत्यन्त-भेदो न स्यात् । अत्र गुणगुण्यादिषु भेदसाधकः, तन्तुषु पटः 'पटे रूपम्' 'घटे कर्म' 'गवि गोत्वम्' इति व्यवहारः । स च भिन्नसम्बन्धमन्तरेण नोपपद्यते । यथा 'इह कुण्डे बदराणि' इति प्रतीतिः । सा च संयोगपूर्विका ।

२. 'इह घटे रूपं' इत्यादिविशिष्टप्रत्ययः (स्वरूपातिरिक्त) सम्बन्धपूर्वकः, अबाधितविशिष्ट-

प्रत्ययत्वात् 'दण्डी पुरुषः' इति विशिष्टप्रत्ययवत् इति समवायानुमापकमनुमानम् । अस्यानुमानस्य 'तन्तुपटयोः समवायः' इति विशिष्टबुद्धौ व्यभिचारः । तत्रापि समवायतन्तुपटयोरतिरिक्तसमवायः अङ्गीकरणीयः स्यात् । नात्राभ्युपगम्यते अतः अनैकान्तिकता इति नैयायिकमते व्यभिचारः वेदान्तिभिः बोध्यते । परन्तु तत्र वेदान्तिना तन्तुपटयोः समवायः सिद्धो न वा । सिद्धश्चेत् समवायसिद्ध्या सिद्धं नः समीहितम् । असिद्धश्चेत् नानैकान्त्यम् ।

तार्किकैः समवाये अस्तित्वाभिधेयत्वसम्बन्धत्वादयोः धर्माः अभ्युपगताः । ते तु समवायाद् न स्वरूपतः भिद्यन्ते । भेदे हि तेषां समवायेन सम्बन्धो वाच्यः । अन्यथा कथं तेषां तत्र व्यवहारः । न च सम्बन्धो युक्तः । स च भाविसंयोगो वा समवायो वा स्यात् । नाऽद्यः संयोगस्य गुणत्वेन द्रव्यमात्रवृत्तेः । न द्वितीयः स्वस्यैव समवायत्वेन अभेदात् । यदि तैः धर्मैः साकं समवायस्य अभेदः तदा कथं अपर्यायशब्दवाच्यत्वम्, धर्मधर्मिभावः, षष्ठीप्रयोगः, समवाये ज्ञातेऽपि तेषामज्ञातत्वं, समवायस्य एकत्वेऽपि तेषामनेकत्वं इत्यादि युज्यते । अतः अभेदेऽपि भेदाकार्यकारिविशेषात्मकाः ते धर्माः इति अङ्गीकार्याः । तथा चेत् गुणक्रियादिकमपि द्रव्याभिन्नमपि (भेदप्रतिनिधिरूपविशेषाश्रयीभूतधर्मरूपं) विशेषात्मकमित्यङ्गीक्रियमाणे सर्वोऽपि व्यवहारः उपपद्यते । एवं च भेदेन विनाऽपि तत्प्रतिनिधिना विशेषेणैव गुणकर्मादीनां द्रव्यसम्बन्धित्वव्यवहारः उपपन्नः ।

अभेदेऽपि सामानाधिकरण्यप्रतीतिः कथम् ?

यदि शुक्लघटयोः भेदसम्बन्धः न स्यात् तर्हि 'शुक्लः घटः' इति सामानाधिकरण्यप्रतीतिर्न स्यात् । 'दण्डी' 'कुण्डली' इत्यादौ तथा दर्शनात् । न च तस्य व्यवहारस्य तादात्म्यमात्रविषयत्वेन सम्बन्धविषयत्वाभावेऽपि उपपत्तिः । 'शुक्लः घटः' इति सामानाधिकरण्यव्यवहारस्य शौक्ल्याश्रयघटत्वानयनयोस्तादात्म्याश्रयत्वेऽपि 'दण्डी देवदत्तः' 'कुण्डली देवदत्तः' इत्यादौ दण्डादेः देवदत्तेनेव शौक्ल्यस्य घटेन सम्बन्धमात्रावगाहित्वेन न तादृशप्रतीतेः तादात्म्यावलम्बनं युज्यते । तादात्म्यावलम्बनेन तादृशप्रतीतिनिर्वाहे 'दण्डी देवदत्तः' इति प्रतीतेरपि दण्डदेवदत्ततादात्म्यावलम्बनेन निर्वाहापत्त्या दण्डसंयोगो देवदत्ते न सिद्ध्येत् ।

न च 'दण्डी' इत्यत्र सम्बन्धार्थकइनिप्रत्यययोगात् तस्य सम्बन्धावगाहित्वेऽपि 'शुक्लः घटः' इत्यत्र तददर्शनात् न अस्य सम्बन्धावगाहित्वमिति वाच्यम् ।

'शुक्लं अस्यास्तीति' अर्थे 'अर्श आदिभ्योऽच्' (पा.सू.५.२.१२७) इति अच्प्रत्ययविधानात् अत्रापि सम्बन्धैक्य प्रत्ययसद्भावेन 'शुक्लः घटः' इत्यस्य 'घटस्य शौक्ल्यम्' इति अभियुक्तव्याख्यानानुरोधेन सम्बन्धावगाहित्वावश्यंभावात् अत्र सम्बन्धविषयकसामानाधिकरण्य-प्रतीतिनिर्वाहाय अवश्यं तादात्म्यातिरिक्तभेदः सम्बन्धः गुणगुणिनोः अङ्गीकार्यः इति तार्किकाणामाक्षेपः । किञ्च यत्र केवलं अभेदः तत्र न सामानाधिकरण्यव्यवहारः । यथा 'घटः कलशः' इति । 'शुक्लः घटः' इत्यत्र तादात्म्ये अपि कथं सामानाधिकरण्यव्यवहारः ? 'समवायोऽस्ति' इत्यत्र सत्वस्य समवायेन अतिरिक्तसमबन्धाभावेऽपि सामानाधिकरण्यव्यवहार-दर्शनेन अत्रापि गुणगुणिनोः अभेदेऽपि तादृशव्यवहारः उपपद्यते ।

तस्मात् नैयायिकोक्तसमवायो नोपपद्यते ।

*****

# तत्त्वानि कानि ? कति ?

- **वेङ्कटनरसिंहाचार्यः**
शोधच्छात्रः, पूर्णप्रज्ञसंशोधनमन्दिरम्

मान्याः ! विना तत्त्वज्ञानं न कस्यापि मोक्ष इति तत्रभवन्तः भवन्तः सर्वे जानन्त्येव । तत्त्वानि च कति ? कानि च तानि ? इति तत्त्वसङ्ख्याविषये विवदन्ते सङ्ख्यावन्तः । तत्त्वसङ्ख्याविषये महाभगवद्भक्तः उद्धवः श्रीकृष्णं पृच्छति । यद्यपि भगवदुपदेशेन तत्त्वान्यधिकृत्य तत्सङ्ख्यां चाधिकृत्य सम्यग् जानात्येवोद्धवः । तथाऽपि ऋषिभिः तत्त्वानां बहुधा सङ्ख्यायमानत्वात्:, त्वदङ्गीकृततत्त्वसङ्ख्यां ब्रूहि' इत्यभिप्रायेण 'कानि तत्त्वानि विश्वेश सङ्ख्यातानि ऋषिभिः प्रभो'[१] इति पृच्छति ।

केचित् तत्त्वानि षड्विंशतीति प्राहुः । अन्ये केचित् पञ्चविंशतीति प्राहुः । एके सप्तेति, अन्ये षडिति प्राहुः । अपरे तत्त्वानि चत्त्वार्येवेत्याहुः । अन्ये मन्यन्ते तत्त्वान्येकादशैवेति । इतरे, तत्त्वानि सप्तदश वा षोडश वा त्रयोदश वा इत्याचक्षते । तथाचोक्तं भागवते-

**कानि तत्त्वानि विश्वेश सङ्ख्यातानि ऋषिभिः प्रभो ।**
**नवैकादश पञ्च त्रीण्यात्थ त्वमिह शुश्रुम ।।**

**केचित् षड्विंशतिं प्राहुरपरे पञ्चविंशतिम् ।**
**सप्तैके नव षट् केचिच्चत्वार्येकादशापरे ।**
**केचित् सप्तदश प्राहुः षोडशैके त्रयोदश ।। २ ।।**

**एतावत्त्वं हि सङ्ख्यानामृषयो यद्विवक्षया ।**
**गायन्ति पृथगायुष्मन् इदं नो वक्तुमर्हसि ।। ३ ।।**[२]

### षड्विंशतितत्त्वानि

तत्त्वानि षड्विंशत्येव इति वादिनामयमाशयः ।

१. पुरुषः (हिरण्यगर्भः) २. प्रकृतिः (गायत्री) ३. व्यक्तं (रुद्रः) ४. अहङ्कारः (स्कन्दः) ५. नभः ६. अनिलः ७. ज्योतिः ८. आपः ९. क्षितिः (इति नव तत्त्वानि)

तथाचोक्तं भागवते-

**पुरुषः प्रकृतिर्व्यक्तमहङ्कारो नभोऽनिलः ।**
**ज्योतिरापः क्षितिरिति तत्वान्युक्तानि मे नव ।। १४ ।।**[३] इति ।

**एकादशतत्त्वानि -**

१. श्रोत्रं २. त्वक् ३. दर्शनं ४. घ्राणः ५. जिह्वा ६. वाक् ७. पाणिः ८. पायुः ९. उपस्था १०. अङ्घ्रिः ११. मनः (इति एकादशतत्त्वानि)

तथाचोक्तं भागवते -

श्रोत्रं त्वग् दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः ।
वाक्पाण्युपस्थपाय्वङ्घ्रि कर्माण्यङ्गोभयं मनः ।। १५ ।।[४] इति ।

१. शब्दः २. स्पर्शः ३. रसः ४. गन्धः ५. रूपम् इति पञ्चतत्त्वानि, एवमाहत्य पञ्चविंशतितत्त्वानि भवन्ति । तथा चोक्तं भागवते-

शब्दः स्पर्शो रसो गन्धो रूपं चेत्यर्थजातयः ।[५]

तैः साकं परमात्मनोऽपि ग्रहणे आहत्य षड्विंशति तत्त्वानि भवन्ति ।

**तत्त्वानि पञ्चविंशत्येव**

पञ्चविंशत्येव तत्त्वानीति वदन्तः सङ्ख्यावन्त एवमभिप्रयन्ति । पञ्चविंशतितत्त्वेषु पूर्वोक्तेषु पुरुषो नाम परत्मात्मैव । व्यक्तमित्यनेन ब्रह्मा गृह्यते । 'अहङ्कारः' इत्येन रुद्रः गृह्यते । स्कन्दस्यान्तर्भावोऽहङ्कारतत्त्वे एव इति ज्ञेयम् । एवं चास्मिन् पक्षे पुरुषादितत्त्वेष्वेव परमात्मनोऽन्तर्भावोऽवगन्तव्यः ।

**सप्तैव तत्त्वानि**

अस्मिन् पक्षे, शब्दादिपञ्चविषयाः, आकाशादिपञ्चभूतान्येकीभूय पञ्च तत्वानि । ज्ञाननामा ब्रह्मा एकं तत्त्वम् । उभयाधारः अभिमान्यभिमन्यमानानामाधारः परमात्मा एकं तत्त्वम्, एवमाहत्य सप्ततत्त्वानि भवन्ति । तथा चोक्तं भागवते -

सप्तैव धातव इति यत्रार्थाः पञ्च खादयः ।
ज्ञानमात्मोभयाधारः ............. ।। १९ ।।[६] इति ।

### नव तत्त्वानि

१. ज्ञानशब्दवाच्यः ब्रह्मा २. आत्मशब्दवाच्यः परमात्मा ३. दशेन्द्रियाण्येकीकृत्य एकं तत्त्वं ४. पञ्चप्राणाः पञ्चतत्त्वानि ५. देहशब्दोक्तः देहाभिमानी दिवाकरः एकं तत्त्वम्, आहत्य नव तत्त्वानि भवन्ति । तथा चोक्तं भागवते- '......ततो देहेन्द्रियासवः'[७] इति ।

यद्वा, वागादीनां मनोऽधीनत्वेन मनसा एकत्वं, पञ्च श्रोत्रादीनीन्द्रियाणि, देह-प्राणौ परमात्मना सह तत्त्वानि नव भवन्तीति कथयन्ति ।

### तत्त्वानि षडेव

अस्मिन् पक्षे - भूतानि पञ्च, परमात्मना सह षड् तत्त्वनि भवन्ति । तथा चोक्तं भागवते- 'षडित्यत्रापि भूतानि पञ्च षष्ठः परः पुमान्'[८]

### चत्वार्येव तत्त्वानि

अस्मिन् मते, अग्नि-जल-पृथिवीभिः साकं परमात्मनोऽपि ग्रहणे चत्त्वार्येव तत्त्वानि सम्पद्यन्ते । तथा चोक्तं भागवते -

'चत्वार्येव तत्रापि तेज आपोऽन्नमात्मनः ।
जातानि तैरिदं जातं जन्मावयविनः खलु ।।[९] २१ ।। इति ।

### सप्तदश तत्त्वानि

अस्मिन् पक्षे - पञ्चभूतानि, पञ्चमात्राः, पञ्चज्ञानेन्द्रियाणि, एकेन मनसा सह परमात्मनोऽपि ग्रहणे आहत्य सप्तदश तत्त्वानि सम्पद्यन्ते । तथा चोक्तं भागवते -

**सङ्ख्याने सप्तदशके भूतमात्रेन्द्रियाणि च ।**
**पञ्च पञ्चैकमनसा आत्मा सप्तदशः स्मृतः ।। २२ ।।**[१०] इति ।

### षोडशतत्वानि

एतस्मिन् मते- पञ्चभूतानि, पञ्चमात्राः, पञ्चज्ञानेन्द्रियाणि आत्मना (मनसा) सह षोडशतत्त्वानि भवन्ति । मनसः परमात्मनः विशेषसन्निधानपात्रत्वाद् मनोवाचिनाऽऽत्मशब्देन परमात्मनोऽपि ग्रहणमिति ज्ञेयम् ।

तथा चोक्तं भागवते-

**'तद्वत् षोडशसङ्ख्याने आत्मना मन उच्यते ।'**[११]

**त्रयोदश तत्त्वानि**

अस्मिन् पक्षे - पञ्चभूतानि, पञ्चज्ञानेन्द्रियाणि मनः, आत्मशब्दवाच्यौ - चतुर्मुखब्रह्म-परमात्मानौ एवमाहत्य त्रयोदशतत्त्वानि सम्पद्यन्ते । तथा चोक्तं भागवते-

**'भूतेन्द्रियाणि मन आत्मा त्रयोदश ।। २३ ।।'**[१२] इति ।

**एकादश तत्त्वानि**

अस्मिन् मते - पञ्चभूतानि, पञ्चतन्मात्राः, परमात्मना सह एकादशतत्त्वानि भवन्ति । तथा चोक्तं भागवततात्पर्ये श्रीमदाचार्यैः -

**'भूतानि मात्राश्च परस्तत्त्वैकादशकं स्मृतम्'**[१३] इति ।

वीरराघवाचार्यास्तु- पूर्वोक्तषड्विंशतितत्त्वैः साकं कालोऽप्येकं तत्त्वमिति परिगणय्य तत्त्वनि सप्तविंशतीति प्राहुः । तत्पक्षे **'गुणव्यतिकरः कालः स्वभावः सूत्रमेव च'**[१४] इति श्लोकस्यायमाशयः । गुणव्यत्ययजनकः कालः योऽस्ति स एव स्वभावः सूत्रमिति चोच्यते । सर्वपदार्थानां कालसम्बन्धस्य नियतत्वात् स्थितिहेतुत्वाच्च कालस्य स्वभाव-सूत्रशब्दवाच्यत्वम् । 'सप्तविंशमथापरे' इति श्रुत्यनुरोधात् कालेन सह आहत्य सप्तविंशति तत्वानीति तन्मते ज्ञेयम् ।

तच्चिन्त्यम् । भागवते कृष्णेन 'केचित् षड्विंशतिं प्राहुः .....'[१४] इत्यारभ्य 'षोडशैके त्रयोदश'[१५] इत्यन्तं तत्त्वसङ्ख्याविषये मतभेदकथनावसरे 'सप्तविंशति तत्त्वानि' इति मतस्योल्लेखः न कृतः । तस्मात् कालोऽप्येकं तत्त्वमिति परिगणनमनावश्यकम् इत्यवगन्तव्यम् ।

१. पुरुषः २. प्रकृतिः ३. महत्तत्वं ४. अहङ्कारतत्त्वं ५. पञ्चज्ञानेन्द्रियाणि ६. पञ्चकर्मेन्द्रियाणि ७. मनः ८. पञ्चभूतानि इत्याहत्य विंशति तत्त्वानि । पञ्चतन्मात्रा अप्यस्मिन् पक्षे पञ्चभूतेष्वेव अन्तर्भवन्ति । अयमेकः पक्षः ।

'पञ्चतन्मात्राणां पृथक्परिगणनपक्षे तत्त्वानि पञ्चविंशति भवन्ति' । अस्मिन् पक्षे जीवेश्वरौ न भिन्नाविति ज्ञेयम् । जीवेश्वरौ भिन्नाविति पक्षे तत्त्वानि षड्विंशतीति ज्ञेयम् । अस्मिन् पक्षेऽपि ज्ञान-कर्मादिदशेन्द्रियाणां दशकार्यैः साकं परिगणनेऽधिका भवति तत्त्वसङ्ख्या । तस्मात् तेषां परिगणनं न कार्यमिति शुकदेवेन भागवतव्याख्यायां कथितम् ।

यद्यपि तत्त्वसङ्ख्याविषये विवदन्ते सुमतयः । तथाऽपि न विरोधः । सर्वेष्वपि पक्षेषु युक्तिसद्भावात् 'विवक्षाभेदेन सुघटत्वात् सर्वपक्षाणाम्' । तथा चोक्तं भागवते––

**'युक्तयः सन्ति सर्वत्र भाषन्ते ब्राह्मणा यथा ।**
**मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटम् ।।'**[१६] इति ।

मदीयां मायाम् (विचित्रकार्यानुकूलसामर्थ्यम्) अवलम्ब्य तत्त्वसङ्ख्यां नानाविधां ऋषयः कथयन्ति । एवं वदतां ऋषीणां किं नु दुर्घटम् ? एवं सति अन्यान्यरीत्या तत्त्वसङ्ख्यानं प्रामाणिकमित्यापतितम् । तर्हि किमर्थं विवदन्ते ? इति चेत्- इत्थम् । अल्पबुद्धित्वात् तथा ते विवदन्ते । तत्रापि मच्छक्तिरेव हेतुरिति ज्ञेयम् । तथा चोक्तं भागवततात्पर्ये श्रीमदाचार्यैः-

**'विष्णोः सामर्थ्यमालम्ब्य तत्त्वसङ्ख्यां मुनीश्वराः ।**
**चक्रुर्हि तदविज्ञाय विवदन्त्यल्पबुद्धयः ।**
**तत्रापि कारणं विष्णोः शक्तिः ......** ।।'[१७] इति ।

कारणेषु कार्यानुप्रवेशात् क्वचित् कार्यकारणयोरभेदविवक्षया, तत्त्वसङ्ख्याऽल्पेति, कार्यस्य कारणात्, पृथग् विवक्षया बह्वीति च कथयन्ति । तस्मात् अन्यान्यरीत्या परिगणितायामपि तत्त्वसङ्ख्यायां न विरोध इति ज्ञेयम् । तथा चोक्तं भागवते-

'परस्परानुप्रवेशात् तत्त्वानां पुरुषर्षभ ।
पौर्वापर्यप्रसङ्ख्यानं यथा वक्तुर्विवक्षितम् ।। ७ ।।

एकस्मिन्नपि दृश्यन्ते प्रविष्टानीतराणि च ।
पूर्वस्मिन् वाऽपरस्मिन् वा तत्वे तत्वानि सर्वशः ।। ८ ।।'

पौर्वापर्यमतोऽमीषां प्रसङ्ख्यानमभीप्सताम् ।। ९ ।।[१८] इति

अपि च

'अष्टौ प्रकृतयः प्रोक्ताः त्रय एव हि तद्गुणाः ।
विकाराः षोडशाऽचार्यैः पुमानेकः समन्वयात्'[१९]

इति श्लोकेऽपि तत्त्वनिरूपणं दृश्यते । तथाहि-

१. मूलप्रकृतिः, २. महत्तत्त्वं, ३. अहङ्कारतत्वं, ४. पञ्चतन्मात्राः इत्यष्टौ प्रकृतयः ।

१. मनः २. पञ्चज्ञानेन्द्रियाणि ३. पञ्चकर्मेन्द्रियाणि ४. पञ्चभूतानि, इत्येवं षोडशतत्त्वानि विकाराः इति कथ्यन्ते । एवं चाहत्य चतुर्विंशतितत्वानि ।

**पुमान् एकः** - एतेषु सर्वेषु तत्त्वेषु एकैकरूपेण प्रविष्टः एकोऽस्ति स एव परमपुरुषः । एवं चाऽहत्य पञ्चविंशति तत्वानि भवन्ति । इति कपिल-मनुप्रभृतयः आचार्याः कथयन्ति ।

तथा चोक्तं भागवततात्पर्ये-

अभिमान्यपेक्षया विष्णुः पञ्चविंश इति स्मृतः ।
जडव्यपेक्षया जीवः सम्यग्ज्ञेयो हरिः स्मृतः ।।[२०] इति ।

यदा प्रकृत्यादिशब्दैः चतुर्विंशतितत्त्वैः सह तदभिमानिनामपि विवक्षा तदा विष्णुः पञ्चविंशः तत्त्वमिति ज्ञेयम् । यदा प्रकृत्यादिशब्दैः केवलं जडतत्त्वानि विवक्ष्यन्ते तदा जीवः पञ्चविंशः तत्त्वं, विष्णुस्तु पञ्चविंशतितत्त्वेषु सर्वेष्वपि नियामकतया स्थितत्वात् सोऽपि पञ्चविंशस्तत्वमिति (इति ज्ञेयम्) इति ब्रह्मतर्के उक्तम् ।

**END NOTES :**

१. भागवतम् - ११.२२.१
२. भागवतम्. ११.२२.१-३
३. भागवतम्- ११.२२.१४
४. भागवतम्-११.२२.१५
५. भागवतम्- ११.२२.१६
६. भागवतम्- ११.२२.१९
७. भागवतम्- ११.२२.१९
८. भागवतम्- ११.२२.२०
९. भागवतम्- ११.२२.२१
१०. भागवतम्- ११.२२.२२
११. भागवतम्- ११.२२.२३
१२. भागवतम्- ११.२२.२३
१३. भागवतम्- ११.२२.२२
१४. भागवतम्- ११.२२.१३
१५. भागवतम्- ११.२२.२
१६. भागवतम् - ११.२२.४
१७. भागवतात्पर्यम्- ११.२२.४
१८. भागवतम्- ११.२२.७-१०
१९. भागवतम्- ७.७.२२
२०. भागवतात्पर्यम्- ७.७.२२

*****

# परमाणुः

- भीमसेनगुत्तल्
शोधच्छात्रः, पूर्णप्रज्ञसंशोधनमन्दिरम्

इह खलु जगति विविधसांसारिकदुःखदर्शनेन व्याकुलाः लोकाः दुःखनिवृत्त्यै परमानन्दावाप्त्यै च शास्त्रे श्रद्धुः । लोके च शास्त्राणि बहूनि व्यराजन्त । तत्र नैकेषु शास्त्रेषु विभिन्नतया जगत्सृष्ट्यादिकं उपवर्णितमिति विज्ञायते एव ।

यथाऽऽहुः वेदान्तिनः 'आत्मन आकाशः सम्भूतः आकाशाद् वायुः वायोरग्निः'(तै.उ.२.१.१) इत्यादि । एके च परमाणुद्वयसंयोगेन द्व्यणुकादिप्रक्रमेण जगत्सृष्ट्यादिकं भवति इत्याहुः । तथाहि-

'परमाणुद्वयेनैव द्व्यणुकं नाम जायते ।
द्व्यणुकत्रयेण त्र्यणुकं तैश्चतुर्भिस्तदात्मकम् ।।' (अनु.व्या.अ.२, पा.२ श्लो.५२,५३,पृ.सं.३५३)

अत्रेयं जिज्ञासा समुदेति कोऽयं परमाणुः ? किं तत्स्वरूपमिति जिज्ञासायां नैकैः टीकाकारैः बहुधा वर्णितम् । यथाऽऽह श्रीधरः - 'सतः = कार्यस्य विशेषाणां अंशानां यः चरमः = अन्त्यः यस्य अंशः नास्ति, अनेकः = कार्यावस्थां अप्राप्तः असंयुतः = समुदायावस्थां चाप्राप्तः स परमाणुः इति ज्ञेयः ।' इति ।

यथाऽऽह विश्वनाथः - परमाणुः विज्ञेय एव । न तु दृश्यते इत्यर्थः । ननु तर्हि तस्य सत्वे किं प्रमाणम् ? तत्राऽह एभ्यः समुदितेभ्यः नृणां ऐक्यमिति भ्रमो भवति । सूर्यरश्मियुक्तं गवाक्षिरन्ध्रे ये भ्रमन्तः अतिसूक्ष्माः पार्थिवकणाः दृश्यन्ते तेषु अयमेको अतिसूक्ष्म एक एव कण इति बुद्धिः भवति इत्यर्थः । तस्य षष्ठोंऽशः एव परमाणुः इति । (मुक्तावली - पृ.११०)

वैशेषिकास्तु- एवं परमाणुविषये स्वमतमुपस्थापयन्ति । तथाहि तन्मते द्रव्यगुणकर्मसामान्य-विशेषसमवायाः षट् भावपदार्थाः । तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव । तानि च नित्यानित्यभेदाद् द्विविधानि । तत्र परमाणुरूपाणि पृथिव्यादीनि चत्वारि गगनादीनि पञ्च नित्यानि । द्व्यणुकादीनि अनित्यानि, यथोक्तं मुक्तावल्यां -

'नित्यऽनित्या च सा द्वेधा नित्या स्यादणुलक्षणा । (कारिकावली - श्लो.३६, पअ.११२)

ननु परमाणौ किं मानम् ? न तावत् प्रत्यक्षम् अतीन्द्रियत्वात् इति चेत्, तत्राऽहुः नैयायिकाः-(त.दी.-पृ.६४)जालसूर्यमरीचिस्थं सर्वतः सूक्ष्मतमं यद्रजः उपलभ्यते तत्र्यणुकं चाक्षुषद्रव्यत्वात्

तदवयवाश्च द्व्यणुकनामानः, तेऽपि कार्याः महद्द्रव्यारम्भकत्वात् यश्च तदवयवः स एव परमाणुः तदवयवकल्पनायां मेरुसर्षपयोः तुल्यतापत्तिः । अतः यथा महत्परिमाणतारतम्यस्य विश्रान्तिरङ्गीकृता एवं परमाणुपरिमाणस्यापि कुत्रचित् विश्रान्तिरङ्गीकार्या । तस्य च अनित्यत्वे असमवेतभावकार्योत्पत्तिप्रसङ्गात् नित्यत्वम् अवश्यमङ्गीकार्यम् । अतः प्रमाणभावात् बाधकसद्भावाच्च परमाणोः अवयवः न कल्पनीयः इत्येवं परमाणुसिद्धिम् अभ्युपयन्ति । यथोक्तं- 'सूत्रं परं वा त्रुटेः'(गो.न्या.सू.४.१.१५) त्रुटेः परं यदतिसूक्ष्मं तत् परमाणुः ।

किन्तु द्वैतसिद्धान्ते परमाणुः साक्षिवेद्यः । अन्यथा तस्य परमाणोः अप्रामाण्यप्रसङ्गः । प्रत्यक्षस्यैव अप्रामाण्ये अनुमादीनां अप्रवृत्तेः अप्रामाण्यप्रसङ्गः । यथोक्तम् अनुव्याख्याने-यदि साक्षिमितं नैतत्[१](१.अनु.व्या. अ.२, पा.२, श्लो...पृ.३५००) इत्यादिना । एवं सावयवश्च, यथोक्तं श्रीमन्न्यायसुधायां - परमाणुः सावयवः पदार्थत्वाद् धटवत् । न च परमाणोः अवयवे व्यभिचारः इति वाच्यम् । तस्यापि सावयवत्वात् ।

ननु परमाणोरपि अवयवः स्यात् तदा व्याहतिः । तथा हि । यो हि सर्वतः अपकृष्टः यतः परम् अणुः नास्ति तं परमाणुमाचक्षते । तस्य च सावयवत्वे अवयविनः अवयवानाम् अपकृष्टपरिमाणम् आवश्यकं अतः परमाणुः सावयवः इति स्वव्याघातस्य मुख्यं उदाहरणम् । अत्र आचार्यमध्व आह- 'अविभागः पराणुता' (अनु.व्या. अ.२, पा.२, श्लोकः ...... पृ.३४६४) इति ।

स्यादियं व्याहतिः यदि निरवयवत्वं परमाणुशब्दप्रवृत्तिनिमित्तं स्यात् । न चैवम् । किन्तु विभागाभावः अतः न व्याहतिः ।

ननु विभागभावो नाम सर्वथा विभागाभावो वा यत्किञ्चित्प्रतियोगिकविभागाभावो वा अवयवविभागाभावो वा । आद्येऽपि सर्वथा निर्विशेषणविभागाभावो वा सर्वथा सविशेषणविभागाभावो वा ? नाऽद्यः गुणे गुणानङ्गीकारात् तस्यापि परमाणुत्वं स्यात् । द्रव्यत्वे सति इति विशेषणाद् गुणादौ अतिप्रसङ्गवारणेऽपि असम्भवः सुस्थः इति द्वितीयपक्षः नाभ्युपगम्यते । तथा हि । सङ्ख्यादयः द्रव्यसामान्यगुणाः अतः परमाणौ द्रव्यत्वसद्भावेऽपि विभागस्यैव सत्वात् असम्भवः । न द्वितीयः । मेरुमन्दरयोः कदाचिदपि संयोगः न भवति । अतः तत्र तन्नाशकविभागोऽपि नास्ति । अतः मेरुप्रतियोगिकविभागः मन्दरे नास्ति । तत्प्रतियोगिकवियोगः मेरौ नास्ति इति तयोरपि परमाणुत्वापत्तिः । न तृतीयः गगनेऽवयवस्यैव अभावात् । तस्य परमाणुत्वापतिः । गगनस्य

सावयवत्वे विप्रतिपन्नं प्रति अतिप्रसङ्गान्तरमाह । तथा हि । द्रव्यनाशः द्वेधा भवति समवायिकारणनाशात् द्रव्यनाशः यथा कपालनाशात् घटनाशः, असमवायिकारणनाशाद् द्रव्यनाशः यथा कपालद्वयसंयोगनाशाद् घटनाशः । यत्र असमवायिकारणनाशाद् द्रव्यनाशः भवति तत्र अवयवसत्वाद् विभागो भवितुं अर्हति । किन्तु यत्र समवायिकारणनाशादेव द्रव्यनाशः भवति तत्र अवयवस्यैव अभावात् अवयवविभागः नास्ति । अतः तदभावः अवयवनाशान्नष्टे वस्तुनि सद्भावात् तस्यापि परमाणुत्वं स्यात् । अतः कथमिदं प्रवृत्तिनिमितं भवेत् ? इत्यतः श्रीमट्टीकाकृत्पादैः एवं कथितमस्ति । यस्य विभिन्नावयवेषु सत्स्वपि येषां विभागः न कदाऽपि भवितुं अर्हति सः परमाणुः । अनेन लक्षणमिदं लभ्यते विभागानर्हस्वाभिन्नावयववत्वम् इति । इदं च परमाणावस्ति । तथा हि विभागानर्हाः ये भूतसूक्ष्माणां अवयवाः । ते परमाणुतः भिन्नाः तत्कत्वं परम्परया परमाणौ अस्ति इति लक्षणसमन्वयः । यदि भूतसूक्ष्मावयवानां विभागः स्यात् तदा भूतसूक्ष्मस्य अनित्यत्वापत्तिः ।

(न्या.सु.पृ.३४६८) अत्र केचन व्याख्याकाराः एवं व्याख्यास्यन्ति । तथा हि । विभागानर्हस्वभिन्नावयवत्त्वमित्युक्तौ । आपाततः व्याहतिः प्रतीयते । यः स्वभिन्नः सः विभागार्हः । यथा घटावयवः कपालः अनर्ह इत्युक्ते व्याहतिः यः विभागानर्हः सः न स्वभिन्नः यथा गगनावयवः पुनः स्वभिन्नत्वोक्तौ व्याहतिः इति चेत् न । विभागानर्हत्वं पारिभाषिकं स्वीक्रियते अतः न व्याहतिः ।

अत्र लक्षणे अनर्हपदानुपादाने विभागाभावविशिष्टस्वभिन्नअवयववत्वं इति भवति । तदा यत्र अवयवनाशाद् द्रव्यनाशः भवति तत्र अवयवानां एव अभावाद् विभागः नास्ति । तस्मात् तत्रोक्तलक्षणस्य सत्वात् अतिव्याप्तिः । एवं द्व्यणुके विभागस्य विद्यमानत्वेऽपि सः अस्माभिः न दृश्यते अतः तत्रापि विभागादर्शनविशिष्टस्वभिन्नाववयववत्वस्य तत्र सत्वात् अतिव्याप्तिः दुर्वारा । तदर्थं अनर्हपदोपादानम् । तथा च द्रव्यत्वेन एतद् घटसाजानी(ती ?)ये घटान्तरे अवयवविभागो दृष्टः अतः यत्र अवयवनाशाद् द्रव्यनाशः भवति तत्रापि विभागयोग्यतायाः सत्वात् नातिप्रसङ्गः । एवं द्व्यणुकादौ अपि नातिप्रसङ्गः । तथा हि स्वं द्व्यणुकं तत्सजातीये = अणुकार्यत्वेन उभयसम्मतत्वेन एतत् सजातीये चतुरणुके अवयवविभागो दृष्टः, अतः द्व्यणुकादावपि अवयवविभागयोग्यतायाः सत्वात् न तत्र अतिव्याप्तिः ।

न च वक्तव्यं स्वं = परमाणुः तत्सजीये = अणुकार्यत्वेन उभयसम्मततत्वेन स्वसजातीये

चतुरणुके - अवयवविभागो दृष्टः अतः परमाणौ अपि अवयविभागयोग्यताया एव सत्वात् असम्भवः इति । परमाणुः अणुकार्यमिति वेदान्तिनां आशयः न तु नैयायिकानाम् । अतः अणुकार्यत्वेन उभयसम्मतत्वस्यैव वक्तुं अशक्यत्वेन नासम्भवो सम्भवति । केचन अस्य लक्षणय्य लक्ष्यं भूतसूक्ष्माणि लक्ष्याणि इति तत्र विभागानर्हअवयववत्वस्य सत्वेऽपि स्वभिन्नत्वस्य अभावात् असम्भवः इति चेत् तत्राह इदानीं स्वभिन्नत्वं च अनन्तांशोपेत अवयवत्वम् इति पारिभाषिकं निर्वक्तव्यम् । तथा च विभागानर्ह अनन्तांशोपेतावयववत्वस्य भूतसूक्ष्मे सत्वात् लक्षणसमन्वयः ।

इदानीं परोक्तं यतः परं अपकृष्टपरिमाणं नास्ति सः परमाणुः इति परोक्तं परमाणुशब्दप्रवृत्तिनिमित्तं अङ्गीकृत्य यथा न व्याहतिः तथा लक्षणान्तरं करोति । यतः स्वतन्त्रं अनवयवरूपं अपकृष्टं परिमाणं नास्ति सः परमाणुः' । तथा च स्वावयवातिरिक्तस्वापकृष्टपरिमाणोपेत अव्यवत्वाव-स्थानापन्न द्रव्यान्तरराहित्यम् इति लक्षणं सम्पद्यते । इदं च परमाणौ अस्ति । तथा हि स्वं परमाणुः तदवयवः - भूतसूक्षं तदतिरिक्तः = तस्य अवयवः स च स्वापकृष्टपरिमाणोपेतः एवम् अवयवत्वावस्थानापन्नः तथा च अवयवत्वावस्थापन्नद्रव्यान्तरस्य अभावात् लक्षणसमन्वयः । अत्र द्रव्यान्तरराहित्यमात्रोक्तौ परमाणुपरिमाणापेक्षया अपकृष्टपरिमाणद्रव्यस्य सत्वात् । अतः स्वावयवातिरिक्तत्वं विशेषणीयम् । भूतसूक्ष्माणि स्वावयवाः एव न तु तदतिरिक्तः अतः नासम्भवः । तावन्मात्रोक्तौ पुनः असम्भवः परमाणौ स्वावयवातिरिक्तद्रव्यान्तरस्य च घटस्य साहित्यसद्भावात् । तस्मात् स्वापकृष्टपरिमाणोपेतत्वं विशेषणीयम् । घटस्य स्वोत्कृष्टपरिमाणद्रव्यत्वात् नासम्भवः । तथाऽपि असम्भवः वज्रलेपायित एव । तथा हि स्वं = परमाणुः तदवयवः - भूतसूक्ष्मः तदतिरिक्तः-तदवयवः स च कृष्टपरिमाणोपेतः तत्साहित्यस्यैव सत्वात् परमाणौ असम्भवः । अतः अवयवत्वावस्थापन्नत्वं विशषेणीयम् । भूतसूक्ष्मस्य यः अवयवः सः सर्वदा अवयवत्वावस्थापन्नः एव अतः अनापन्नद्रव्यान्तरराहित्यस्य सत्वात् लक्षणसमन्वयः ।

ननु एवमुक्तेऽपि भूतसूक्ष्मेऽतिव्याप्तिः । तथा हि स्वं भूतसूक्ष्मं तदवयवः - भूतसूक्ष्मावयवः तदतिरिक्तः भूतसूक्ष्मस्य यः अवयवः तस्य अवयवः सः स्वापकृष्टपरिमाणोपेतः एवम् अवयवत्वावस्थापन्नश्च अतः उक्तलक्षणसद्भावात् अतिप्रसङ्गः ।

तदर्थं अवयवत्वावस्थानापन्ना अवयववत्वं इति वक्तव्यम् । तथा च नातिव्याप्तिः । तथा हि भूतसूक्ष्मावयवस्य यः अवयवः सः अवयवत्व अवस्थापन्न एव न तु अनापन्नः अतः अनापन्न अवयववत्वस्य अभावात् न दोषगन्धोऽपि ।

एवं द्व्यणुकेऽपि नातिप्रसङ्गः । तथा हि स्वं= द्व्यणुकं तदवयवः= परमाणुः तदतिरिक्तं= भूतसूक्ष्मं तच्च कदाचित् अवयवत्व अवस्थापन्नोऽपि भवति अतः अनापन्नावयववणुत्त्वस्य द्व्यणुके असत्वात् नातिप्रसङ्गः ।

परमाणौ च अस्ति इदं लक्षणम् । परमाणुजननात् पूर्वं भूतसूक्ष्मस्य यः अवयवः स : अवयवत्वावस्थाऽनापन्न एव । अतः स्वावयवातिरिक्त स्वापकृष्टपरिमाणोपेत अवयववत्वस्य परमाणौ सत्वात् लक्षणसमन्वयः । एवं परमाणुस्वरूपं कीदृशम् इति अतिविस्तृततया श्रीमट्टीकाकृत्पादैः श्रीमन्न्यायसुधायां चिन्तितम् ।

अन्यत्रापि आचार्यमध्वस्य परमाणुविषये एवं भणितिरस्ति ।

चरमस्तु विशेषाणाम् अनेकांशयुतस्तु यः ।
परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यथा ।। (भाग..क्त...नृ..)

तत्वविवेके च

मनुष्या देवलोकेऽपि विशेषेणैव दर्शने ।
(भाग.ता.३.११.१- तत्वविवेकवचनमुदाहृतं भागवततात्पर्ये)
अंशांशित्वविशेषं तु यस्य द्रष्टुं न शक्नुयुः ।
चरमो विशेष इति तं मुनयो ब्रूयुरञ्जसा ।
परमाणुः स विज्ञेयो कणादाद्या निरंशिनम् ।
अनन्तांशयुतत्वेऽपि यं ब्रूयुः भ्रान्तिदर्शनात् ।
ततोऽपि परमाणुत्वं तदंशनां तु यद्यपि ।
अनन्तत्वात् विवेकार्थं अस्योक्ता परमाणुना ।। इति ।

य एव लोके संस्थिताः मानुषास्तु विशेषाणां दर्शने शक्तियुताः तथापि ते यस्य चांशित्वमेव विशेषं वै नैव द्रष्टुं समर्थाः । तमेवाहुः चरमांशं विशेषं ये चैवमाहुर्मुनयस्तेन चान्यै । ते काणादाः गौतमाद्याः निरंशकं परमाणुं वदन्ति । अनन्तांशैः संयुतत्वेऽपि तांश्च निरंशिनः भ्रान्तिदृष्ट्या वदन्ति तस्मात् परमाणोः परमाणुत्वमस्ति । इत्यलं वाग्जालेन ।

*****

# लिङर्थविचारे न्यायमतविमर्शः

- गुरुराज कुलकर्णी
शोधच्छात्रः, पूर्णप्रज्ञसंशोधनमन्दिरम्

लोके हि लिङादिघटितवाक्यश्रवणसमनन्तरं जनाः प्रवर्तन्ते इति तु सर्वजनसिद्धः अनुभवः विराजते । परन्तु लिङ्ः शक्तिविषये सर्वेऽपि दार्शनिकाः विवदन्ते ।

तत्र नैयायिकाः, एवम् अभिप्रयन्ति । लिङः बलवदनिष्टाननुबन्धित्वे, इष्टसाधनत्वे, कृतिसाध्यत्वे च शक्तिः । बलवदनिष्टाननुबन्धित्वे शक्त्यनङ्गीकारे मधुविषसम्पृक्तान्नभोजने प्रवृत्तिः स्यात् । 'इदमन्नं तृप्तिरूपेष्टजनकं, मत्कृतिसाध्यं च' इति ज्ञानद्वयसत्वात् । अतः बलवदनिष्टाननुबन्धित्वे शक्तिः अभ्युपेया । अङ्गीकृते च 'मधुविषसम्पृक्तान्नभोजनं मरणरूपबलवदनिष्टानुबन्धि' इति ज्ञानसत्वेन न तत्र प्रवृत्तिः भवति । इष्टसाधनत्वे शक्यनङ्गीकारे मण्डलीकरणादौ प्रवृत्तिः स्यात् ।

मण्डलीकरणं नाम बौद्धानां कश्चिदाचारविशेषः । ते च बौद्धाः मण्डलाकारेण उपविश्य कमपि विषयं सम्भूय आलोचयन्ति । अत्र प्रवृत्तेः वारणाय इष्टसाधनत्वे शक्तिरङ्गीकार्या । इष्टसाधनताज्ञानाभावादेव आस्तिकाः तत्र न प्रवर्तन्ते । कृतिसाध्यत्वे शक्त्यनङ्गीकारे चन्द्रमण्डलस्पर्शेऽपि प्रवृत्तिः स्यात् । तत्रापि बलवदनिष्टाननुबन्धित्वज्ञानस्य इष्टसाधनताज्ञानस्य च सत्वात् । अतः कृतिसाध्यत्वे शक्तिः उररीकार्या । सति च एवम् 'अयं मत्कृतिसाध्यो न' इति ज्ञानसत्वेन न तत्र प्रवर्तते लोकः ।

ननु अर्थत्रये प्रत्येकं शक्त्यङ्गीकारे लिङा तस्य अर्थत्रयस्य युगपद् बोधो न स्यात् । 'अनेकार्थकशब्दानां एकस्मिन् प्रयोगे एकार्थबोधकत्वम्' इति नियमात् इति चेन्न । यथा 'पुष्पवच्छब्दात् सूर्यत्वावच्छिन्नविषयकबोधः चन्द्रत्वावच्छिन्नविषयकशब्दबोधश्च भवतु' इति ईश्वरेच्छाया सत्वेन युगपद् अर्थद्वयबोधः सम्भवति, तथा प्रकृतेऽपि लिङा इष्टसाधनत्वविषयकबोधः, कृतिसाध्यत्व-विषयकबोधः, बलवदनिष्टाननुबन्धित्वविषयकबोधश्च भवतु इति ईश्वरेच्छायाः सत्वेन युगपदर्थत्रयबोधः नासम्भवि ।

ननु बलवदनिष्टाननुबन्धित्वस्य, कृतिसाध्यत्वस्य, इष्टसाधनत्वस्य च अन्वयः क्व ? इति चेत् एतेषां त्रयाणाम् अन्वयस्तु धात्वर्थे यागादावेव । तत्रैव बलवदनिष्टाननुबन्धित्वस्य, इष्टसाधनत्वस्य, कृति साध्यत्वस्य सम्भवात् । न चैवं 'न कलञ्जं भक्षयेत्'[१] इत्यादिनिषेधवाक्येष्वपि लिङर्थस्य धात्वर्थे अन्वयः स्याद् इति वाच्यम् । निषेधवाक्येषु बलवदनिष्टाननुबन्धित्वस्यैव नञर्थे अभावे

१. भाट्टरहस्योदाहृत श्रुतिवचनम् - पृ.सं. १४

अन्वयः, न तु इष्टसाधनत्वकृतिसाध्यत्वयोः । 'कलञ्जभक्षणं तृप्तिरूपेष्टसाधनं कृतिसाध्यं च' इति ज्ञानसत्वेन नञा कृतिसाध्यत्वाभावस्य इष्टसाधनत्वाभावस्य च बोधने तद्वाक्यप्रामाण्यमेव भज्येत । बलवदनिष्टननुबन्धित्वस्य अभावे नञर्थे अन्वये च न तद्वाक्यप्रामाण्यभङ्गः । कलञ्जमक्षणस्य नरकाद्यनिष्टानुबन्धित्वात् । ईदृशबलवदनिष्टाननुबन्धित्वज्ञानरूपकारणाभावादेव न तत्र शिष्टाः प्रवर्तन्ते ।

केचिच्च बलवदनिष्टाननुबन्धित्वविशिष्टकृतिसाध्यत्वविशिष्टेष्टसाधनत्वरूपैकस्मिन्नर्थे एव शक्तिमङ्गीकुर्वन्ति ।

तदिदं नैयायिकमतं न सम्यक् चकास्ति । बलवदनिष्टाननुबन्धित्वस्य कृतिसाध्यत्वस्य लिङादिप्रत्ययवाच्यत्वे प्रमाणाभावात् । न च तयोः लिङ्प्रत्ययवाच्यत्वाभावे चन्द्रमण्डलस्पर्शे, मधुविषसम्पृक्तान्नभोजने च प्रवृत्तिः स्यात् इति वाच्यम् । चन्द्रमण्डलग्रहणादौ प्रवृत्यभावस्तु वृथा श्रमजनकतया द्वेषादेव उपपद्यते । विषसम्पृक्तमधुभोजने च तज्जन्ये फले दुःखे उत्कटद्वेषसत्वे तादृशान्नभोजनजन्ये सुखरूपाल्पफले च इच्छायाः अभावात् इष्टसाधनत्वाभावात् न तत्र प्रवर्तन्ते जनाः । अपि च बलवदनिष्टाननुबन्धित्वज्ञानं प्रवृत्तिं प्रति न हेतुः । तथात्वे स्वर्गनरकादिलोकाङ्गीकर्तुः आस्तिकस्य कामुकस्य परदारगमने नरकसाधनताज्ञानसत्वेऽपि तत्र उत्कटेच्छायाः सत्वे द्वेषाभावदशायां प्रवृत्तिः न स्यात् । दृश्यते च प्रवृत्तिः । अतः न बलवदनिष्टाननुबन्धित्वज्ञानं प्रवृत्तिहेतुः ।

किन्तु इष्टसाधनताज्ञानमेव प्रवृत्तिहेतुः । तदुक्तं मण्डनमिश्रैः -

'पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः ।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम् ।।' इति ।[१]

एवम् इष्टसाधनत्वे एव लिङः शक्त्यङ्गीकारे दोषलेशस्याप्यभावात् लिङः तत्रैव शक्तिः उररीकार्या ।

अपि च लिङः अर्थत्रये शक्तिरङ्गीक्रियेत तर्हि तत्तसमभिव्याहारात् तत्तद्व्युत्पत्तिवशात् च विभिन्न शाब्दबोधोदयात् तदनुरोधेन सप्तविधकार्यकारणभावकल्पनारूपं गौरवं प्रसज्यते । तथाहि - 'न कलञ्जं भक्षयेद्' इत्यादौ लिङर्थबलवदनिष्टाननुबन्धित्वप्रकारकनञर्थाभावविशेष्यक शाब्दबोधोदयात् तदनुरोधेन ।

१. नञ्समभिव्याहृतलिङर्थबलवदनिष्टाननुबन्धित्वप्रकारकशाब्दबोधे नञ्पदजन्योपस्थितिः कारणम् इति प्रथमः कार्यकारणभावः कल्प्यः ।

एवं बलवदनिष्टाननुबन्धित्वातिरिक्तलिङर्थेष्टसाधनत्वादिप्रकारकधात्वर्थविशेष्यकशाब्दबोधोदयात् ।

१. विधिविवेक- पृ.२४३, वाराणसी मेडिकल् हाल्नाम्नि मुद्रणालये प्रकाशितम्, १९६४

२. नञ्समभिव्याहृतबलवदनिष्टाननुबन्धित्वातिरिक्तलिङर्थप्रकारकशाब्दबोधे धातुजन्योपस्थितिः कारणम् इति द्वितीयः कार्यकारणभावः कल्प्येत ।

एवं नञः असमभिव्याहारे यजेत इत्यादौ लिङर्थत्रयप्रकारकधात्वर्थविशेष्यकशाब्दबोधोदयात् तदनुरोधेन-

३. नञसमभिव्याहृतलिङर्थप्रकारकशाब्दबोधे धातुजन्योपस्थितिः कारणम् इति तृतीयः कार्यकारणभावः कल्प्येत ।

एवं 'न पचति चैत्रः' इत्यादौ लिङतिरिक्तलकारसमभिव्याहृतनञसमभिव्याहारे 'पाकानुकूलकृत्यभाववांश्चैत्रः' इति नञर्थप्रकारबोधोदयात् लिङसमभिव्याहृतनञर्थप्रकारकशाब्दबोधे प्रथमान्तपदजन्योपस्थितिः कारणम् इति चतुर्थः कार्यकारणभावः अङ्गीक्रियेत ।

एवं 'न कलञ्जं भक्षयेद्' इत्यत्र बलवदनिष्टाननुबन्धित्वस्य लिङर्थस्य नञर्थाभावे, तस्य च धात्वर्थभक्षणादौ अन्वयेन नञर्थाभावप्रकारकधात्वर्थविशेष्यकबोधोदयात् लिङसमभिव्याहृतनञर्थ-प्रकारकशाब्दबोधे धातुजन्योपस्थितिः कारणम् इति पञ्चमः कार्यकारणभावः उररीक्रियेत ।

एवं 'चैत्रः पचति' इत्यादौ 'पाकानुकूलकृतिमाँश्चैत्रः' इति आख्यातार्थप्रकारकप्रथमान्तार्थ-विशेष्यकशाब्दबोधोदयात् नञसभिव्याहृताख्यातार्थकृतिप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः इति षष्ठः कार्यकारणभावः अभ्युपगम्येत ।

एवं 'न पचति चैत्रः' इत्यत्र आख्यातार्थकृतेः नञर्थाभावे प्रकारतया अन्वयात् पाकानुकूलकृत्यभावः इति बोधोदयात् तदनुरोधेन नञसमभिव्याहृताख्यातार्थकृतिप्रकारकशाब्दबोधे नञपदजन्योपस्थितिः कारणम् इति सप्तमः कार्यकाणभावः कल्प्येत । इष्टसाधनत्वस्यैव लिङर्थत्वे तु ईदृशसप्तविधकार्यकारणभावानङ्गीकारप्रयुक्तं लाघवमेव अस्ति । किन्तु नञ्समभिव्याहारस्थले लिङः लक्षणया अनिष्टसाधनत्वम् अर्थः । नञसमभिव्याहारे तु इष्टसाधनत्वम् इत्येवार्थः अङ्गीक्रियते । अतः लिङः इष्टसाधनत्वम् इत्यर्थे न कापि विप्रतिपत्तिः अस्ति ।

**परामृष्टग्रन्थाः**

१. खण्डदेवभावप्रकाशः पेरीसूर्यनारायणशास्त्री, राजमहेन्द्रि, १९८५
२. तर्कताण्डवः श्रीव्यासतीर्थाः, द्वैतवेदान्ताध्ययनसंशोधनप्रतिष्ठानम् २००३
३. वैयाकरणभूषणसारः कौण्डभट्टः, श्रीवेङ्कटेशशबरवेदविश्वविद्यालयः २००६

***

# भाषाधिगमस्य विकासोपाया

**आनन्द सि.आर्.**
**शोधच्छात्रः, पूर्णप्रज्ञसंशोधनमन्दिरम्,**
**राष्ट्रियसंस्कृतसंस्थानस्य केन्द्रम्,**
**बेङ्गलूरु, कर्णाटकम्**

**प्रस्तावना** -

कस्यचिद्विचारस्य अवगमस्तस्य पुनर्निरूपणसामर्थ्याधारेण निर्धार्यते । विचारस्य पुनर्निरूपणं प्रधानतया द्विधा भवितुमर्हति । इमे द्वे स्तः- वाचनं तथा लेखनमिति । कौशले द्वे चेमे अन्तर्भवतः अभिव्यक्तिकौशले । तदर्थं साहाय्यं करोति ग्रहणकौशलं यत्र च भाषणस्य पठनस्य च कौशलयोः उपस्थितिर्भवति । अधिगतस्य विचारस्य निमित्तं भाषाप्रमुखमाध्यमत्वेन उपयुज्यते । अस्याः भाषाया अधिगमस्य प्रमुखता भवति भाषाकौशलचतुष्टयसम्पादने । चत्वारीमान्यपि कौशलानि भाषाधिगमे सम्यगुपयुक्तानि चेत् भाषाया अवगतौ विकासोऽपि भवेत् । अतः भाषाधिगमस्य विकासोपायाश्चेत् भाषाकौशलानां प्रयोगद्वारा साधनीयः भाषाविकासः । तद्विषये किञ्चिदत्र प्रस्तूयते ।

LSRW इति प्रख्यातस्य सूत्रस्य आधारेण श्रवण-भाषण-पठन-लेखनानां क्रमिकाणां सोपानानां सम्पादनमेव भाषाभ्यासस्य क्रमिकाणि सोपानानि ।

निर्दिष्टेषु उद्देशेषु प्रगतिं साधयितुं कौशलानामवश्यमभ्यासभवेदेव । भाषाध्ययनस्य सामान्यानाम् उद्देशानां साधनाय एतेषां भाषाकौशलानां सम्यग् अभ्यासः स्यादेव । मातृभाषाया अध्ययने शिशुर्वा नूतनो वा कश्चित् आरम्भे अर्थम् अजानन्नपि अन्यैरुक्तं श्रुत्वा तदेवानुकर्तुं यतते इत्येतस्य आधारेण चतुर्णामपि कौशलानां मूलत्वेन श्रवणकौशलं परिगण्यते ।

अत एव भाषाशास्त्रविदुषामभिप्रायः श्रवणं भाषणं पठनं लेखनञ्चेति चत्वारि कौशलानि एव भाषाभ्यासस्य क्रमिकाणि सोपानानि इति । अतस्तेषां चतुःकौशलानां विकासस्य अभ्यासस्य दृष्ट्या केचन अभ्यासा अग्रे प्रस्तूयन्ते ।

**(अ) श्रवणकौशलाभ्यासः**

भाषाया ग्रहणं प्रायः श्रवणेन एव भवति । अत्र केवलं तस्य कौशलस्य संवर्धनाभ्यासदृष्ट्या अवधानपूर्वकश्रवणस्य भाषाभ्यासौ निरूप्येते ।

### १. मुद्रितरूपमनुसृत्य श्रुत्वा परिष्करणम्

अस्मिन् अभ्यासे श्रवणकुतूहलतावर्धनं श्रवणसमये अवधानवर्धनं च उद्देशः । आदौ शिक्षकः सर्वेभ्यः छात्रेभ्यः निश्चितस्य गीतस्य श्लोकस्य कथायाः वा मुद्रितप्रतिकृतिं वितरति- यत्र मूलस्य मध्येमध्ये केचन शब्दाः परिवर्तिता भवन्ति । प्रतिकृतिं हस्ते गृहीत्वा छात्राः ध्वनिमुद्रणयन्त्रद्वारा कम्प्यूटर्यन्त्रद्वारा वा पूर्वमेव ध्वनिमुद्रितं गीतं श्लोकं कथां वा शृणुयुः । तत्र परिवर्तितानि यानि पदानि तानि छात्राः ध्यानेन श्रवणसमये स्वपत्रे अङ्कयेयुः इति शिक्षकस्य सूचनामनुसृत्य तदनुगुणं वर्तेरन् । अनेन श्रवणसमये अवधानताया संवर्धनं साध्यं भाषाभ्यासी श्रवणकुतूहलतामपि आप्नोति ।

### २. संवादश्रवणद्वारा प्रश्नवैविध्यस्य उत्तरणम्

श्रवणवेलायामवधानताया वर्धनमत्र उद्देशः । भाषाभ्यासे अवधानपूर्वकश्रवणाभ्यासाय किमपि नाटकसम्भाषणं संवादो वा छात्रेभ्यः श्रावणीयम् । श्रवणात् पूर्वमेव अपेक्षिताः सूचनाः प्रदेयाः ।

सम्भाषणश्रवणानन्तरं पूर्वमेव सज्जीकृता प्रश्नावली उत्तरणाय देया । यत्र च एकेन शब्देन उत्तरलेखनम्, सत्यासत्यवाक्यानाम् अङ्गीकरणं निराकरणं वा, सत्यासत्यवाक्यानां सकारणं विश्लेषणम् इत्यादि अभ्यासा भवितुमर्हन्ति ।

### (आ) भाषणकौशलाभ्यासः

संस्कृताध्ययने भाषणकौशलमासादयितुं संस्कृतभारती-संघटनेन सञ्चाल्यमानस्य सम्भाषणशिबिरस्य पाठ्यबिन्दूनां ज्ञानं नितरामुपकरोति । परन्तु ज्ञानमात्रेण सम्भाषणकौशलं न सिद्ध्यति इति तु अवगन्तव्यम् । तदर्थं निरन्तरम् अभ्यास एव अपेक्षितो वर्तते ।

सतताभ्यासेन संवादकौशले धारा प्रवाहिता साध्या । भाषणकौशलस्य उद्देश न केवलं दैनन्दिनव्यवहारनिर्वाहः । तदतिरिक्ता उद्देशा अपि कौशलस्यास्य भवन्ति । तत्रापि यथा कथञ्चित् न, अपितु सर्वावगमयोग्यया रीत्या भाषणं कृतं चेदेव व्यवहारनिर्वाहः सुखेन सिद्ध्यति । दोषरहितया भाषया भाषणम्, तर्कसङ्गतत्वेन भाषणम्, श्रोतॄणाम् आसक्तिवर्धकतया कथनम्, धैर्येण भाषणम्, स्वाभिलषितस्य विषयस्य स्वरसतापूर्वकं निरूपणम्, विषयप्रतिपादने तदनुकूलानामेव पदानां सुष्ठुप्रयोग इत्यादयोऽपि तस्य उद्देशा भवन्ति ।

अत यदा भाषणकौशलविकासाय उपायाश्चिन्त्यन्ते तदा सम्भाषणाभ्यासद्वारा, कथाकथनद्वारा,

चित्रविवरणद्वारा, नाटकाभिनयद्वारा भाषाक्रीडानाम् इत्यादीनां च द्वारा कौशलवर्धनस्य उपायाश्चिन्त्याः । तत्र चितौ उदाहरणाभ्यासावत्र निरूप्येते ।

### १. मित्रस्य गुणप्रकटनम्

कक्ष्यायां स्थितेषु छात्रेष्वन्यतमः तस्य स्वमित्रस्य गुणानां प्रकटनं कृत्वा, कुतो वा तस्मै सगुणो भृशं रोचत इति सकारणं निरूपयितुं शिक्षकः सूचनां दद्यात् । आत्मना इष्टं विषयं निरूपयितुं भाषणद्वारा यतन्ते छात्राः यदा तदा आवश्यकं चेत् अध्यापकः भावप्रकटने सहयोगं दत्वा साहाय्यं कर्तुमर्हति ।

### २. चित्रस्य आधारेण प्रश्ननिर्माणम्

कक्ष्यायां गणश इदं कार्यं कारयितुं शक्यम् । विभक्तेषु गणेषु प्रतिगणं भिन्नं भिन्नं चित्रं दत्वा शिक्षकः समयनिर्बन्धं सूचयेत् । निर्दिष्टे समये गणस्य सदस्या अधिकाधिकान् प्रश्नान् पृच्छेयुः । साधुतराः प्रश्नाः यस्मिन् गणे निर्मीयन्ते तस्य गणस्य विजयो घोष्यते ।

इत्थमाचरिता अनेके अभ्यासाः भाषणकौशलवृद्धौ सहकुर्वन्ति ।

### (इ) पठनकौशलाभ्यास

पठनक्रियायां साङ्केतिकलिपीनां द्वारा तत्रत्यस्य शब्दस्य साधूच्चारणपूर्वकं तदभिव्यज्यमानस्य अर्थस्यापि ग्रहणं भवति । नकेवलं शब्दार्थस्य, अपितु तत्रत्यानां वाक्यानां वाक्यपुञ्जस्य च अर्थग्रहणमपि तत्र तावदेव प्रामुख्यमावहति । 'पठ= व्यक्तायां वाचि' इति धातोः निष्पन्नस्य 'पठन'शब्दस्य यद्यपि वाचनार्थ एव सुव्यक्तस्तथापि भाषोपलब्धिकः भाषाकौशलान्तर्गतः 'पठन'शब्द अर्थग्रहणपर्यन्तमपि अर्थम् आवहति ।

संस्कृतपठनकौशलं वर्धनीयश्चेत् प्रमुखाः केचन अंशाः स्मर्तव्याः । पठनकौशलं पठनादेव सिद्ध्यति, ग्रन्थालयस्य आधुनिककालस्य अन्तर्जालमाध्यमे इ-पुस्तकस्य च सदुपयोगो भवेत्, संस्कृतसाहित्यस्य अधिकाधिकम् अध्ययनं भवेत् इत्यादि । एभिः अंशैः सहपठनकौशलाभिवृद्ध्यर्थं चितावेव द्वौ अभ्यासौ अत्र प्रस्तूयेते ।

### १. सदृशवर्णानां शुद्धपठनम्

देवनागरीलिप्या लेखने केषाञ्चित् वर्णानां लिपिगतं साम्यं निमित्तीकृत्य छात्राः पठनावसरे दोषमाचरन्ति । तं दोषं निवारयितुमयमभ्यासः सहकरोति ।

ययोर्वर्णयोः साम्याधिक्यं स्यात् तादृशाभ्यां वर्णाभ्यां सहितं शब्दं पूर्वमेव विलिख्य शिक्षकः कक्ष्यां गच्छेत् । तत्र छात्रेभ्यः सेकेण्ड्-द्वयस्य त्रयस्य वा कालनिर्बन्धं सूचयित्वा, तदभ्यन्तरे लिखितं शब्दरूपं सुष्ठु पठितुं सूचना देया । एकैकस्य शब्ददर्शनेनापि छात्रैः सुष्ठु साधुरूपम् अभिज्ञातव्यम् । एवं अभ्यासो भवेत् ।

### २. द्वितीयरूपान्वेषणम्

शिक्षकः काँश्चिच्छब्दान् पूर्वमेव चिनुयात् । तेषां शब्दानां लेखनदोषसहितानाम् अन्येषामपि शब्दानां संग्रहं कृत्वा पकिानिर्माणं कुर्यात् । 'अ'भागे समीचीनानि पदानि, 'ब'भागे लेखनदोषसहितानि त्रीणिपदानि, समानं निर्दोषं समीचीनं रूपमेकम् इत्थं चत्वारि पदानि निवेश्य ककक्ष्यां प्रति नयेत् । पश्चात् सूचनां दद्यात् यत् अभागस्य समानं निर्दोषं रूपं तदर्थं निश्चिते काले एव छात्र बभागात् अन्विष्येत् । निर्दिष्ठे समये यः छात्रः समीचीनं रूपमन्विष्यति तस्मै प्रोत्साहनाय प्रशंसावचनानि पुरस्कारं वा घोषयितुमपि अर्हति शिक्षकः ।

इत्थं पठनकौशलवृद्ध्यर्थं विविधा अभ्यासाः साहाय्यं कर्तुमर्हन्ति ।

### (ई) लेखनकौशलाभ्यासः

लिपिज्ञानवतामपि स्वाभिलषितविषयप्रकाशनरूपं किमपि लेखितुं क्रमबद्धः सुव्यवस्थितश्च अभ्यास अपेक्षयत एव । सरलात् कठिनं प्रति इति नियमाधारेण अधिकचिन्तनं विना कर्तुं योग्याः वाक्य-रचनाधारिताः अभ्यासा आरम्भे शिक्षकेण कारयितुं शाक्यते । तत्पश्चात् क्रमशः चिन्तनपुरस्सरं लेखनयोग्यान् अभ्यासान् अपि छात्राः यथा कर्तुं शक्नुयुः तथा शिक्षकः तेषां कौशलविकासं सम्पादयेत् । तदनुकूलम् अभ्यासद्वयम् अग्रे प्रस्तूयते

### १. परिचितानां बान्धवानां वा निश्चितसमयकार्यस्मरणम्

शिक्षकः निश्चितं समयं सूचयित्वा (उदा पूर्वाह्णे ९.००) छात्रान् उद्दिश्य अस्मिन् समये भवत्परिचिताः बान्धवाः वा सामान्यतः किं कुर्वन्ति इति लिखन्तु । एकैकोऽपि न्यूनातिन्यूनं दशजनानां विषये लिखतु इति सूचयेत् । तद्द्वारा छात्राः स्वाभिलषितं वाक्यम् अभिव्यञ्जयितुं शिक्षकः प्रोत्साहयेत् । छात्राः तस्मिन् सूचिते समये तेषां परिचिताः बान्धवाः वा किं कुर्वन्ति इति वाक्यरूपेण विवरणरूपेण वा निरूपयन्ति ।

## २. परस्परसम्भाषणलेखनम्

शिक्षकः तादृशानि चित्राणि सङ्गृह्णीयात् यत्र जनद्वयस्य सान्दर्भिकं सम्भाषणं प्रचलति । गणशः छात्राणां विभागं कृत्वा शिक्षकः प्रत्येकस्मिन् गणे एकैकं चित्रं वितीर्य गणीयाः सर्वे सावधानतया तत् चित्रं दृष्ट्वा तयोर्जनयोर्मध्ये प्रवर्तमानं सम्भाषणं कीदृशं स्यात्, कानि वाक्यानि भवितुम् अर्हन्ति इति विचिन्त्य चर्चां कृत्वा लिखन्तु इति सूचयेत् । केषाञ्चित् निमेषाणां पश्चात् प्रतिगणं द्वौ आगत्य तत् संभाषणं नाटकरूपेण अभिनयं कृत्वा प्रदर्शयितुमपि सूचयेत् ।

**उपसंहारः-** भाषाधिगमे उपरि निर्दिष्टानां कौशलानां पौर्वापर्यम् इत्थमेव भवेत्, नान्यथा । आदौ श्रवणं तत्पश्चात् भाषणम् इत्येतत् सर्वेषामपि अनुभववेद्यम् । अत अत्र नास्ति काऽपि विप्रतिपत्तिः ।

अस्य प्रतिपादनस्य भावस्तु सुस्पष्टो यत् चतुर्षु कौशलेषु अन्यतमस्य अन्यतमयोर्वा त्यागे कृतेऽपि भाषाशिक्षणं साकल्येन कृतमिति न भवति । ये तथा त्यागपूर्वकमधीतवन्तो भाषां ते तु अवश्यं भाषां सम्पूर्णतया नाधीतवन्त इत्येवमति । इत्थं वास्तविकं संस्कृतभाषाशिक्षणं चतुः-कौशलाभ्यासोपेतं सत् चतुर्णामपि कौशलानाम् अभ्यासाय विकासाय च समानप्राधान्यसहितं भवेत् ।

आधारग्रन्थसूची -

१. कानाल, नलचक्रवर्ती - संस्कृताध्यापनम्, श्री वेङ्कटाम्बापब्लिकेशन्स्, तिरुपति
२. के.श्रीनिवासाचार्यः - संस्कृतभाषात्रिंशद्दिनेषु, बालाजी पब्लिकेशन्स्, चेन्नै, २००१.
३. कम्भम्पाटि, साम्बशिवमूर्तिः - संस्कृतशिक्षणम्, २००६.
४. झा, उदयशङ्करः - संस्कृतशिक्षणम्, चौखाम्बासुरभारतीप्रकाशन, वाराणसी, २०११.
५. दहिया, यज्ञवीर - संस्कृतभाषादर्शनम्,भारतीयविद्याप्रकाशन, दिल्ली, २००१.
६. नरेन्द्र - संस्कृतस्यव्यावहारिकस्वरूपम्, श्री अरविन्दाश्रम, पुदुच्चेरी, १९९६.
७. मित्तल, सन्तोष - नवाचारा, नवचेतनापब्लिकेशन्स्, जयपुरम्, २००६.
८. मिश्र, रमाकान्त - शैक्षणिकविधि,चौखाम्बाविद्याभवन्, वाराणसी, २००६.
९. विश्वासएच्.आर्. - कौशलबोधिनी, प्रकाशनम्-संस्कृतभारती, नवदेहली, प्रथममुद्रणम्- २००५, ISBN ८१-८७२७६-२५-८.

*****

# भासकृतिषु स्त्रीविचारः

**बि.ए.नरसिंहय्यः**
विद्यावारिधिशोधच्छात्रः,
पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गळूरु

मार्चमासस्य अष्टमे दिनाङ्के विश्वमहिलादिनम् आचर्यते । अधुनातन- काले स्त्रीणां स्थानमानादिविषये बहुचर्चा प्रवलति । स्. त्.र्. इति त्र्यक्षराणां समूहः स्त्री इति पदं प्रकृतिस्वरूपा स्त्री पुरुषेषु विद्यमानान् त्रिगुणान् जागरयितुम्, उद्बोधयितुं च कारणकत्री भवतीति शास्त्रकाराः वदन्ति ।

**'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः'**[१]

इत्यादिकान्युदात्तवचांसि दत्तवति भारतदेशेऽस्मिन् मन्वादिमहर्षयः भासकालिदासादिकवयश्च स्त्रीणां विषये स्वीयाभिप्रायान् प्रकटीचक्रुः भिन्नभिन्नग्रन्थद्वारा । तादृशेषु महनीयेषु 'भासो हास' इति प्रशंसापात्रतां गतस्य प्राचीनकविष्वन्यतमस्य भासस्य नाटकचक्रेषु स्त्रीराणां पात्राणि कथं चित्रितानीति विषयं विषदीकर्तुं कश्चन प्रयासः क्रियमाणोऽस्त्यत्र ।

**सूत्रधारकृतारम्भैः नाटकैर्बहुभूमिकैः ।**
**सपताकैर्यशो लेभे भासो देवकुलैरिव**[२] **।।**

इति महाकविना बाणभट्टेन प्रशंसितः भासः नाटकरचनाकलायाम् अत्यन्तं निपुण इति प्रथां गतोऽस्ति । नाटकरचनाकलायाम् अतीव प्रमुखमङ्गं भवति चरित्रचित्रणकला । कलायामस्यां सिद्धहस्तो भासः स्वीयकृतिषु देवपात्राणां तथा मानवपात्राणामपि चित्राणि मनोवैज्ञानिकरीत्या सामाजिकीत्या व समेषां चित्ताकर्षणशैल्या चित्रयित्वा सहृदयानां हृन्मन्दिरेषु चिरं स्थानमवाप । न्यूनातिन्यूनं २३० भिन्नभिन्नानि पात्राणि चित्रितानि अमुना ।

कालिदासस्य काल्पनिकता, भवभूतेः,भावुकता, शूद्रकस्य प्रतिभायुक्तस्वाभाविकतादिगुणोपेतः भासः स्वीयया अतिविशिष्टया शैल्या नाटककलायां सर्वान् अतिशेते ।

सर्वं परमपूज्यया मातृभावनया द्रष्टुं भारतीयपरम्परा जनान् प्रेरयति । एतेन दुष्टचिन्तनार्थं लेशतोऽप्यवकाशो न भवति । भक्तिप्रीत्यादरत्यागादीनां सद्गुणानां प्रेरयित्री माता देवतास्वरूपा इति भावना सर्वेषां मनस्सु सदा स्थिता भवति । गोमाता, भूमाता, प्रकृतिमाता, भारतमाता

इत्यादिव्यवहारः जनानां चित्तानि विमलीकरोति । ईदृशं विचारं द्योतयता भासेन मध्यमव्यायोगे उक्तमेवम्—

**'माता किल मनुष्याणां दैवतानां च दैवतम्'**[३] इति ।

**'कुपुत्रो जायेत क्वचिदपि कुमाता न भवति'**[४] इति भगवत्पादैः शङ्कराचार्यैः उक्तम् । ईदृशं विचारं भासः—

**'का नाम माता पुत्रकस्यापराधं न मर्षयति'**[५] इति वदति ।

मातृविषये अतीवगौरवभावनां धारयन् भासः एवमलिखत् **'हस्तपस्पर्शो हि मातॄणाम् अजलस्य जलाञ्जलिः'**[६] इति ।

अभिषेकनाटके तु रामः कैकेय्याः वरयाचनविचारं वक्तुमिच्छति तदा एव रामः (?) तं निवारयन् **'न मातुः परिवादं श्रोतुमिच्छामि'**[७] इति वदति ।

विवाहकाले मातॄणां मनः आर्द्रं भवति इति विचारं प्रकाशयन् प्रतिज्ञायौगन्धरायणे नाटके राजपात्रद्वारा एवं वाचितम्— **'दुहितुः प्रदानकाले दुःखशीला हि मातरः'**[८] इति ।

**अदत्तेत्यागता चिन्ता दत्तेति व्यथितं मनः ।**
**धर्मस्नेहान्तरे व्यस्ता दुःखिता खलु मातरः ।।**[९]

अतः स्नेहदुर्बलाः मातरः सदाऽपि रक्षार्हाः इति विचारे यौगन्धरायणः **'स्नेहदुर्बलं मातृहृदयं रक्ष्यम्'**[१०] इति वदति ।

'अस्त्रीनिमित्तसङ्ग्रामो.......'[११] इति नाटकलक्षणं दशरूपकम् इति ग्रन्थे लिखितम् । तादृशगुणोपेतेष्वन्यतमे मध्यमव्यायोगे भासः हिडिम्बायाः पात्रं बहुसम्यक् चित्रितवान् । साध्वीलक्षणयुता हिडिम्बा पतिं प्राप्तुम् उपायं कृतवती । भर्तारं दैवमिति भावयन्ती सा पुत्रं घटोत्कचमेवं वदति **'उन्मत्तक दैवतं खल्वयम्'**[१२] । यदा सा 'मानुषानयनतात्पर्यं (भर्तुः) भीमस्य कर्णे वदति तदा भीमः **'जात्या राक्षसी न समुदाचारेण'**[१३] इति भणति ।

**'अर्थो हि कन्या परकीय एव'**[१४] इति कालिदासः विवाहानान्तरं कन्या पतिमनुसरेत् पतिधर्मं

च पालयेत् इति विचारं ज्ञापितवान् । भासस्य ब्राह्मणीपात्रेणापि पतिधर्मविषये उक्तमेतत् - **'पतिमात्रधर्मिणी पतिव्रतेति नाम । गृहीतफलेनैतेन शरीरेण आर्यं कुलं च रक्षितुमिच्छामि'**[१५]

पतिः पत्नीरूपज्योत्स्नया भाति इत्यर्थे मध्यमव्यायोगनाटके ब्राह्मणपात्रद्वारा एवं वाचितम् **'पत्नीकान्तप्रभः'** इति । घटोत्कचोऽपि स्वपरिचयावसरे **'भीमेन पूर्णेन द्यौरिवेन्दुना'**[१६] इति कतथयति । भीमः हिडिम्बामुद्दिश्य वक्ति - **'अस्माकं भ्रष्टराज्यानां भ्रमतां गहने चने । जातकारुण्यया देवि ! सन्तापो नाशितस्त्वया'**[१७] ।। अत्र भासेन 'कान्ता पत्युः सन्तापं नाशयति' इति स्त्रीणामुदात्तस्वभावः प्रकाशितः ।

प्रतिमानाटके भरतद्वारा भासः पतिधर्मविषये एवं वाचयति-

**'लोकेऽपूर्वं स्थापयाम्येव धर्मं भर्तृद्रोहादस्तु माताऽप्यमाता'**[१८] (प्र.ना.३.१८)

पतिव्रताधर्मविषये अतीव महत्वं दत्तवान् भासः । **'भर्तृनाथा हि नार्यः'**[१९] इति आशयः भासस्य । स च सीताया विषये रावणपात्रद्वारा एव एवं प्रकाशयति-

**इयमेषा पृथिव्यां हि मानुषीणामरुन्धती**[२०] ।। प्रतिमा ५.८ ।।

स्त्रीणां पतिव्रताधर्मे महती शक्तिः भवति सा च अतीवशक्तिमति त्रिभुवनविजेतरि रावणेऽपि भयमुत्पादयति - यदा सीता 'शप्तोऽसि' इति वदति तदा रावणः —

**'देवाः सेन्द्रादयो भग्नाः दानवाश्च मया रणे ।**
**सोऽहं मोहं गतोऽस्म्यद्य सीतायास्त्रिभिरक्षरैः ।।'**[२१] अभिषेक. ।।

रामायणे सीता रामस्य वनवाससन्दर्भे एतानि वचनानि वदति -

**'स्वयं तु भार्यां कौमारीं चिरमध्युषितां सतीम् ।**
**शैलूष इव मां राम परोभ्यो दातुमिच्छति'** ।।[२२] रा. अयोध्या. ।।

किन्तु भासः प्रतिमानाटके सीतायाः अतीवसरलस्त्रीस्वभावं प्रदर्शयन् केवलम् एतावदेव वाचयति-

**'प्रियं मे महाराज एव महाराजः । आर्यपुत्र एवाऽर्यपुत्रः'**[२३] ।। प्रतिमा. ।।

रामायणे कैकेय्याः विषये वाल्मीकिना एवं चित्रितम् -

‘**आगतः क्रूरकार्यायाः कैकेय्याः भरतः सुतः**’[२४] ।। अ.का. ७५.६ ।।

अत्र तु भासः तादृशानि पदानि एव न प्रयुङ्क्ते अपि तु कैकेयीं साध्वीरुपेण चित्रितवान् । ऋषिशापः रामं वनवासं प्रति प्रेषयितुं कैकेयीं प्रेरयति इति भासः प्रदर्शयति ।

‘**कुपरिहरणीयो महर्षिशापः पुत्रविप्रवासं विना न भवति ।।**’[२५] प्र.ना. ।।

गुणस्वभावादीन् दृष्ट्वा एव स्त्री पुरुषो वेति निश्चेतव्यः । **गुणाः पूजास्थानां गुणिषु न च लिङ्गं न च वयः** इति विचारं समर्थयन् भासः एवं प्रतिपादयति -

‘**रूपेण स्त्रियः कथ्यन्ते पराक्रमेण तु पुरुषाः**’[२६] ।। पञ्चरा. ।।

स्त्रीजनाः सर्वथा वध्यार्हाः नैव इति ‘**अवध्याः स्त्रिय इत्याहुर्धर्मज्ञाः धर्मनिश्चये**’[२७] इति शास्त्रविषयं घटोत्कचपात्रद्वारा ज्ञापयति एवं प्रकारेण -

‘**न खलु स्त्रीजनोऽभिमतस्तत्रभवत्या**’[२८] इति ।

‘**अवश्यं स्त्रीवधो न कर्तव्यः**’[२९] अभिषेक. ।। ५.१६.१७ ।।

अतः भासः स्त्रियः सदाऽपि रक्षणीयाः इति निरूपयन् मध्यमव्यायोगे घटोत्कचः यदा मातुः हिडिम्बायाः पारणार्थं ब्राह्मणकुटुम्बसदस्येष्वन्यतमं नेतुमिच्छति तदा ब्राह्मणी - **पतिमात्रधर्मिणी पतिव्रतेति नाम ।** इति वदति । अयं च पतिव्रतास्त्रीधर्मः —

कथितश्चैवम् - **नास्ति स्त्रीणां पृथग् यज्ञो न व्रतं नाप्युपोषितम् ।**

**पतिं शुश्रूषते येन तेन स्वर्गे महीयते ।।**[३०] मनु. ।।

यदा **ब्राह्मणी - गृहीतेन फलेनैतेन शरीरेणार्यं कुलं च रक्षितुमिच्छामि ।** इति स्वात्मानम् अर्पयितुं सिद्धा भवति तदा घटोत्कचः -

**न खलु स्त्रीजनोऽभिमतस्तत्रभवत्या ।**[३१]

‘**अवध्याः स्त्रिय इत्याहुर्धर्मज्ञा धर्मनिश्चये**’[३२] ।। महा.भा.आदि. ।।

**'स्त्री वैषा यच्छ्रीर्न वै स्त्रियं घ्नन्त्युत त्वस्या जीवन्त्या एव ददत' ।। शतपथब्राह्मणः।।**[३३]

**स्त्रियो ह्यवध्याः सर्वेषां ये च धर्मविदो जनाः ।।**[३४]

**अवध्यास्तु स्त्रियः सृष्टा मन्यन्ते धर्मचारिणः ।।**[३५]

**सर्वथा स्त्री न हन्तव्या सर्वसत्वेषु केनचित् ।।**[३६]

इति वेदादिषूक्तविचारं स्मारयन् भासः घटोत्कचद्वारा एवं वाचयति - यद्यपि हिडिम्बा राक्षसी तथाऽपि सा स्त्रीजनम् आहाररूपेण न इच्छति । स्त्रियः सदाऽपि रक्षणीयाः एव इति भावः तत्र अभिव्यज्यते ।

उक्तं हि — **बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने ।**
**पुत्राणां भर्तरि प्रेते ..... ।।**[३७]

ये स्त्रीजनान् पीडयन्ति, घ्नन्ति वा तादृशाः राज्ञा दण्ड्या भवन्ति इति विचारः शास्त्रेषु सुस्पष्टं प्रतिपादितः ।

यथा - **स्त्रीहन्तॄंश्च न संवसेत्**[३८] ।।
**स्त्रीबालब्राह्मणघ्नांश्च हन्याद्द्विट्सेविनस्तथा**[३९] ।।

एतावदेव नैव किन्तु भासः स्वीय नाटकचक्रेषु स्त्रीणां विचारे अतीवगौरवं प्रकटयन् सहृदयजनाः सर्वेऽपि स्त्रीणां विषये पावित्र्यं भावम् आवहेयुः तेन मोक्षमाप्नुयुः इति उदात्तधिया स्त्रीपात्राणि चित्रितवान् ।।

**END NOTES :**

१. मनुस्मृतिः -३.५३
२. हर्षचरितम् - १.१५
३. मध्यमव्यायोगः - १.३७
४. देव्यपराधक्षमापनस्तोत्रम् -३
५. प्रतिमानाटकम् - ६.१५,१६
६. प्रतिमानाटकम् - ३.१२
७. प्रतिमानाटकम्-१.१५,१६
८. प्रतिज्ञायौगन्धरायणम् -२.५
९. प्रतिज्ञायौगन्धरायणम्-२.७
१०. प्रतिज्ञायौगन्धरायणम्-१.१२
११. दशरूपकम् - ३.६१
१२. मध्यमव्यायोगः -१.५०
१३. मध्यमव्यायोगः - १.४९
१४. अभिज्ञानशाकुन्तलम् - ४.२२

१५. मध्यमव्यायोगः - १.१५
१६. मध्यमव्यायोगः - १.३९
१७. मध्यमव्यायोगः-१.४९
१८. प्रतिमानाटकम् - १.१५
१९. प्रतिमानाटकम् - १.१५
२०. प्रतिमानाटकम् -१.५
२१. अभिषेकनाटकम्- २.१८
२२. रामायणम् - अयोध्या.का. ३०.१.७
२३. प्रतिमानाटकम्-१.७,८
२४. रामायणम् - अरण्यकाण्डम्- ७५.६
२५. प्रतिमानाटकम् - ६.१५,१६
२६. पञ्चरात्रम् - ३.८
२७. महाभारतम्-आदिपर्व -१५८.३१
२८. मध्यमव्यायोगः - १.१५
२९. अभिषेकनाटकम् - ५.१६,१७
३०. मनुस्मृतिः - ५.१५५
३१. मध्यमव्यायोगः - १
३२. महाभारतम् - आदिपर्व - १५८.३१
३३. शतपथब्राह्मणः - ११.४.३.२
३४. महाभारतम् - वनपर्व - २०६.४५
३५. महाभारतम् -आदिपर्व -२१७.४
३६. महाभारतम् - शान्तिपर्व - १३४.१५
३७. मनुस्मृतिः - ५.१५८
३८. मनुस्मृतिः -११.१९०
३९. मनुस्मृतिः - ९.२३२

*****

# अहिंसास्वरूपविमर्शः

- श्रीनिधिप्याटि
शोधकः, षड्दर्शनकोशः,
पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

जगतीतले व्दिमानाः नैकमतानुयायिनः नैकमताचार्याः नैकविषयेषु विवदमानाः सन्तीति सुविदितम् । यथा जगत् सत्यं वा मिथ्या वा ? ब्रह्म सगुणम् उत निर्गुणं वा? वेदाः प्रमाणं न वा, देवाः सन्ति न वा, इत्यादि । नैकविचारेषु विभिन्नदृष्टिपन्थानम् अनुसरन्तोऽपि एते विषयमेकम् एकीभूय उद्घोषयन्ति'[१] 'अहिंसा परमो धर्मः' इति । श्रूयते च अहिंसायाः माहात्म्यम् अग्निपुराणे-

[२]भूतापीडा ह्यहिंसा स्यात् अहिंसा धर्म उत्तमः ।
यथा गजपदेऽन्यानि पदानि पथगामिनाम् ।
एवं सर्वमहिंसायां धर्मार्थमभिधीयते ।। इति ।

युद्धकाले समुद्भूतायामपि गीतायां नैकवारम् अहिंसाविषयः प्रतिपादितः ।[३] 'अहिंसा प्रथमं पुष्पं' इति अहिंसायाः प्राधान्यं निरूपितम् । [४]'अहिंसा सत्यमस्तेयशौचमिन्द्रियनिग्रहाः यमाः' इति यमेष्वपि प्रथमस्थानं अहिंसायाः प्रदत्तं वर्तते । उक्तं च अहिंसासामान्यलक्षणं कूर्मपुराणे-

[५]कर्मणा मनसा वाचा सर्वभूतेषु सर्वदा ।
अक्लेशजननं प्रोक्तमहिंसा परमर्षिभिः ।। इति ।

सा अहिंसा भारते विविधस्तरे आचरणे वर्तते । अस्य कारणं तु तत्सिद्धान्तगत-अहिंसास्वरूपभेदः । अतः तत्तत्सिद्धान्तगत अहिंसास्वरूपनिरूपणं लेखनेऽस्मिन् कर्तुं इच्छामि ।

## जैनमते अहिंसा

अहिंसायाः परमधर्मत्वं सर्वैः प्रायः अङ्गीकृतमेव । तथाऽपि तद्विषये अतीव निष्ठा जैनैः प्रदर्शिता इति सर्वैः अङ्गीक्रियते । तत्सूचनार्थमेव सर्वत्र महावीरस्य प्रतिमायाः अधः 'अहंसा परमो धर्मः' इति वाक्यं दृश्यते । जैनमूलग्रन्थे उमास्वामिविरचिते तत्वार्थसूत्रे हिंसालक्षणं भणितम्'[६] प्रमत्तयोगात् प्राणव्यारोपणं हिंसा' इति । अस्यार्थः इन्द्रियदोषः प्रमादः, तेन युक्तः प्रमत्तः, तादृशेन प्रमत्तेन

यथाकथमपि इन्द्रियाणां विनियोगकरणं हिंसा इत्युच्यते । मोक्षसाधनतया पञ्चविधसमितयः न्यरूपयत् जैनयोगशास्त्रकारः हेमचन्द्रसूरिः ।

१. ईर्यासमितिः २. भाषासमितिः ३. एषणासमितिः ४. अदानसमितिः ५. उत्सर्गसमितिः[७] इति । हेमचन्द्राचार्यः तदर्थान् व्याचष्टे । यत्र जनानां गमनागमनं बहु दृश्यते, तेन मार्गेणैव सञ्चारः कर्तव्यः । जनसमूहे सति तत्र प्राणिसञ्चारः न भवति अतः हिंसा निवर्तते । सूर्योदयादारभ्य सूर्यास्ताभ्यान्तरसमये एव सञ्चारः विहितः । तदतिरक्ते रात्रिसमये सञ्चारे क्रियमाणे आलोकाभावनिमित्तेन प्राणिनामुपरि पादनिक्षेपादिना प्राणिहिंसा भवति । प्रातः अपि यत्र जन्तवः न स्युः तत्रैव पादनिक्षेपादिकं कृत्वा गमनं कर्तव्यम् । एषा ईर्यासमितिः इत्युच्यते । तदेवोक्तम्-

[८]लोकातिविहिते मार्गे चुम्बिते भास्वदंशुभिः ।
जन्तुरक्षार्थमालोक्य गतिरीर्या मता सताम् ।। इति ।

भाषासमितेः लक्षणं तु उत्तमवाचा व्यवहारः, अपशब्दादीनाम् अप्रयोगः, सर्वजनहितकारि विषयप्रयोगः इत्येव वर्तते । तदेवोक्तं -

अवद्यत्यागतः सर्वजनीनं मितभाषणम् ।
प्रिया वाचयमानां सा भाषासमितिरुच्यते ।।[९]

द्विचत्वारिंशद्दोषैः विमुक्तं भिक्षान्नभोजनम् एषणासमितिरिति कथ्यते ।

तच्चोक्तम् -

द्विचत्वारिंशता दोषैर्नित्यमदूषितम् ।
मुनिर्यदन्नमादत्ते सैषणासमितिर्मता ।।[१०]

प्राणिपीडा यथा न स्यात् तथा आसने उपविश्य ध्यानकरणम्, तानि आसनादीनि ग्रहणसमये स्थापनसमये च रजोहरणादिना शुद्धीकरणं, तदनन्तरमेव तेषां उपयोगः आदानसमितिरिति उच्यते।

आसनादीनि संवीक्ष्य प्रतिलिख्य च यत्नतः ।
गृह्णीयात् निक्षिपेद्वा यत्सा दानसमितिस्स्मृता ।।[११]

कफमूत्रमलविसर्जनसमयेऽपि जन्तवः यत्र न स्युः, तादृशप्रदेशे जागरूकतया विसर्जनं उत्सर्गसमितिरिति कथ्यते ।

कफमूत्रमलप्रायैः निर्जन्तुजगतीतले ।
यत्नाद्यदुत्सृजेत्साधुः सोत्सर्गसमितिर्भवेत् ।।[१२]

परन्तु जन्तवः सर्वत्र सन्ति, उक्तश्च,

[१३]जले जन्तुः स्थले जन्तुः आकाशे जन्तुरेव च ।
जन्तुमालाकुले लोके कथं भिक्षुरहिंसकः ।।

इति स्वयमेव प्रश्नं कृत्वा तत्वार्थसूत्रटीकाकारः भास्करानन्दः समाधानमपि प्रदत्ते । जन्तवः द्विविधाः स्थूलाः सूक्ष्माश्च । जैनभिक्षवः सदा ध्यानज्ञानपरायणाः अतः इन्द्रियदोषनिमित्तेन तैः हिंसा न विधीयते । सूक्ष्माः जन्तवः अशरीरिणः इति तेषां हिंसा एव कर्तुं न शक्यते । एतादृशदोषविमुक्ताः एव मोक्षार्हाः । 'अप्रमत्तः स मोक्षार्हो नेतरो जैनशासने' । अन्ये निरयार्हाः इति जैनसिद्धान्तः । जिनदत्तसूरिणा जैनभिक्षुलक्षणमुक्तम् - 'सरजोहरणाः भैक्ष्यभुजः लुञ्छितमूर्धजाः' इति । ते हस्ते पिच्छीकां गृहित्वां सञ्चारसमये सूक्ष्मप्राणिनां गमनागमनं यथा न स्यात्, तथा करप्रसणादिपूर्वकं गच्छन्ति । स्वशरीरस्थकेशानपि केशोल्लुण्ठनं परमसुखमिति सुखैनैव निष्कासन्ति । यदि कर्तर्या वपनं क्रियते, तदा केशमध्यपतितप्राणीनां हिंसा स्यात् इति तेषाम् आचरणाभिप्रायः । सायाह्नानन्तरं ते भिक्षां न स्वीकुर्वन्ति । कौशेयं न धारयन्ति मधु न पिबन्ति । जैनानां एतादृशानि आचरणानि जगति बहु आयाससाध्यानि ।

**महाभारते अहिंसा**

'अहिंसा परमो धर्मः' इति वाक्यं भीष्मपर्वणि शरतल्पे शयानेन भीष्मेन भणितम् । तत्र अहिंसा विषये बहु चर्चा कृता वर्तते । अहिंसायाः चतुर्विधत्वं तत्र निरूपितम् १. कायिकी २. वाचिकी ३. मानसिकी ४. जैह्विकी चेति ।

**कायिक्यहिंसा -**

उद्देश्यं विना क्रोधाद् वा क्रीडार्थं वा प्राणिहिंसा न कर्तव्या । तदाह बृहस्पतिः

[१४]अहिंसकानि भूतानि दण्डेन विनिहन्ति यः ।
आत्मनः सुखमन्विच्छन् न स प्रेत्य सुखी भवेत् ।।

अतः आत्मसंरक्षणार्थं, हिंस्रपशूनां आक्रमणेन अन्येषां संरक्षणार्थं तेषां हननं युज्यते, न पुनः

विनोदार्थम् । अत एव दिलीपादिज्ञानिराजानः मृगयां प्रति गच्छन्ति स्म । अन्यथा वने हिंस्रपशूनामेव सङ्ख्या अधिकं भवति । यदा हिंस्रपशूनां सङ्ख्या वने अधिका भवति तदा ते वने आहारम् अप्राप्य समीपपल्लीस्थबहूपयोगिगोमहिषादीनां भक्षणं कुर्युः । अतः प्रकृतौ समत्वरक्षणार्थं मृगया इति प्रक्रियां आचरन्ति स्म । 'लिप्यते न हि दोषेण न चैतत् पातकं विदुः' इति विषयमेतत् समर्थितमपि । यत्सतां अत्यन्तहितप्रदं तादृशवाग्व्यापारः वाचिकी- अहिंसा इति गीयते । मनसाऽपि अन्येषां पापाचिन्तनं रागद्वेषाणां अनिग्रहणं मानसिकी - अहिंसा इति कथ्यते ।

**जैह्वीकी - अहिंसा -**

मासंसभक्षणं जैह्विकी हिंसा भवति । तच्चोक्तम् -

[१५]स्वमांसं परमांसेन यो वर्धयितुमिच्छति ।
नारदः प्राह धर्मात्मा नियतं सोऽवसीदति ।।

अतः यः अध्यात्मज्ञानं शास्त्रज्ञानं वा अर्जितुमिच्छति, तेन अवश्यं मासंसभक्षणं त्याज्यम् । ननु ऋषयः महाभारतादिकालेषु मासंभक्षणं चक्रुः, अथापि ते आध्यात्मिकौन्नत्यं प्रापतुः, अतः आध्यात्मसिध्यै मांसभक्षणत्यागः नानिवार्य इति केचन आक्षिपन्ति । सत्यम्, ऋषयः मांसभक्षणं चक्रुः परन्तु तदा मांसभक्षणं कृत्वापि आध्यात्मौन्नत्यसाधनसामर्थ्यं तेषाम् आसीत् । अथ च स युगान्तरविषयः सनातनपद्धतौ प्रतियुगं कालानुरोधेन विभिन्ना नियमाः धर्मशास्त्रे विहिताः । तदनुरोधेन विप्राणाम् आध्यात्मौन्नत्यमिच्छतां मासंसभक्षणं कलियुगे सर्वथा निषिद्धमेव । अन्यैरपि हिंसेति कारणतः त्याज्यं मांसभक्षणम् । ननु मया हिंसा न विधीयते, यः कोऽपि घातयति, मया तु मांसः केवलं भक्ष्यते, मम पापं नास्ति इति वादः मनसि जायते । तस्यापि उत्तरं महाभारते समुल्लिखितम् । वधः त्रिविधः भवितुमर्हति - १. यः धनेन मांसं क्रीणाति सः हन्ता २. यः खादति सोऽपि घातकः ३. यः घातयति बन्धयति सोऽपि हन्तकः । अन्यच्च

[१६]यदि चेत्खादको न स्यात् न तदा घातको भवेत् ।
घातकः खादकार्थाय तं घातयति वै नरः ।।

अतः यदि वयं न मांसं न भक्षयामः तर्हि हिंसा निवर्तते । अतः मांसभक्षणं न कर्तव्यं इति भावः । अन्यच्च कारणं निरूपितं मनुस्मृतौ-

[१७]मां स भक्षयते यस्मात् भक्षयितव्ये तमप्यहम् । इति मांसस्य मांसत्वम् ।।

अतः अभयनिमित्तेन वा पापनिमित्तेन वा अहिंसाव्रतरूपकारणेन वा मांसभक्षणा - अकरणं श्रेय इति महाभारताभिप्रायः ।

## पातञ्जलयोगशास्त्रे अहिंसा

योगसूत्रस्य साधनपादे यमनियमाः अवश्यम् अनुष्ठेया इति प्रतिपादितम् । [१८]'अहिंसासत्यमस्येयब्रह्मचर्यापरिग्रहाः' यमाः इति यमेषु अहिंसायाः प्रथमस्थानं प्रदत्तम् । तत्रैव अहिंसासाधनेन परिपक्वस्य पुरुषस्य माहात्म्यमपि उक्तम् । [१९]'अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः' इति । अस्यार्थः अहिंसाव्रतेन परिपक्वस्य पुरुषस्य परिसरे वैरभावः, द्वेषभावोऽपगच्छति । भाष्यकारः सर्वप्राणिनां भवति' इति जगाद । अस्यार्थः न केवलं मनुष्याणां, हिंस्रपाूनां मिथोऽपि वैरत्यागः भवति । सिंहः हरिणश्च, नकुलः सर्पश्च एकत्र निवसन्ति । अतः पूर्वं ऋष्याश्रमे हिंस्राः साधवश्च प्राणिनः एकत्र वैरभावं परित्यज्य निवसन्ति स्म इति श्रूयते ।

## अर्वाचीनानां दृष्ट्या अहिंसा

अहिंसापदस्य पर्यायनाम इव विराजमान माहात्मा गान्धीजी आधुनिकभारते अहिंसव्रतप्रवर्तक इति सर्वेषां विदितप्रायमेव । 'अहिंसया हिंसां निवारयेत् इति तस्य मतम्' । तस्य विचारसरणिः इत्थमस्ति' मम महाभारतस्य कृष्णः नेष्टः, किन्तु भगवद्गीतायाः कृष्णः इष्टः' । अथ च महाभारते युद्धानिरूपणं कृतम् अतः पाण्डवकथा न एतिहासिकी । 'यदी एकः पुरुषः कपोले ताडयति चेत् अपरं कपोलं ताडनार्थं प्रदर्शयतु' इति तस्य प्रसिद्धं वाक्यम् । 'आदर्शपुरषोऽपि रामः अन्ते रावणेन साकं युद्धं कृतवन् इति खेदकरः विषयः ।'

जलै ४,१९४० अमृतबजार् इत्याख्यपत्रिकायां ब्रिटन् प्रधानमन्त्रिणं प्रति सन्देशं प्रेषितवान् यत् 'हिट्लर् महोदयाय इङ्ग्ल्याण्डदेशं समर्प्य, द्वितीयविश्वयुद्धविरामवार्तां घोषयन्तु' इति । तस्य वाक् अत्र उल्लिखिताऽस्ति ।

"I appeal for cessation of hostilities because was is bad in essence. You want to Nazism, your soldiers are doing the same work of destruction as the Germans. I want your soldiers are doing the same work of destruction as the Germans. I want you to fight Nazism without arms, or with non-violent arm, Invite Herr Hitler and Signor Mussolini to take what of the countries you call your possession. You will give all these but not you souls, nor your minds."

तात्पर्यन्तु हे आङ्ग्लाः भवन्तः हिट्लर् महोदयस्य सैन्येन साकं निरायुधेन वा अथवा

अहिंसाख्यायुधेन वा युद्धं कुर्वन्तु । एष एव धीरसैनिकानां युद्धमार्गः, ते भवतां देशं आक्रमन्ति किल क्रियतां नाम, सर्वं दीयतां, विना आत्ममनांसि । एतेन मानवकोटीनां युद्धेन मरणं निवारयितुं शक्यते इति । बालस्य अत्र प्रश्नः समुदेति, 'मातुः मानहरणसमये पुत्रः हिंसाचरणेन तं निवारयेत् अथवा अहिंसाख्यायुधेन युद्धं कुर्यात्' इति । अहो महात्मनः विचारमाहात्म्यम् ।

## मध्वाचार्याणां दृष्ट्या अहिंसा

आचर्यमध्वोऽपि तन्त्रसारे [२०]'अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ यमाः' इति अहिंसायाः अनुष्ठानम् आवश्यकम् इत्याह । परन्तु अहिंसायाः स्वरूपं भिन्नतया आविश्चकार । ब्राह्मणवैश्यशूद्राणां च दण्डाधिकारः नास्त्येव । क्षत्रियाणां विशेषतः दण्डाधिकारः अस्ति इति आचार्येण निरटङ्कि । उक्तश्च महाभारततातपर्यनिर्णये -

[२१]शरीरदण्डसन्त्यागः पुत्रभार्यादिकान् ऋते ।
तत्रापि नाङ्गहानिः स्यात् वेदना वा चिरं न तु ।।

विप्रस्य सामस्त्येन दण्डत्यागः ।किन्तु पुत्रस्य शिष्टस्य च शिक्षणादिविषये दण्डनार्हताऽस्ति । परन्तु दण्डेन तेषामङ्गवैकल्यं, अङ्गहानिः वा चिरवेदना च न भवेत् । अतः उपवासादिलघुदण्डः दातुं शक्यते । सा हिंसा इति न कथ्यते इति भावः ।

अन्यच्च -

[२२]शरीरदण्डविषये वैश्यादीनां च विप्रवत्'

यदि क्षत्रियाणाम् अहिंसा न विधीयते तर्हि लोकव्यवस्थायां नीतिव्यवस्थायां च अव्यवस्था भवति । मांसभक्षणमपि सर्वेषां निषिद्धम् इति कस्मिन्नपि स्मृतिग्रन्थे उत गृह्यसूत्रे धर्मशास्त्रग्रन्थे वा नोक्तः । सर्वत्र विप्राणां मासंभक्षणाधिकारः नास्ति । अपि च इतराणां मांसभक्षणं न श्रेयस्करम् इत्येव विहितम् ।

आचार्योऽपि भागवततात्पर्ये-

[२३]घ्राणभक्षोऽथवा यज्ञे दैवे सर्वस्य चेष्यते ।
क्षत्रियादेः न विप्राणां विप्रो दोषेण लिप्यते ।।

इति । अश्वमेधयज्ञादिषु मांसभक्षणं विहितमपि घ्राणभक्षणं एव कुर्यात् । क्षत्रियाणां तु मासंभक्षणं न दोषाय इति तात्पर्यम् ।

### अन्तिमवाचः

यदि लोके सर्वेऽपि सस्याहारिणः एव भवेयुः चेत्, आहारभावः उत्पद्यते वा इति जिज्ञासाऽपि भवति । अम्बेड्कर महोदयेनापि निरटङ्कि यत् हिन्दूनां धर्मशास्त्रे वा मनुस्मृतौ मधुमांसवर्जनं सर्वैरपि कर्तव्यमेव इति न निरूपितं, किन्तु अकरणं श्रेयः इति विहितम् । अतिअहिंसावादिनः बौद्धजैनाः राज्ञां सहकारेण मधुमांसवर्जनं सार्वत्रिकं चक्रुः । अहिंसा, वैदिकं कर्म, ध्यानम्, इन्द्रियनिग्रहः, तपः गुरुशुश्रूषा, एतेषां मध्ये पुरुषं प्रति किं श्रेयस्करमिति युधिष्ठिरः पप्रच्छ । तदा बृहस्पतिराह-

[२४]सर्वाण्येतानि धर्मस्य पृथग्द्वाराणि सर्वशः' इति ।

अतः 'अहिंसा परमो धर्मः' इत्यस्य अहिंसाऽपि परामो धर्मः इत्यर्थः । अतः अहिंसाचारणं व्यक्तिस्तरे विहितधर्मः । समूहस्तरे राष्ट्रस्तरे वा तस्य विधानम् अश्रेयस्करम् । अति-अहिंसावादिनः जैनबौद्धाः नैकान् क्षत्रियान् स्वामतीयान् कृत्वा, अहिंसाबोधनं चक्रुः । नपुंसकक्षत्रियान् असृजन् । तत्परिणामेन अशोकनृपतेर्नन्तरकाले भारतमाता अरबाणां म्लेच्छानां च आक्रमणं सोढुम् सञ्जाता इति केचन इतिहासज्ञाः स्वाभिप्रायं प्रकटयन्ति । अत एव उक्तिः प्रसिद्धा खलु

'धर्मस्याऽचरणं श्रेयः धर्मज्ञानन्तु दुष्करम्' इति ।

### END NOTES :

१. मध्वविजयव्याख्याकर्तृभिः विश्वपतितीर्थैरुद्धृतम् २. अग्निपुरणम् ३७२.३
३. तन्त्रसारसङ्ग्रहः ४. महाभारतम् १.१.१२,१३,११७,३२
५. कूर्मपुराणम् ११.१४ ७. तत्वार्थसूत्रम् ७.१३
८. योगशास्त्रम् ३५ ९. योगशास्त्रम् ३६
१०. योगशास्त्रम् ३७ ११. योगशास्त्रम् ३८
१२. योगशास्त्रम् ३९ १३.भास्करानन्दकृततत्वार्थसूत्रव्याख्या.७.१३
१४. महाभारतम् - १३.१७५.५ १५.महाभारतम् १३.१७७.१४
१६. महाभारतम् - १३.११६.२९ १७. मनुस्मृतिः - ५.५५
१८. योगसूत्रम् - २.३० १९. योगसूत्रम् - २.३५
२०. तन्त्रसारः ४.१३७ २१. म.भा.ता.नि २४.२५
२२. म.भा.ता.नि. २४.२६ २३. भागवततात्पर्यम् - ११.५.११
२४. महाभारतम् - १३.१७५.२

*****

# शास्त्रदीपिकोक्तरीत्या मीमांसकमते मोक्षस्वरूपनिरूपणम्

**अनन्तशर्मा बि जि**
संशोधनच्छात्र:,
पूर्णप्रज्ञसंशोधनमनदिरम्, बेङ्गळूरु

अथ पूर्वमीमांसाशास्त्रे को नाम मोक्ष:, किं तस्य साधनम् इत्येते विचारा: शास्त्रदीपिका-ग्रन्थमनुसृत्य किञ्चित् प्रस्तूयन्ते । सामान्यत: कर्मभि: प्राप्य: स्वर्गविशेष एव मीमांसाभिमतो मोक्ष: इति विद्यते प्रथिति: । तन्न साधु । तादृशस्य स्वर्गस्य कर्मक्षये सति क्षीयमाणत्वस्य तैरपि अभ्युपगतत्वेन आत्यन्तिकत्वाभावात्, मोक्षस्य च आत्यन्तिकत्वेनैव श्रुतावुपदिष्टत्वात् । 'न च पुनरावर्तते'[१] इति हि श्रुति: । तस्मात् न स्वर्गो मोक्ष: ।

कस्तर्हि मोक्षत्वाभिमत: पदार्थ: मीमांसकानामिति आकांक्षायाम्- उच्यते । प्रपञ्चसम्बन्धविलयो हि मोक्षो नाम । न च वेदान्तिभिरभिमतरीत्या 'प्रपञ्चविलय: एव मोक्ष:'[२] इति वाच्यम् । प्रपञ्चस्य सत्यत्वस्य प्रत्यक्षादिसिद्धत्वेन तस्य अविद्यानिर्मितत्वे, तन्मिथ्यात्वे च मानाभावात् । ननु, स्वप्नदृष्टान्तेन जगत: मिथ्यात्वं बोधयन्त्य: श्रुतय: एव प्रमाणमिति चेत्, न, तासां प्रापञ्चिकभोगस्य अनित्यत्वबोधने प्रवृत्तत्वात् । प्रापञ्चिको भोग: न हि नित्य:, प्रपञ्चे सर्वस्यापि अनित्यत्वदर्शनेन तद्भोगस्यापि अनित्यत्वस्य प्रत्यक्षसिद्धत्वात् । इममेवांशं बुबोधयिषु: श्रुति:, न तु अद्वैत्यभिमतया रीत्या प्रपञ्चस्यैव मिथ्यात्वम् । अत: श्रुतय: प्रपञ्चमिथ्यात्वे न प्रमाणम् । 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्'[३] इति श्रुति: मिथ्यात्वे मानम्, तथा हि - यदा सकलस्य प्रपञ्चस्य विलयो भवति, आत्मा ह्येव केवल: अवशिष्यते, इदानीं सर्वमिति भासमानं सर्वमपि आत्मत्वेनैव भासते इत्यत: तदा स्वभिन्नस्य कस्यचिदपि अभावाद् दु:खस्य कारणमेव नावशिष्यते इत्यत: दु:खसम्भावना अपि नास्तीत्यत: प्रपञ्चविलय एव मोक्ष: इति अनया श्रुत्या अवगम्यते इति चेत्, न । तस्या: श्रुते: प्रपञ्चसम्बन्धविलयपरत्वेन व्याख्यातुं शक्यत्वात् । तथा हि - 'य: कामयेत राष्ट्रं स्याम्' इति श्रुतौ 'राष्ट्रस्य भोक्ता स्याम्' इत्ययमर्थो यथा प्रतीयते, तद्वदेव 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' इति श्रुते: इत्थमर्थो वक्तव्य: - **यत्र** यस्यामवस्थायां एव सर्वम्, तदतिरिक्तं किञ्चित् दृश्यं वा, दर्शनकारणं वा, दर्शनायतनं वा किञ्चित् सम्बन्धि विद्यते, तत् तदा केन कं पश्येत् इति ।

यथा लोकेऽपि यस्य बान्धवादयो वा वित्तं वा नास्ति स: 'न मे किञ्चित् कश्चित् वा अस्ति, अहमेव मम सर्वम्' इति कथयति, तद्वत् प्रकृतेऽपि आत्मन: सम्बन्धित्वेन रूपेण न किञ्चदपि

वर्तते, स्वरूपेण तु अस्त्येव - इत्यर्थः । तथा च प्रपञ्चस्य स्वरूपेण सत्त्वेऽपि तस्य आत्मना सम्बन्धाभावः विवक्षितः ।

त्रेधा हि आत्मानं बध्नाति जगत् । भोग्यत्वेन, भोगायतनत्वेन, भोगसाधनत्वेन च । एतैः त्रिभिः भोगो जायते जीवस्य । भोगो नाम सुखदुःखान्यतरविषयकः अपरोक्षानुभव एव । एतादृशस्य भोगस्य जननेन भोग्य-भोगायतन-भोगसाधनानि पुरुषं बध्नन्ति । अत एव भोग्यः पदार्थः विषयपदेन उच्यते । तस्य च षीञ्-बन्धने इत्यस्माद् धातोः निष्पन्नस्य विषयपदस्य बन्धकः इत्येव अर्थः । सोऽयं बन्ध एव संसारो नाम । एवं च बन्धात्मकस्य संसारस्य हेतुभूतानां भोग्यादीनां पुरुषेण सह सम्बन्धे सति भोगो भवति, सम्बन्धाभावे सति भोगाभावात् संसारो न भवति पुरुषस्य । तस्मात्, भोग्य-भोगायतन-भोगसाधनैः सह पुरुषस्य यः सम्बन्धः तस्य आत्यन्तिकविलयः एव संसाराभावः । स एव च मोक्षः । तस्मात् मोक्षो नाम सुखदुःखाद्यनुभवात्मकबन्धहेतुभूतप्रपञ्चसम्बन्धविलयः एव ।

यद्येवं स्यात्, तर्हि मोक्षस्य निरतिशयसुखानुभवरूपत्वं न स्यात्, ततश्च मोक्षः पुरुषार्थ एव न स्यात्, यतो हि यः पुरुषेण अर्थ्यते स खलु पुरुषार्थः । पुरुषश्च सर्वदा सुखमेव इच्छति । प्रकृते मीमांसकोक्तरीत्या मोक्षस्य स्वरूपे स्वीक्रियमाणे मोक्षे सुखानुभवोऽपि न सम्भवति इत्यतः मोक्षस्य पुरुषार्थता एव न सिद्ध्येत् । अतः नेदं मोक्षस्वरूपं युक्तम् इति चेत्, न । तथा सति तव अद्वैतिनो मतेऽपि मोक्षस्य सुखस्वरूपत्वेन सुखानुभवरूपत्वाभावात् तत्रापि मोक्षस्य पुरुषार्थत्वं नैव स्यात् ।

अद्वैतमते मोक्षस्य सुखानुभवरूपत्वाभावेऽपि सुखरूपत्वादेव तस्य पुरुषार्थत्वं सम्भवति । तव मीमांसकस्य मते तु न तथा इति चेत्, न । सुखरूपत्वे सति किमायातम् ? सुखस्य प्रकाश एव यदि न भवति, तर्हि पुरुषस्य स्वयं सुखस्वरूपमापद्यापि सुखप्रकाशरूपस्य सुखानुभवस्य अभावात् पुनरपि मोक्षस्य अपुरुषार्थत्वमेव पर्यवस्यति । अतः न अद्वैतिमतं सुखस्वरूपमत्र स्वीकारार्हम् ।

ननु आत्मनः स्वरूपं सुखम्, आत्मा च स्वप्रकाशः । तस्मात् स्वरूपप्रकाश एव सुखप्रकाशः। अतो न मोक्षस्य अद्वैतिमते अपुरुषार्थता सम्भवति, इति चेत्, न । आत्मनः स्वप्रकाशत्वे मानाभावात् । न च अद्वैतिमतानुसारेण मोक्षावस्थायाम् आत्मनो ज्ञानं मनसा सम्भवति, तदानीं मनसः एव अभावात् । अमनस्कत्वं च 'अमनोऽवाक् अप्राणो ह्यमनाः शुभ्रः' इत्यादिश्रुतिभ्यः।

किञ्च, सुखविशिष्टानुभव एव मोक्षः, न तु सुखमात्रानुभवः । यदि सुखमात्रानुभव एव मोक्षः भवतु इति स्वीकृत्य चिन्त्यते, तदापि तत्र मोक्षे सुखानुभवोऽपि न भवत्येव, तदा आत्मनः एव

प्रकाशाभावात् । न हि मुक्तौ वा अन्यत्र क्वचिद् वा आत्मनः आत्मानुभवः सम्भवति - 'विज्ञातारमरे केन विजानीयात्' इति श्रुत्या एव कण्ठतः तन्निषेधात् । 'अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः' इत्यादिश्रुतिभ्यश्च मोक्षे नास्ति सुखानुभवः इति स्पष्टं भवति । यतः, एताः श्रुतयः मुक्तौ ज्ञानाभावं प्रदर्शयन्ति । अलं वा अरे इदं विज्ञानाय इत्यत्र च विज्ञानपदस्य शक्तिपरत्वं स्वीकृत्य मुक्तौ ज्ञानशक्तिमात्रं वर्तते, ज्ञानं तु न वर्तते इति व्यवस्थापनाच्च ।

तस्मात् मोक्षावस्थायां ज्ञानशक्तिमात्रम् अवशिष्यते, विज्ञानं तु न वर्तते । ज्ञानशक्तिसत्त्वेऽपि कारणान्तराभावत् विज्ञानोत्पत्तिः नैव सम्भवति इति स्थितम् । अतः श्रुतिविरोधेन मुक्तौ विज्ञानमस्ति इति अभ्युगन्तुं न शक्यते । एवं च विज्ञानश्रुतयः तावत् विज्ञानशक्त्यभिप्रायाः, आनन्दश्रुतयश्च दुःखाभावाभिप्रायाः एवेति सुस्पष्टम् ।

ननु 'अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः' इति श्रुत्यनुरोधेन 'आनन्दो ब्रह्म' विज्ञानमानन्दं ब्रह्म इत्यादिश्रुतीनाम् अन्यथानयनापेक्षया आनन्दश्रुत्यनुरोधेन प्रियाप्रियास्पर्शनश्रुतिरेव अन्यथा नीयताम्, इति चेत्, न । वचनयोर्विरोधे हि अन्यतो निर्णयः इति न्यायेन आनन्दश्रुति-प्रियाप्रियास्पर्शनश्रुत्योः विरोधे उभयत्र सामान्यतः आनन्दत्वावच्छिन्नमात्रस्य स्वीकारेण समानविषयत्वमागतम् । ततश्च आनन्दपदमेव दुःखाभावपरम्, दुःखाभावस्यापि स्वतः पुरुषार्थत्वात्।

अतः आत्मनः स्वप्रकाशत्वे मानाभावात् सुखं मोक्षावस्थायां कथमपि न प्रकाशते इति सिद्धम् । तथा च सुखानुभवाभावे सति कथं तादृशः मोक्षः पुरुषार्थः सम्भवति इति आशयायाम्-उच्यते । मोक्षः पुरुषार्थ एव, दुःखाभावरूपत्वात् । प्रपञ्चसम्बन्धजन्यः भोगः एव बन्धः इत्युक्तम् । बन्धश्च दुःखमेव । अतः बन्धविमोकरूपः दुःखाभावः अपि पुरुषेण साक्षात् इष्यमाणत्वात् पुरुषार्थ एव । अतः तद्रूपत्वात् मोक्षोऽपि पुरुषार्थत्वमाप्नोत्येव ।

अत्र प्रकृते, मोक्षात्मको यो दुःखाभावः, तत्प्रतियोगिप्रतिपादकं दुःखपदं समस्तबन्धजातपरम्। बन्धजातं च सुखदुःखादिसमस्तवैशेषिकात्मगुणाः एव । तस्मात् तदभाव एव मोक्षः इति स्थितम्।

मोक्षस्य एतादृशस्वरूपे कथिते, समस्त-बन्धजातस्य उच्छेदः केन प्रकारेण सिद्ध्यति इति वक्तव्यम् । तत्रोच्यते - सुखदुःखाद्युच्छेदः धर्माधर्मयोः उच्छेदेन जायते । धर्माधर्मयोः उच्छेदश्च इत्थम् भवति - तत्र उत्पन्नानां धर्माधर्माणाम् उपभोगेन क्षयः । अथवा, तेषां नित्य-नैमित्तिकानुष्ठानेन आत्मज्ञानेन च विरोधस्य सत्त्वात् तत्सत्त्वे उच्छेदः । काम्यानुष्ठाने सति ये धर्माः उत्पद्येरन्, तेषां तावत् काम्याननुष्ठानात् अनुत्पत्तिः एव । विहितानाम् अकरणेन

निषिद्धानाकरणेन वा उत्पद्यमानानाम् अधर्माणां तु, विहितकरणेन निषिद्धानाम् अकरणेन च परिहारः । एवंरूपेण सर्वेषां कर्मणामुच्छेदे जाते पुनःशरीरारम्भकाणां कर्मणां च अभावे, पूर्वोत्पन्नस्य शरीरस्य निपाते च जाते, निमित्ताभावेन पुनःशरीरप्राप्त्यभावात् अशरीरावस्था एव भवति । स एव च मोक्षः ।

अत्र च आत्मज्ञानं नित्य-नैमित्तिकमात्रानुष्ठाने काम्य-निषिद्धयोः अननुष्ठाने च प्रयोजकं भवति । तदुक्तं वार्तिककारैः -

आत्मा ज्ञातव्य इत्येतत् मोक्षार्थं न च चोदितम् ।
कर्मप्रवृत्तियोग्यत्वम् आत्मज्ञानस्य लक्ष्यते ।। - इति ।

यो हि शरीराद्यतिरिक्तम् आत्मानं जानाति, ज्ञात्वा च शरीरादीनां अनित्यत्वमभिसन्धाय तानि जिहासति, स एव काम्यनिषिद्धादिकं वर्जयित्वा नित्यनैमित्तिकानि अनुष्ठाय निरुक्तक्रमेण मोक्षम् अभिसम्पद्यते । अतः मोक्षार्थिना विवेकज्ञानमात्रेण कृतार्थत्वाभावात् पूर्वोक्तरीत्या अशरीरत्वसम्पादनाय यत्नो विधेयः । तदुक्तं श्लोकवार्तिके -

तस्मात् कर्मक्षयादेव हेत्वभावेन मुच्यते । (१०६)

तत्र ज्ञातात्मतत्त्वानां भोगात् पूर्वक्रियाक्षये ।
उत्तरप्रचयाभावात् देहो नोत्पद्यते पुनः ।। (१०८)

कर्मजन्योपभोगार्थं शरीरं न प्रवर्तते ।
तदभावे न कश्चिद्धि हेतुस्तत्रावतिष्ठते ।। (१०९)

मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ।
नित्यनैमित्तिके कुर्यात् प्रत्यवायजिघांसया ।। (११०) - इति ।

अत्र यदुक्तं हेत्वभावेन मुच्यते इति, तन्निराक्रियते श्रीमद्भिः शङ्करभगवत्पादैः । तेषामयमाशयः- काम्यनिषिद्धवर्जनेन कर्मोत्पत्तिः न भवति, भोगेन च आरब्धस्य कर्मणः क्षयो भवति इति च युक्तम् । किन्तु नित्यनैमित्तिकानुष्ठानमात्रेण सञ्चितकर्मणां समग्रतया क्षयो भवति इत्येतत्तु न युक्तम् । सञ्चितकर्मणां बहुविधत्वात् केवलं नित्यनैमित्तिकानुष्ठानमात्रेण तत्क्षयः न सम्भवति। यदि नाम भवति इति स्वीक्रियते, तर्ह्यपि शास्त्रविहितानां नित्यादिकर्मणां सञ्चितान्तर्गतधर्मनाशकत्वं नैव युक्तं कल्पयितुम् । नित्यादीनि कर्माणि अशास्त्रीयाणाम् अधर्माणां नाशकानि इति तु अवगम्यते, शास्त्रीयत्वेन अशास्त्रीयत्वेन च तयोः विरोधावगमात् । न तु शास्त्रीयाणां धर्माणामपि सञ्चितान्तर्गतानां नित्याद्यनुष्ठानेन क्षयसम्भवः, उभयोरपि शास्त्रीयत्वेन तयोः विरोधस्य

प्रतिपादयितुमसम्भवात् । तस्मात् नित्याद्यनुष्ठानेनैव समस्तानां सञ्चितकर्मणां नाशः अभ्युपगन्तुं न शक्यते । अतः समस्तसञ्चितनाशाभावात् पुनरपि शरीरारम्भः भवत्येव । अतो न ऐकभविकमोक्षः सम्भवति - इति । अत्रोच्यते - प्रकृते नित्यकर्मणां समस्तदुरितक्षयहेतुत्वं सम्भवत्येव । तथैव सङ्कल्पस्य क्रियमाणत्वात् इति ब्रूमः । प्रायश्चित्तकर्माणि च सञ्चितान्तर्गतानां महापापादीनां निवर्तनार्थमेव भवन्ति - इति ।

तथापि अधर्माणामेव क्षयः भवति खलु, इति चेत् - उच्यते । सङ्कल्पे समस्तदुरितपदेन बन्धककर्मत्वावच्छिन्नमेव अभिप्रेयते । तथा च, यथा अधर्माणां तथा धर्माणामपि बन्धकत्वाविशेषेण तेषामपि निवृत्तिः भवत्येव - इति । ननु, तेषां शास्त्रीयत्वात् अनिवृत्तिः इति चेत्, न । अत्र निवर्त्यतावच्छेदकं न तु अशास्त्रीयत्वम्, अपि तु बन्धहेतुत्वम् । तस्य तु धर्मेऽपि सत्वात् बन्धककर्मनिवर्तनोद्देशेन अनुष्ठीयमानेन आत्मज्ञानपूर्वकेन कर्मणा धर्मस्यापि निवृत्तिः अवश्यमेव सम्भवति ।

अत्र अशरीरत्वसम्पादनाय काम्यनिषिद्धयोः वर्जनं करणीयमित्युक्तम् । तत्र आक्षिपति अद्वैतवादी - न हि अस्मदुक्तप्रपञ्चमिथ्यात्वोपलक्षितब्रह्मात्मैक्यविज्ञानं विना काम्यादिपरित्यागः सम्भवति, तादृशज्ञानस्यैव देहाद्यतिरिक्तात्मतत्त्वज्ञापकत्वेन तदभावे कर्मत्यागानुपपत्तेः । अतः तादृशात्मज्ञानेनैव मोक्षः - इति । अत्रोच्यते - न हि तादृशं ज्ञानं सम्भवति, प्रपञ्चस्य मिथ्यात्वाभावात् । ननु अविद्यात्मकत्वात् मिथ्यात्वम् इति चेत्, न । अविद्यायां मानाभावात्। अपि च काम्यनिषिद्धवर्जनाय प्रयोजकीभूतम् आत्मज्ञानं कीदृशं स्यात् - किम् अखण्डाकार-वृत्त्यात्मकम्, उत नित्यानित्यविवेकज्ञानम् ? नाद्यम्, तादृशज्ञानस्य काम्यत्यागहेतुत्वे संन्यासविध्युच्छेदप्रसङ्गात् । तस्मात् द्वितीयमिति वाच्यम् । तदेव अस्माभिरपि अभिलषितम् ।

शरीराद्यतिरिक्तात्मज्ञानं हि आत्मसम्बन्धितया प्रतीयमानानां शरीरेन्द्रियादीनां पुत्रमित्रकलत्रादि-बन्धूनां धनकनकादीनां च प्रतिजन्मनि भेदं प्रदर्शयत् तेषामनित्यत्वं बोधयति । अतः तेषामनित्यत्वज्ञानेन तत्र वैराग्यं जायते । वैराग्यं च काम्यादिवर्जनहेतुः । इत्थमेव हि अद्वैतिभिरपि काम्यादिवर्जनहेतुः निरूपयितव्यो भवति ।

इत्थम् आत्मज्ञानस्यापि काम्यादिवर्जनहेतुत्वेनैव मोक्षोपकारकत्वम् । तथा च, आत्मज्ञान-सहकृतैः कर्मभिः एव प्रपञ्चसम्बन्धविलयात्मकः अशरीरत्वरूपः मोक्षः जायते इति स्थितम् ।

o-o-o

# न्यायशास्त्रे प्रमाणानि

लेखकः- सुशीलेन्द्र श्रीपाद गोग्गि,शोधच्छात्रः,
कर्नाटकसंस्कतविश्वविद्यालयः, बेङ्गलूरु

**पीठिका -**

जानन्त्येव सर्वेऽपि विद्वांसः आन्विक्षिकी इति प्रथितस्य न्यायशास्त्रस्य गौरवम् । समुल्लसति चास्य शास्त्रस्य त्रयीमारभ्य सर्वेषु शास्त्रेषु प्रतिष्ठा । चतुर्दशविद्यास्थानेषु न्यायशास्त्रस्यापि गणना दृश्यते ।

यथाह मनुः - अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रं पुराणश्च विद्यास्त्वेताश्चतुर्दश ।।[१]

आन्विक्षिकी इत्यपि अस्य अपरं नाम वर्तते । यथोक्तं न्यायभाष्यकारेण वात्स्यायनेन प्रमाणैः अर्थपरीक्षणं = न्यायः । प्रत्यक्षागमाश्रितम् अनुमानम्, सा अन्विक्षा= प्रत्यक्षागमाभ्याम् ईक्षितस्य अन्वीक्षणं = अन्विक्षा, तया प्रवर्तते इति आन्विक्षिकी न्यायविद्या । तादृशमिदं न्यायशास्त्रं द्विधा विभक्तं प्राचीननवीनभेदेन ।

गङ्गेशोपाध्यायस्य कालात् नवीनन्यायपरम्परा प्रारब्धा वर्तते । महर्षिगौतमेन न्यायसूत्रभाष्यादौ निःश्रेयसाधिगमहेतुत्वेन षोडशतत्त्वानां निरूपणं कृतम्।

[२]'प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्ड-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसाधिगम' इति । तत्र प्रमाणानामेव विशेषतः जिज्ञासा नवीनन्याये कृता । तद्यथा गङ्गेशोपाध्यायस्य तत्वचिन्तामणौ-

[३]अथ जगदेवदुःख-पङ्कनिमग्नमुदिधिर्षुः अष्टादशविद्यास्थानेषु अभ्यार्हिततमाम् आन्विक्षिकीं परमकारुणिको मुनिः प्रणिनाय । तत्र प्रेक्षावत्प्रवृत्यर्थं प्रमाणादितत्त्वज्ञानात् निःश्रेयसाधिगम इत्यादौ असूत्रयत् । तेष्वपि प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते । इति ।

---

१. मनुस्मृतिः २. न्यायशास्त्रम् ३. तत्त्वचिन्तामणिः

**न्यायशास्त्रे प्रमाणानि-**

येषां साहाय्येन सर्वेषां प्राणिभृतां लोके शास्त्रे च व्यवहारः प्रवर्तते तान्येव प्रमाणानि। प्रमीयन्ते एभिरिति प्रमाणानि इति हि व्युत्पत्तिः । प्रमाणानां विषये विवदन्ते अन्यान्यशास्त्रकाराः। तथा हि- चार्वाकास्तु प्रत्यक्षैकप्रमाणवादिनः, वैशेषिकाः बौद्धाश्च प्रत्यक्षम् अनुमानं च प्रमाणत्वेन स्वीकुर्वन्ति । शब्दप्रामाण्यस्य अनुमानप्रामाण्याधीनत्वात् नानुमानात् पृथक् प्रामाण्यं शब्दस्य, पातञ्जलाश्च [४]प्रत्यक्ष-अनुमान-आगमाः प्रमाणानि इति सूत्रानुसारेण प्रमाणत्रयम् अभ्युपगच्छन्ति । एवं माहेश्वराः माध्वाश्च । मीमांसकास्तु प्रमाणपञ्चकसहिताम् अनुपलब्धिं च उररीकुर्वन्ति । तान्त्रिकास्तु चेष्टाख्यं प्रमाणान्तरं च उरीकुर्वन्ति । परन्तु जरन्नैयायिकाः नव्यनैयायिकाश्च प्रत्यक्ष-अनुमान-उपमान-शब्दाः प्रमाणानि इति सूत्रानुसारेण चत्वारि प्रमाणत्वेन चाभ्युपयन्ति ।

**न्यायशास्त्रे प्रत्यक्षम्-**

[५]'प्रत्यक्ष-अनुमान-उपमान-शब्दाः प्रमाणानि' इति सूत्रानुसारेण प्रमाणचतुष्टयमध्ये प्रत्यक्षस्य प्राधान्यमस्ति, यतः तदनुसृत्य च प्रमाणान्तराणां प्रवृत्तिः । तादृशं प्रत्यक्षं द्विविधं नित्यानित्यभेदेन । तत्र च नित्यं भागवतम् , अनित्यं जैविकम् । जैविकमपि लौकिकम्, अलौकिकमिति द्विप्रकारम् ।

लौकिकस्य प्रत्यक्षस्य लक्षणं - 'इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् ' इति । चक्षुरादिषडिन्द्रियाणां घटपटाद्यार्थैस्सह यदा संयोगादिसन्निकर्षः भवति तदैव 'अयं घटः' इति बोधो आत्मनः भवति । तत्रायं क्रमः- आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन इति । एवं च एतादृशज्ञानजनने चक्षुरादीन्द्रियं समवायिकारणम्, इन्द्रियार्थसंयोग असमवायिकारणम्, सन्निकर्षः व्यापारः भवति । अलौकिकप्रत्यक्षमपि त्रिविधं सामान्यलक्षणम्, ज्ञानलक्षणम्, योगजम् इति । चक्षुषा संयोगसन्निकर्षद्वारा पुरोवृत्तिघटप्रत्यक्षं जायते, जगति विद्यमानानां निखिलघटानां प्रत्यक्षन्तु ज्ञातघटवृत्तिघटत्वज्ञानेन भवति । अस्य च न संयोगसन्निकर्षः कारणं परन्तु सामान्यमेव(जातिरेव), इदमेव सामान्यलक्षणम् । ज्ञानलक्षणस्य तु इदमुदाहरणं 'सुरभिः चन्दनखण्डः' इति । अत्र चक्षुषा सौरभ्यज्ञानं पूर्वानुभूतघ्राणजन्यज्ञानबलात् उत्पद्यते । एवं च अत्र ज्ञानमेव सन्निकर्षः । योगजधर्मे तु मनःप्रणिधानमेव सन्निकर्षः इति विवेकः ।

४. पातञ्जलयोगसूत्रम् १.७ ५. न्यायभाष्यम्

**न्यायशास्त्रे अनुमानम्**

अनुसृत्य मानम् अनुमानम् । प्रत्यक्षमनुसृत्य तस्य मानत्वम् । अनुमानं द्विविधं स्वार्थानुमानं परार्थानुमानञ्चेति । स्वस्य ज्ञातृपुरुषस्य अर्थप्रतिपत्तिजनकं स्वार्थानुमानम् । परार्थानुमानम् = पर्वतदेशस्थं धूमज्ञानवन्तं परं प्रति पञ्चावयवप्रयोगानन्तरं 'तस्मात् पर्वतो वह्निमान्' इत्यादिना उपदेशेन अनुमितिः जायते । तस्य यत् जनकं तदेव अनुमानम् । तज्जनकः व्याप्तिविशिष्टपक्षधर्मताज्ञानरूपः परामर्शः । तत्र व्याप्तिः घटिताऽस्ति । तत्र व्याप्तिर्नाम साहचर्यनियमः । सा च व्याप्तिः हेतुव्यापकसाध्यसामानाधिकरण्यरूपा अनुमितिजनने कारणं भवति इति प्राचीनानां पन्थाः । यतः व्यापारवदसाधारणं कारणं करणमिति तेषां करणलक्षणम् । अतः तेषां मते व्यापारः = परामर्शः, व्याप्तिज्ञानं = करणं, फलम्= अनुमितिः । अतः अनुमानं नाम व्याप्तिज्ञानमेव । अनुमितिकरणं अनुमानमिति तल्लक्षणम् । नव्यमते तावत् व्याप्तिस्तु न करणं किन्तु परामर्श एव । फलं तु अनुमितिः । यतः नव्यानां करणलक्षणन्तु फलायोगव्यवच्छिन्नं कारणं करणमिति । अतः लिङ्गपरामर्श एव अनुमानमिति तज्जन्यं ज्ञानमनुमितिः ।

**न्यायशास्त्रे उपमानम्-**

अतिदेशवाक्यार्थज्ञानम् उपमानम् नाम सादृश्यज्ञानम् । तेन गोपदार्थज्ञानवत पुरुषात् गवयमजानन् पुरुषः 'गोसदृश गवय' इति श्रुत्वा वने तादृशं पिण्डं पश्यन् वाक्यार्थस्मरणानन्तरं 'अयम् गवयपदवाच्य' इति अवगच्छति , सैव उपमितिः । तत्र सादृश्यज्ञानम् करणम् , वाक्यार्थस्मरणं व्यापारः, उपमितिः फलम् ।

**न्यायशास्त्रे शब्दः -**

आप्तोच्चरितत्वे सति वाक्यत्वं शब्दस्य लक्षणम् , तेन शाब्दबोधो जायते । तादृशबोधं प्रति पदज्ञानं करणम्, पदार्थज्ञानं व्यापारः, वृत्तिज्ञानं सहकारि । वृत्तिस्तु द्विविधा शक्ति-लक्षणभेदेन । वृत्तिश्च शक्तिलक्षणान्यतरः सम्बन्धः । तत्र शक्तिः 'अस्मात् पदात् अयमर्थो बोद्धव्यः' इति ईश्वरेच्छा एव । लक्षणा शक्यसम्बन्ध एव । शक्तिग्रहस्तु व्याकरणादिना भवति । तदुक्तं दिनकर्याम्-

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यात् व्यवहारतश्च ।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निद्ध्यतः सिद्धपदस्य वृद्धाः ।।

एतेषां प्रमाणानां साहाय्येन सर्वेषां प्राणिभृतां लौकिक-शास्त्रीयश्च व्यवहारः सुलभतया प्रवर्तते इत्यलम् । इति शम् ।।

******

## उपयुक्तग्रन्थसूची


१. न्यायरसायनम्- कर्ता - वीनारायणाचार्य पाण्डुरङ्गी
प्रकाशनम् - पूर्णप्रज्ञसंशोधनमन्दिरम् . बेङ्गलूरु - २०१३

२. दिनकरी- कर्ता - महदेवभट्टः
सम्पादकः- आत्मरामशर्मा
प्रकाशनम् - संस्कृतसंस्थानम्. नवदेहली- २००२

३. न्यादर्शनम्- कर्ता - गौतममुनिः
सम्पादकः - अनन्तलालठक्कुरः,
मुद्रणम् -मिथिलीसंस्कृतविद्यापीठम्, दर्भाङ्गा - १९६७

४. न्यायकोषः- कर्ता - भीमाचार्य झळकीकर्
मुद्रणम् -चौकाम्बा सुरभारती प्रकाशनम् वारणासी(२०११)

# सिद्धान्तकौमुदी-व्याख्यायां सुखबोधिन्यां कृत्यप्रकरणस्य अध्ययनम्

**शिवगुहन् एस्.**
शोधच्छात्रः
पूर्णप्रज्ञसंशोधनमन्दिरम्
बेङ्गलूरु

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ।।
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ।।

पाणिनीयव्याकरणे प्रत्ययाः बहुविधाः सन्तीति सर्वे जानन्त्येव, तत्र धातोः विधीयमानेषु प्रत्ययेषु कृत्प्रत्ययाः इति केचन प्रत्ययाः सन्ति, प्रत्ययः, परश्च इत्यनयोः सूत्रयोः प्रत्ययः परत्र एव भवतीति अवगन्तुं शक्यते । तत्र तृतीयाध्याये धातोः इत्यधिकारः भवति, तत्र प्रथमपादात् कृत्प्रत्ययाः विधीयन्ते, कर्तरि कृत्, कृत्याः, ण्वुल्तृचौ इत्येवंरूपेण । पुनश्च एते प्रत्ययाः कर्तरि, कर्मणि भावे च अर्थे भवन्ति, तथा एतेषां भाषायां प्रामुख्यं सर्वदा भवत्येव ।

तत्र पाणिनीयव्याकरणानुसारिग्रन्थेषु मुख्यः भवति श्रीभट्टोजीदीक्षित-विरचित-वैयाकरणसिद्धान्तकौमुदी । महत्त्वपूर्णसिद्धान्तकौमुद्याः बह्व्यः व्याख्याः विद्यन्ते यथा बालमनोरमा, प्रौढमनोरमा, तत्त्वबोधिनी, शब्देन्दुशेखरः इत्याद्याः,तथैव व्याख्यान्तरम् उपलभ्यते,सुखबोधिनी नाम्नी मातृकारूपेण । अस्याः व्याख्यायाः रचयिता भवति श्रीनीलकण्ठवाजपेयी । एषा व्याख्या विशिष्टा तथा अप्रकाशिता चास्ति, अस्याः रचयिता तत्त्वबोधिनीकाराणां श्रीज्ञानेन्द्रसरस्वती आचार्याणां शिष्यः, तथा च भाष्यतत्त्वविवेकः, तत्त्वबोधिनीगूढार्थदीपिका इत्यादिव्याकरणग्रन्थांश्च व्यरचयत् ।

तत्र कृदन्तप्रकरणस्यादौ मङ्गलश्लोकः एवम् -

वरदेश्वरयज्वानं तातं नत्वा जगद्गुरुम् ।
क्रियते कृत्प्रकाशोऽयं नीलकण्ठेन यज्वना ।।

एते आचार्याः तत्त्वबोधिनीकाराणाम् अन्तेवासिनः इति कृत्वा बहुत्र तत्त्वबोधिन्याः उल्लेखः क्रियते, तथा च पूर्वाचार्यैः स्वीयग्रन्थेषु कथं प्रतिपादितम् इत्यपि उदाहरन्ति व्याख्यातारः। एवं च स्वीयव्याख्यानेऽपि अनेकैः लघुरूपेण व्याख्यात-अंशान् किञ्चित् विस्तरेण प्रतिपादयन्ति च इत्येवं व्याख्यायाः अस्याः बहु वैशिष्ट्यमस्ति इति ज्ञापयन् कृत्यप्रत्ययसूत्रेषु कांश्चित् व्याख्यांशान् प्रदर्श्य मदीयाशयानपि निवेदयितुमिच्छामि।

तत्र कृत्याः इत्यस्मिन् कृत्याः इति कियत् पर्यन्तम् अनुवर्तते ? तत्र किं कारणमित्यपि सुष्ठु प्रतिपादयन्ति यथा -

कृत्याः।। ३-१-९५।।

प्रत्यय इत्यादिवत् कृत्य इति सुवचत्वेऽपि केळिमरोऽनुक्तस्य संज्ञार्थं बहुवचनम् । इत उत्तरं ण्वुल्तृचावित्यतः प्राक् वक्ष्यमाणाः सप्तप्रत्ययाः कृत्यसंज्ञाः स्युः अर्हे कृत्यतृच इत्यत्र कृत्या पृथक् तृचो ग्रहणेन ण्वुलः प्रागित्यर्थो लभ्यते । अन्यथा कृत्यत्वादेवसिद्धे किमर्थं तृज्ग्रहणेन इत्याशङ्क्याह- **ण्वुलः प्रागिति ।।** न च उक्तज्ञापेकेन तृचोऽकृत्यत्वेऽपि ण्वुलः कृत्यत्वं दुर्वारमिति वाच्यम् । योगापेक्षं ज्ञापकमिति भाष्यकृता सिद्धान्तितत्वात् तस्याप्यकृत्यत्वात् । एतेन रोगारव्यायां ण्वुल् बहुळमिति ण्वुलोव्याप्तिन्यायेन अवधित्वं तद्योगे तृचोभावादितिदिक्।।

एवमेव तयोरेव कृत्यक्तखलर्थाः।। ३-४-७० ।। इत्यस्य व्याख्यायां प्रत्ययानाम् अर्थनिर्देशं सम्यक् प्रतिपादयन्ति यथा -

कर्तरि कृदिति सामान्यतः कृत्यादीनां कृत्वेन कर्तरि प्राप्ते भावकर्मणोः प्राप्त्यर्थम् इदं सूत्रं तदाह- **एत इत्यादि ।।** तथा च सूत्रे तच्छब्देन भावकर्मणी परामृश्येते । एवकारश्च कर्तुर्व्यवच्छेदार्थः । न च तत्र तक्रकौण्डिन्यन्यायेन कर्तुर्व्यच्छेदसिद्धिरिति एवकारो व्यर्थ इति वाच्यम् । नित्यं कौटिल्य इति सूत्रे नित्यग्रहणेन न्यायस्य अनित्यत्वज्ञापनेन नियमेन व्यवच्छेदालाभात् ।

तथा च वसेस्तव्यदिति वार्तिके वस धातोः अर्थनिर्देशम् एवं बोधयन्ति -

वसेस्तव्यत् कर्तरि णिच्च ।।

वसनिवासे न तु वस आच्छादन इति धातुः लुग्विकरणत्वात् तयोरेवेति वचनात् कर्तर्यप्राप्ते वचनम् । णित्वार्थश्च । वास्तव्य इति । तव्यतोणित्वात् वृद्धिः ।

२८४२ अचो यत् ३-१-९७ इत्यत्र अज्ग्रहणसार्थक्यं बोधयन्ति यथासुपठत्वादिति । न च अजन्तेभ्यो यदेव स्यात् न तु तव्यादिरिति वाच्यम् । वासरूपेण तत्प्रवृत्तेः ।

एवमेव अवद्यपण्यवर्यासूत्रे निपातनं किमर्थमिति सारतया वदन्ति -

।। अवद्यपण्यवर्या गर्ह्यपणित्व्यानिरोधेषु ।। ३-१-१०१।।

अवद्यादीन्यविभक्तिकानि नतु द्वन्द्वे जसन्त निर्देशः । अवद्यादयस्त्रयो यथासंख्यं गर्ह्यादिषु यदन्तानिपात्यन्ते । धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च अनुबन्धविकाराणां रूढ्यर्थश्च निपातनमिति निपातस्य अनेकप्रयोजनकत्वादाह- **उभयार्थमिति ।।**

एवमेव पण्या रूपविचारः -

पण व्यवहार इति धातोः व्यवहारेऽर्थे ण्यति प्राप्ते यद्विधीयते । निपातनस्य रूढ्यर्थत्वात् व्यवहर्तव्यत्वे वृत्तिरित्याह- **व्यवहर्तव्येत्यर्थ इति।। पाण्यमिति।।** ण्यत् ।

तथा च वर्या इत्यत्र विद्यमानः विचारः -

निपातनबलात्तु स्त्रियामेवेति मत्वोदाहरति- **शतेन वर्येति।।** संभक्तव्येत्यर्थः। कन्यावरणे वरयितृणामनियमात् अनीयतपरश्शतमिति शब्दकौस्तुभे । वृत्यान्येति । वृञ् वरणे क्यप् । ह्रस्वस्येति तुक् । अस्त्रियां वृङस्तु ण्यत् । वार्या ऋत्विज इति काशिका । भट्टिस्तु द्वन्द्वाज्जसा निर्देशं मत्वा पुंल्लिङ्गेऽपि प्रायुङ्क्त । सुग्रीवो मम वर्योऽसौ इति पुरुषोत्तमादयोऽप्येवं व्याचक्षते ।

एवञ्च २८५५ भुवो भावे ३-१-१०७ इत्यस्मिन् सूत्रे भावग्रहणफलम् अनेकग्रन्थसाररूपेण यच्छन्ति ।

ननु भुवो भाव इति सूत्रे भावग्रहणं व्यर्थम् भवतेरकर्मकत्वात् । नच उपसर्गात्तल्लाभः । अनुपसर्ग इत्यनुवृत्या तदभावादित्याशंक्य उत्तरार्थं भावग्रहणमिति भाष्यकारैरभिहितत्वात् भाव इत्यस्याकर्षणं भाष्यविरुद्धमित्यस्वरसादाह- **कर्मणि प्रत्यययावित्येक इति ।।**

अरुचिबीजन्तु भुवो भाव इत्यत्र भावग्रहणाभावे प्राप्त्यर्थात् कर्मणि प्रसङ्गात् सत्तार्थकात् कालादिकर्मणि प्रसङ्गाच्च भावग्रहणं तत्रावश्यकमिति कौस्तुभे स्थितम् ।

हरदत्तमिश्रास्तु अनभिधानात् कर्मणि तयोरप्रसङ्ग इत्याहुः- **अनुवाद्यमिति ।।** ण्यत् वृद्धिः ।

तथा च एति इत्यत्र धातुविचारः स्पष्टतया प्रतिपाद्यते -

।। एतिस्तुशास्वृदृजुषः क्यप् ।। ३-१-१०९।।

सुप्यनुपसर्गे भावे इति निवृत्तम् । एतीति श्तिपा निर्देशः इकारान्तव्यावृत्यर्थः तेन धातुर्लभ्यते । एतीति इण एव ग्रहणं नतु इङिकोः तयोरधिपूर्वयोरेव ग्रहणात् . . अन्यथा एतीति निर्देशानुपपत्तेः इण्वदिक इति वचनात् धातुसामान्यस्य ग्रहणमिति केचित् ष्टुञ् स्तुतौ, शासु अनुशिष्टौ, आङश्शासु इच्छायामित्यस्यापि अविशेषादिति हरदत्तः । वृञ् वरणे दृङ् आदरणे जुष प्रीतिसेवनयोः।। एभ्यः क्यप् स्यात् क्यबिति वर्तमाने पुनः क्यब्ग्रहणं बाधकबाधनार्थम् । तेन ओरावश्यक इति ण्यतं बाधित्वा क्यबेव । इत्य इति ।

एवमेव ई च खनसूत्रे इ चेति ह्रस्वः सुपठः इति कौमुदीपङ्क्तिम् अनेकग्रन्थ-समीक्षणद्वारा समर्थयन्ति

।। ईच खनः ।। ३-१-१११ ।।

खनु अवदारणे अस्मात् क्यप् ईकारश्चान्तादेशः।। ईत्वविधानप्रश्लेषेण ये विभाषेति परत्वात् प्राप्तमात्वं बाधितुं पुनर्विधानार्थम् । खेयमिति ।। ईत्वविधानान्नोपधालोपः ।

न च षत्वतुकोरसिद्ध इति तुकादेशस्यासिद्धत्वात् ह्रस्वविधाने तुक् स्यादिति वाच्यम् । वृक्षेच्छत्रमित्यादावाद् गुणस्यासिद्धत्वात् छे चेति ह्रस्वाश्रयमित्यतुग्वारणाय पदान्त-पदाद्योरेकादेशासिद्धत्वस्याश्रयणेनात्र तदप्रवृत्तेरिति भावः । ह्रस्वः सुपठ इति ।।

एवमेव चजोः सूत्रे यथासंख्यविषयं बोधयन्ति -

।। चजोः कु घि ण्यतोः ।। ७-३-५२ ।।

कार्यिनिमित्तयोर्न यथासंख्यम् । तेन रक्तं रागादितिलिङ्गादित्याशयेनाह- **चस्य जस्य चेति।।**

तथैव युग्यं च पत्रे सूत्रे युग्यशब्दार्थं सम्यक् प्रतिपादयन्ति-

।। युग्यञ्च पत्रे ।। ३-१-१२१ ।।

पतत्यनेनेति करणे दात्रिशेति तृन् वाहने वाच्ये । युग्येति युजः क्यबिति कुत्वञ्च निपात्यते । योग्यमन्यत् । ननु अत्र तद्वहतीति तद्धितयता सिद्धत्वादिदं सूत्रं व्यर्थमिति चेत् अत्र हरदत्तः । तद्धितयति कृद्यति क्यपि वा नरूपे स्वरे वा अविशेषः क्यपि धातुस्वरेण यति धातुस्वरेण यतो नाव इत्याद्युदात्तत्वेन, तद्धितयति ययतोश्चेति सूत्रेणायुग्यमित्यत्र अन्तोदात्तत्वेन कृद्योगे न चार्वादयश्चेति कृद्यत्प्रत्ययान्तेऽप्यन्तोदात्तस्याविशिष्टत्वेन स्वरभेदस्य दुरुपपादत्वादिति सूत्रं त्यक्तुमशक्यमित्याह हरदत्तः। तन्न ण्यतो बाधानापत्यायोग्यो गौरित्याद्यापत्तेः। युग्यो गौरिति सिद्धावपि योग्यो हस्तीति वृत्तिकारोक्तोदाहरणस्य असङ्गतत्वापत्तेश्च ।

नहि हस्ती युगं वहति युज्यते संबध्यते कृशादिनेति व्युत्पत्या कृति पुनस्संभवतीति चेत् भाष्यादिपर्यालोचनया स्वरभेदोऽप्यस्तीति सूत्रमावश्यकमिति कौस्तुभमनोरमयोः स्थितम् कुसुमाञ्जलिकृता तु नैतद्युक्तमिति अभिहितम् ।

एवमेव अमावस्यदन्यतरस्यां सूत्रेऽपि स्वरविषयाः प्रतिपाद्यन्ते -

।। अमावस्यदन्यतरस्याम् ।। ३-१-१२२ ।।

निपातनात् लुप्तसप्तमीकत्वाच्चोपपदग्रह इत्याह- **उपमोपपदादिति।। वसेरिति।।** वस निवासे इत्यस्य ।

स्यादेतत् । अमावस्यदिति निपातनं प्रकृत ण्यन्तस्य उत परं अप्रकृतस्य यदन्तस्य ? नाऽद्यः । तकारोच्चरणेन प्रकृतस्य क्यपो न निपातनमिति हरदत्तेनोक्तत्वात् । न द्वितीयः । यदा मुक्तेसति अमावास्येत्यधिकारे व्यतोदुर्लभत्वापत्तेः । न च बाहुलकात् तस्य सुलभत्वम् तस्यागतिकत्वात् । यदन्तस्य वस्याशब्दस्य यतोनाव इत्याद्युदात्तया अमावास्यशब्देऽपि कृदुत्तरपदप्रकृतिस्वरेण तस्यैवस्थितिप्रसङ्गात् ण्यति तु अन्तस्य स्वरितत्वमिष्यते । अपि च यति उपपदसमासाप्रसङ्गेन मयूरव्यंसकादित्वेन

समासोऽभ्युपगन्तव्यः स्यात् । तथा च गतिकारकोपपदादिति स्वरो न स्यात् । किञ्च अन्तोदात्तत्वं स्यात् इष्यते कृति स्वर एव अमावास्या सुभगासुशेवेत्यादौ स्वरितत्वस्य शेषनिघातकत्वस्य च निर्विवादतया दर्शनात् ।

अपि च अमावास्यायावेति ण्यदन्तस्य विधीयमानस्तर्हि यदन्तस्य नस्यात् तस्य भिन्नत्वात् अतः प्रकृत एव ण्यत् निपात्यत इत्यवश्याश्रयणीयम् । तथा च वार्तिकम् ।

एवमेव 'ण्यत्प्रकरणे लपिदभिभ्यां चेति वक्तव्यम्' इत्यत्र दभि धातोः विचारे अनेकपण्डितानाम् आशयान् उल्लिखन्ति

ण्यत्प्रकरण इति ।। लप व्यक्तायां वाचि दभि दम्भने एतयोः पोरदुपधादिति यति प्राप्ते वचनं लाप्यमिति । अत उपधाया इति वृद्धिः । ननु दभेर्धातुपाठेऽदर्शनात् अत्रानुवादोऽयुक्त इत्यत आह- **वार्तिकबलादिति ।।** कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमिति वार्तिकबलात् यथा भ्वादेराकृतिगणत्वेन चुलुम्पधातुसंग्रहः एवं दभेरपि प्रकृतवार्तिकबलात् सङ्ग्रहणमिति भावः । तथा श्रुतिः- 'न तानशन्ति न च भाति तस्करः' इति ।

हरदत्तादयस्तु चुरादिषु बहुळमेतन्निदरनमिति वचनात् प्रकृत्यन्तरमस्तीति स्वीकर्तव्य-मित्याहुः ।

प्रक्रियाकौमुदीकारस्तु प्रकृत्यन्तरकल्पने प्रमाणप्रयोजनयोरभावात् दाभ्यमिति प्रयोगो दम्भेरेवेत्याह ।। नतु तस्य अदुपधत्वाभावेन यतोऽप्रसङ्गात् ण्यतो विधानं व्यर्थमिति वाच्यम् । तत्सन्नियोगेन नलोपनिपातनार्थत्वेन दभेश्चेति वार्तिकस्यावश्यकत्वात् । अत एव नलोपिनो निर्देशान्नलोप इति निर्देशात् न लोप इति व्याचक्षते पण्डिताः । तन्मन्दम् हरदत्तादिमहाग्रन्थविरोधात् दाभ्य इति । वृद्धिः विष्णुर्गोपा अदाभ्यः इत्यादिप्रयोगो मूलम् ।

तथैव पाय्यसान्नाय्यसूत्रे निपातनानाम् अर्थं सम्यक् निर्दिशन्ति -

।। पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु।। ३-१-१२९।।

मानादिचतुर्षु अर्थेषु यथासंख्यं माङ् माने, णीञ् प्रापणे, चिञ् चयने, डुधाञ् धारणादौ एतेभ्यो ण्यन्निपात्यते । पाय्यसान्नाय्ययोः आदेः पत्वकत्वे च निपात्येते इति भाष्यकारोक्त्या कत्वञ्चेत्यर्थः । मानशब्दः करणसाधनमित्याह- **मीयतेऽनेनेति ।।** मेयमन्यत् । अत्र

भावकर्मणोः- र्यदेवम् ईद्यतीति ईत्वं गुणः । **हविरिति ।।** दीय्यत इति कर्मसाधन इति मत्वा दर्शयति- **नीयत इत्यादि ।।** ऐन्द्रं दध्यमावास्यायाम् ऐन्द्रं पयोऽमावास्यामित्यादि वाक्याभ्यां विहिते दधिपयसी सान्नाय्यशब्दार्थ इति श्रुतिकल्पसूत्रादिषु प्रसिद्धत्वादाह- **हविर्विशेष इति ।।** निपातनस्य रूढ्यर्थत्वादयमर्थ इति भावः । यदाह वृत्तिकारः ।

रूढिशब्दत्वाच्च हविर्विशेषेऽवतिष्ठत इति । तथा चाप्रति शरणमशीर्ण ज्योतिरग्न्याहितानां विधि विहितविरिब्धेः सामिधेनीरधीत्य । कृतगुरुदुरितौघ ध्वंसमध्वर्युमुख्यैः हुतमयमवलीढे साधुसान्नाय्यमग्निः । इतिमाघे हविर्मात्रे प्रयोगो व्याकरणविरुद्धत्वादप्रामाणिक इति हरदत्रादिभिरुक्त इति भावः । निकाय्य सान्नाय्य इति । भावकर्मणोर्यक् । निवास इति सूत्रे निवसत्यस्मिन्निति अधिकरणे घञ् गृहमुच्यत इति भावः । निचेयोऽन्यः । भावकर्मणोर्यक्गुणः, धाय्येत्यत्र दधात्यमिति कर्तरि ण्यत् समिदाधानद्वारा अग्निसमिध इति । कृष्णपण्डितादयः । माधवादयस्तु धीयत इति धाय्येति कर्मणि ण्यदित्याह । हरदत्तस्तु धीयते समिदनयेति करणेण्यदित्याह । एतेषु करणे ण्यत् पक्ष एवाश्रयितुं युक्तः । ऋच्येव धाय्या शब्दस्य रूढत्वादित्याशयेनाह- **धीयते अनयेति ।।** धातोर्ण्यत्युक् निपातनस्य रूढ्यर्थत्वात् नसर्वा सामिधेनी धाय्या किन्तु ज्योतिष्ठोममरुत्वतीये शस्त्रे धाय्याः शंसन्तीति विहिते मन्त्रे इदं निपातनमिति हरदत्तः ।।

सामिधेनीग्रहणन्तु प्रयोगविषयोपलक्षणार्थं बोध्यम् । **ऋगिति ।।** समिध्यमान-वतीसमिध्यवतीश्चान्तरेण विकृति प्रक्षिप्यमाणा पृथुपजामर्त्य इत्यादिकेत्यन्येतियमन्यत् । इत्वम् ।

इत्येवं रूपेण सुखबोधिनीव्याख्यायामस्यां बहवः विषयाः सरलतया विचार्यन्ते, अस्य ग्रन्थस्य लोकार्पणम् अचिरादेव भविष्यति, एवञ्च पत्रमिदम् पूर्णप्रज्ञसंशोधनमन्दिरद्वारा प्रज्ञाशोधपत्रिकायां प्रकाश्यत इति महान् सन्तोषः यतो हि बहुविदुषां बालानां च दृष्टिपथं गमिष्यति ।

यदत्र सौष्ठवं किञ्चित् तद्गुरोरेव मे नहि।
यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्न हि।।

।। इति शम् ।।

# विदुषा चोक्कनाथदीक्षितेन विरचितशब्दकौमुदीग्रन्थस्य परिचयः वैशिष्ट्यं च

**जी.कार्त्तिकेयन्**
शोधच्छात्रः
पूर्णाप्रज्ञसंशोधनमन्दिरम्
बेङ्गलूरु

लोके व्यवह्रियमाणासु सकलास्वपि भाषासु अत्यन्तं प्राचीनतमा विद्यते संस्कृतभाषा इति सर्वे जानन्त्येव । यस्याः कस्याश्चिदपि भाषायाः स्वरूपज्ञानार्थं तस्याः भाषायाः व्याकरणमेव सर्वैः आद्रियते । तथा च संस्कृतभाषायाः अपि स्वरूपज्ञानाय अपशब्द-निवृत्तिपूर्वकसाधुशब्दज्ञानपूर्वकप्रयोगाय च संस्कृतव्याकरणस्य अध्ययनमनिवार्यं भवति । सत्स्वपि बहुषु व्याकरणेषु त्रिमुनिव्याकरणम् इति प्रसिद्धं पाणिनिव्याकरणमेव सर्वैःआद्रियते अधीयते च । आचार्येण पाणिनिमहर्षिणा मूलभूतः अष्टाध्यायीनामकः ग्रन्थः विरचितः इति वयं सर्वे जानीमः । तदाधारीकृत्य महर्षिणा वररुचिना वार्त्तिकग्रन्थः, सूत्रवार्त्तिके आधारीकृत्य महर्षिपतञ्जलिना महाभष्यञ्च विरचिते इत्यप्यस्माभिः ज्ञायते । पाणिनीयमते, अष्टाध्यायीगतसूत्राणाम् अध्ययनं द्विधा क्रियते, यथा अष्टाध्यायीक्रमेण प्रक्रियनुसारेण च । तत्र काशिकादिग्रन्थेषु अष्टाध्यायीसूत्रक्रमेण, सिद्धान्तकौमुद्यादि ग्रन्थेषु प्रक्रियनुसारेण च सूत्राणि व्याख्यायन्ते । यद्यपि उभयथापि अध्ययनं सम्भवति तथापि अत्यधिकतया सर्वत्र प्रक्रियानुसारमेव व्याकरणमधीयते ।

**ग्रन्थपरिचयः**

विदुषा चोक्कनाथदीक्षितेन विरचितः श्ब्दकौमुद्याख्यः ग्रन्थः आचार्यैः भट्टोजिदीक्षितैः कृतं वैय्यकरणसिद्धान्तकौमुदीग्रन्थम् अनुकरोति । यथा कौमुद्यां प्रक्रियानुसारेण अष्टाध्यायीस्थसूत्राणि संकलय्य संज्ञाप्रकरणं, परिभाषाप्रकरणम् इत्येवं प्रकारेण प्रकरणैः विभज्य व्याख्यातानि तथैव अस्मिन् शब्दकौमुदीग्रन्थेऽपि व्यख्यातानि भवन्ति ।

अत्र च संज्ञाप्रकरणं, परिभाषाप्रकरणं, स्वरसन्धिप्रकरणं, हल्सन्धिप्रकरणं, विसर्गसंधिप्रकरणं, स्वादिप्रक्रियायाम् अजन्तपुँल्लिङ्गप्रकरणम्, अजन्तस्त्रीलिङ्गप्रकरणम्,

अजन्तनपुंसकलिङ्गप्रकरणं, हलन्तपुँल्लिङ्गप्रकरणं, हलन्तस्त्रीलिङ्गप्रकरणं, हलन्तनपुंसक-लिङ्गप्रकरणम्, अव्ययप्रकरणं, स्त्रीप्रत्ययप्रकरणं, विभक्त्यर्थप्रकरणं, अव्ययीभावप्रकरणं, तत्पुरुषप्रकरणं, बहुव्रीहिप्रकरणम्, अलुक्समासप्रकरणं, समासाश्रयविधिप्रकरणम् इति रीत्या लक्ष्यसिद्ध्यनुरोधेन पूर्वोक्तक्रमेण प्रकरणेषु सूत्राणि सुष्ठु व्याख्यातानि सन्ति ।

ग्रन्थोऽयं परमेश्वरदेवताक नमस्कारात्मक मङ्गलश्लोकेन प्रारभ्यते एवम्-

सोमास्कन्दं शिवं नत्वा पाणिन्यादिमुनीश्वरान् ।
गुरूंश्च तुष्टये विष्णोः कलये शब्दकौमुदीम् ।।

इति उमया स्कन्देन च साकं विराजमानं परमेश्वरं, पाणिन्यादि मुनीश्वरान् , गुरून् च नमस्कृत्य, भगवतः नारायणस्य प्रीत्यै शब्दकौमुद्याख्यं ग्रन्थमिमं करोमि इति गुरुदेवतावन्दनपूर्वकं प्रकृतग्रन्थविरचनं प्रतिजानीते ।

तथा अस्या उत्तरार्धे-

'सोमास्कन्दं पुरानन्दं कर्पूरधवलं शिवम् ।
रत्नसिंहासनारूढं त्यागराजमहं भजे ।।'

इति मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि च अध्येतारः च सिद्धार्था यथा स्युः(पस्पशाह्निके धर्मजनकताधिकरणम्) इति भाष्योक्तदिशा मध्येऽपि मङ्गलं पठ्यते इत्युच्यते । अतः अस्याः उत्तरार्धमपि विद्यते इति ज्ञायते । ग्रन्थस्य शैली अतिरमणीया भवति । ग्रन्थस्य अपाततः अवलोकनेनैव ग्रन्थकाराणां पाण्डित्यम् अवगन्तुं प्रभवामः ।

इदानीम् उपलभ्यमानप्रकृतग्रन्थविषयकमातृकयोः समासाश्रयविधिप्रकरणपर्यन्तं दृश्यते । तथा अस्य ग्रन्थस्य 'शाब्दिकरक्षा' इति व्याख्या अपि उपलभ्यते मातृकासु ।

**ग्रन्थकर्तुः परिचयः**

ग्रन्थकाराणां संपूर्णं नाम- चोक्कनाथमखी अथवा चोक्कनाथदीक्षितः । उभयथापि एतेषां नाम गृहीतं दृश्यते शोधपत्रेषु । एषां मातुः नाम गणपतिः, पितुः नाम च भवति नारायण इति ग्रन्थकाराणां पद्यैरेव अवगन्तुं शक्यते ।

'शिवं गणपतिं चाम्बां द्वादशाहादियाजिनम् ।
तातं नारायणं नत्वा धातुपाठं समारभे ।।'

इति इदं पद्यं प्रकृतग्रन्थकाराणां कृतिषु अन्यतमस्य धातुरत्नावाली इत्याख्यस्य आदिमं पद्यं भवति इति ढरपर्क्षीश Sarasvati Mahal Descriptive Catalogue मध्ये उक्तं दृश्यते । अत्र अम्बां गणपतिं, तातं नारायणम् इति पित्रोः नाम निर्दिष्टं दृश्यते । प्रकृतग्रन्थकारैः शब्दकौमुदी, भाष्यरत्नावलिः, धातुरत्नावलिः इति ग्रन्थत्रयं विरचितं भवति इति DESCRIPTIVE C-T-LOGUE OF THE S-NSKRIT M-N-SCRIPTS IN Tanjore Maharaja Serfoji's Sarasvatimahal Library Thanjavur. Volume 10 - VY-K-R-N- (Nos.5326-5971) इत्यस्य पुस्तकस्य अवलोकनेन ज्ञातुं शक्यते ।

तथा च इमे प्रशस्तपण्डितानां नैकशास्त्रपारङ्गतानां श्रीरामभद्रदीक्षितानां श्वशुराः इति Tanjore Sarasvati mahal descriptive catalogueमध्ये उक्तं दृश्यते । प्रकृतग्रन्थस्य वीक्षणेन वृत्यादिग्रन्थेषु, महाभाष्यतद्व्याख्यानादिषु च एषां महत् वैदुष्यं भवति इति निश्चप्रचं वक्तुं शक्यते । बहुत्र हरदत्तमिश्रकृतां काशिकाव्याख्यां पदमञ्जरीमनुसृत्यैव स्वकियं मतम् उपस्थापयन्ति इति ग्रन्थपर्यालोचनया ज्ञातुं शक्नुमः । एषां पुत्राः अपि महान्तः वैय्याकरणाः आसन् । एभिरेव प्रकृतग्रन्थस्य शाब्दिकरक्षाख्या व्याख्या अपि कृता विद्यते ।

## ग्रन्थस्य वैशिष्ट्यम्

'शब्दकौमुदी' इत्याख्यस्य अस्य ग्रन्थस्य कौमुदीग्रन्थात् अर्वाचीनत्वात्, अत्र तद्गता एव विषयाः सरलतया अपेक्षितसन्दर्भेषु सुदीर्घतया च प्रतिपाद्यन्ते । क्वचित् कौमुदीव्याख्याग्रन्थेषु ये विषयाः प्रतिपादिताः ते, प्रकृतग्रन्थे मूले एव प्रतिपाद्यन्ते । उदाहरणतया हल्सन्धिप्रकरणे 'स्तोः श्चुना श्चुः' (८/४/४०) इति सूत्रे, उद्देश्यनिमित्तयोः यथासंख्यानुदेशः नास्ति शात् इति लिङ्गाद् इत्ययं विषयः कौमुदीव्याख्यायां तत्वबोधिन्यामेव प्रतिपादितः, परन्तु प्रकृतग्रन्थे शादिति निषेधात् निमित्तं प्रति संख्यानुदेशाभावः इति मूले एव प्रतिपाद्यते ।

तथा कौमुद्यामविचारिताः अपि विषयाः अत्र विचार्यन्ते । उदाहरणतया शि तुक् (८/३/३१) इति सूत्रं हल्सन्धिप्रकरणे पठितम् । अत्र प्रकृतग्रन्थे कुर्वन् शेते इत्यत्र

नस्यापदान्तत्त्वात् प्राप्तस्य णत्वस्य स्तोश्चुनेति योगविभागेन निषेध इति वृत्तिः इति निरूप्यते । प्रकृतसूत्रे काशिकायां यद्येवं कुर्वञ् च्छेते इत्यत्र नकारस्यापदान्तत्वाण्णत्वं प्राप्नोति? इति प्रश्नमुद्भाव्य तत्र समाधिमाहुः- 'स्तोः श्चुना श्चुः' (८/४/४०)इत्यत्र योगविभागः क्रियते णत्वप्रतिषेधार्थं, स्तोः श्चुना णत्वं न भवतीति । ततः श्चुरिति । अयमेव विचारः अत्र प्रस्तूयते स्तोश्चुना श्चुरित्यत्र योगविभागेन णत्वप्रतिषेधः इति । अयं विचारः कौमुद्यां न दृश्यते । डु कृञ् करणे इति धातोः शतरि , कुर्वत् इति प्रातिपदिकात् सौ, नुमागमे, सुलोपे, 'संयोगान्तस्य लोपः' (८/२/२३) इति तकारलोपे कुर्वन् इति रूपं निष्पद्यते । कुर्वन् शेते इत्यत्र 'अट्कुप्वाङ्नुम्वयवायेऽपि' (८/४/२) इति सूत्रदृष्ट्या 'संयोगान्तस्य...' (८/२/२३) इत्यस्य परशास्त्रत्वेन असिद्धत्वात्, नकारस्य अपदान्तत्वात् 'पदान्तस्य' (८/४/३७) इत्यनेन णत्वनिषेधस्य वक्तुमशक्यत्वात् च, णत्वे प्राप्ते पूर्वोक्तप्रकारेण णत्ववारणं क्रियते । अयं विचारः कौमुद्यां न कृतः ।

तथा 'एतत्तदोस्सुलोपोऽकोरनञ्समासे हलि' (६/१/१३२) इति सूत्रं विसर्गसन्धिप्रकरणे पठितम् । अत्र प्रकृतग्रन्थे दलप्रयोजनविषये अकोः किम्? एषको रुद्रः । तन्मध्य पतितस्तद्ग्रहणेन गृह्यते(प.भा-९०)इति स्वरूपभेदेऽपि प्रसङ्गः । अस्याः परिभाषायाः अस्तित्वेऽयमेव लिङ्गम् इति पठ्यते । एतच्छब्दात् 'अव्यय-सर्वनाम्नामकच्प्राक्टेः' (५/३/७१) इत्यनेन अकचि एषकशब्दः निष्पद्यते । 'एषको रुद्रः' इत्यत्र एषकशब्दः एतच्छब्दात् न भिन्नः पूर्वोक्तपरिभाषया एतच्छब्दमध्यपतितस्यापि अकचः एतच्छब्दत्वेन ग्रहणात् । अयं विचारः कौमुद्यां न दृश्यते । तथा 'औतोऽम्शसोः' (६/१/९३) इति सूत्रम् अजन्तपुँल्लिङ्गप्रकरणे पठितम् । अत्र प्रकृतग्रन्थे आ ओतः इतिच्छेदः । व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् (प.भा-९०) इति प्रोक्तम् । कौमुद्याम् अत्र सूत्रे इयं परिभाषा न उल्लिखिता ।

तथा प्रकृतग्रन्थे अजन्तस्त्रीलिङ्गप्रकरणे मतिशब्दरूपनिरूपणानन्तरम्अशन्यादीनामुभय-लिङ्गानां शुच्यादीनां गुणशब्दानामपि शब्दार्थ एव स्त्रीत्त्वमिति 'ङिति ह्रस्वश्च' (१/४/६) इति नदीसंज्ञा भवत्येव । आख्याग्रहणं हि पदान्तरनिरपेक्षस्त्रीत्वार्थग्रहाणार्थम् । नित्यस्त्रीलिङ्गानामेव नदीत्वमित्यन्ये । तेऽपि 'ङिति ह्रस्वश्च' (१/४/६) इत्यत्र

स्त्रीशब्दस्यैवानुवृत्तिः नाख्याग्रहणस्येत्याहुः' इति हरदत्तमिश्राः इति पठ्यते । काशिकायां 'यूस्त्र्याख्यौ नदी' (१/४/३) इति सूत्रवृत्तौ दलप्रयोजननिरूपणावसरे आख्याग्रहणं किम्? शब्दार्थे स्त्रित्व एव यथा स्यात्, पदान्तराख्ये मा भूत् - ग्रामण्यै स्त्रियै, खलप्वे स्त्रियै इति पठितम् । तद्व्याख्यायां हरदत्तमिश्रविरचितपदमञ्जर्यांशब्दार्थस्त्रीत्व इति प्रतीकमुद्धृत्य आख्याग्रहणसामर्थ्यात् पदान्तरमनपेक्ष्य यौ स्वयमेव स्त्रियमाचक्षाते इत्याश्रीयते । इष्वशनिप्रभृतीनां तु उभयलिङ्गानां शब्दार्थ एव स्त्रीत्वमिति 'ङिति ह्रस्वश्च' इति नदीसंज्ञा भवत्येव, एवं पटुप्रभृतीनां गुणश्ब्दानामपि शब्दार्थ एव स्त्रीत्वम् । पटुरानीयतामित्युक्ते स्त्रियमप्यानीय कृती भवति । अन्ये त्वाहुः- न आख्याग्रहण-सामर्थ्यान्नियम आश्रीयते- स्त्रियमेव यावाचक्षाते न तु लिङ्गान्तरयुक्तम् इति । ग्रामणीखलपूशब्दयोस्तु क्रियाशब्दत्वेन त्रिलिङ्गत्वान्न भवति । इष्वशनिप्रभृतीनां तु स्त्रीविषयत्वाभावेऽपि 'ङिति ह्रस्वश्च' इत्यत्र केवलस्य स्त्रीशब्दस्यैवानुवृत्तिः न आख्याग्रहणस्य इति प्रतिपाद्यते । अयमेव विषयः प्रकृतग्रन्थकारैः विषयतः संगृहीतः। एवञ्च पूर्वोक्तपक्षद्वयपरिशीलनेन इष्वशनिप्रभृतीनाम् उभयलिङ्गानांशुच्यादीनां गुण-शब्दानामपि 'ङिति ह्रस्वश्च' इत्यनेन वैकल्पिकनदीसंज्ञया इष्वै इषवे, अशन्यै अशनये, शुच्यै शुचये इत्यादिरूपाणि सिद्ध्यन्ति।अयं विचारः कौमुद्यां न प्रतिपादितः।

तथा च हलन्तपुँल्लिङ्गप्रकरणे 'अर्वणस्त्रसावनञः' (६/४/१२७) इति सूत्रं सार्थोदाहारणपुरस्सरं प्रतिपाद्य मघवा बहुलम् (६/४/१२८) इति सूत्रं पठ्यते । तत्र सूत्रार्थनिरूपणानन्तरम् उगित्वान्नुम् । मघवान् । बहुलग्रहणात् संयोगन्तलोपस्यासिद्धत्वाभावे उपधादीर्घः । अत एव - अर्वणस्तृमघोनश्च न शिष्यं छान्दसं हि तत् । मतुब्वन्योर्विधानाच्च छन्दस्युभयदर्शनात् इति सूत्रद्वयमपि प्रत्याख्यातम् । भाषायान्तु औणादिकनिनन्तस्य मघवच्छब्दस्य प्रयोगः । मघं धनमस्यास्तीति मतुपि तकारान्तःइति पठितम् ।मघवन् सु इत्यवस्थायां प्रकृतसूत्रेण त्रादेशे अनुबन्धकार्ये जाते मघवत् सु इति स्थिते उगिदचां सर्वनामस्थानेऽधातोः इति सूत्रेण नुमागमे मघवन् त् सुइति स्थिते 'हल्ङ्याभ्यो दीर्घात् सुतिस्यपृक्तं हल्' (६/१/६८) इति सूत्रेण सुलोपे, 'संयोगान्तस्य लोपः' (८/२/२३) इति संयोगान्तलोपे कृते मघवन् इति स्थिते नान्तत्वात् 'सर्वनामस्थाने चासम्बुद्धौ (६/४/८) इत्यनेन दीर्घे मघवान् इति रूपं निष्पद्यते । अत्र दीर्घे कर्तव्ये, तद्दृष्ट्या त्रैपादिकस्य संयोगान्तलोपस्य असिद्धत्वेन कथमुपधादीर्घः इति आशङ्का । तदोच्यते

बहुलग्रहणात् संयोगन्तलोपस्यासिद्धत्वाभावे उपधादीर्घः इति । एवञ्च

'क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।
शिष्टप्रयोगाननुसृत्य लोके विज्ञेयमेतद्बहुलग्रहे तु ।।'

इत्युक्तत्वात् सूत्रे बहुलग्रहणात्, शिष्टप्रयोगानुसारेण प्रकृते संयोगान्त-लोपस्यासिद्धत्वाभावः, तेन च मघवान् इति रूपं सिद्ध्यत्येव । एवं बहुलग्रहणेन कथञ्चित् साध्यते इत्यतः, वेदे एव अस्य प्रयोगः प्रायः दृश्यते इत्यतश्च सूत्रमेतत् एतत्पूर्वतनं सूत्रञ्च भाष्ये प्रत्याख्यायेते इत्युच्यते एवंअत एव -'अर्वणस्तृमघोनश्च न शिष्यं छान्दसं हि तत् । मतुब्वन्योर्विधानाच्च छन्दस्युभयदर्शनात्' इति सूत्रद्वयमपि प्रत्याख्यातम् इति । भाष्ये च अर्वणस्त्रसावनञः (६/४/१२७) मघवा बहुलम् (६/४/१२८) इति सूत्रयोः, सूत्रप्रत्याख्यानश्लोकवार्त्तिकं पठित्वा तदर्थश्च प्रतिपाद्यते'अर्वणस्तृमघोनश्च न शिष्यं छान्दसं हि तत्' । (भाष्यम्) अर्वणस्तृमघोनश्च न शिष्यः । किं कारणं? छान्दसं हि तत् । दृष्टानुविधिछन्दसि भवतीति । 'मतुब्वन्योर्विधानाच्च'(भाष्यं) मतुब्वनी खल्वपि छन्दसि विधीयेते । 'छन्दस्युभयदर्शनात्' (भाष्यं) उभयं खल्वपि छन्दसि दृश्यते इति । अनया भाष्यपर्यालोचनया मघवन्शब्दः भाषायां न भवतीति ज्ञायते । परन्तु हविर्जक्षिति निःशङ्को मखेषु मघवानसौ इत्यादौ भाषायामपि दृश्यते इति चेत्, तत्र उच्यते भाषायान्तु औणादिकनिनन्तस्य मघवच्छब्दस्य प्रयोगः । तथा मघं धनमस्यास्तीति मतुपि तकारान्तश्च पाठः भाषायां साधुः भवति इति उच्यते । कौमुद्यान्तु श्वन्नुक्षन्.....(उ.सू-१५७) इति निपातनात्, मघशब्दान्मतुपा च भाषायामपि शब्दद्वयसिद्धिमाश्रित्य एतत्सूत्रं प्रत्याख्यातमाकरे इत्येव उक्तम्, पूर्वोक्तः भाष्यविचारः न प्रतिपादितः ।

प्रकृतग्रन्थकर्तारः महान्तः वैय्याकरणाः भवन्ति इति कारणात् , क्वचित्भाष्यगतगम्भीर-विषयान् अपि सरलया शैल्या प्रतिपादयन्ति।एभिः भाष्यरत्नावलिःइत्याख्यः ग्रन्थः विरचितः इति पूर्वमेव उक्तम् । अयं ग्रन्थः भाष्यस्य व्याख्याभूतः भवति इत्यतः , एषां भाष्ये अत्यधिकं प्रावीण्यं भवति इति ज्ञातुं शक्यते ।तथा च अस्य ग्रन्थस्य शैली अपि अतीव सरला विद्यते । अत्र च अल्पशब्दैरेव महतो विषयस्य प्रतिपादनं क्रियते । अतः ग्रन्थस्य अस्य अध्ययनेन सूत्रार्थानामवगतिः शास्त्रबालानां छात्राणामस्माकम् अतिसुलभा भवति इति निश्चप्रचं वक्तुं शक्यते ।

**ग्रन्थस्य प्रयोजनम्**

अयं ग्रन्थ: सिद्धान्तकौमुदीम् अनुकरोति इति पूर्वमेव उक्तम् । अत: यथा

'कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रम: ।
कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रम: ।।'

इति यथा कौमुद्यध्ययनेन पाणिनीयव्याकरणस्य संपूर्णं स्वरूपं स्फुटतया अवबुध्यते इति उच्यते , तथा ग्रन्थस्य अस्य अध्ययनेनापि भवति । तथा ग्रन्थयोः उभयो: तोलनेनापि विशिष्टं विवेचनात्मकं ज्ञानम् अवाप्यते । तथा कौमुद्याम् उक्तान् एव विषयान् अस्मिन् ग्रन्थे शब्दान्तरेण अधीत्य तान् मनसि स्थिरीकर्तुं शास्त्रबालाः वयं पारयामः, तथा तत्र अनुक्तनामगाधविषयाणामपि परिचयः भवत्यस्माकम् ।अयं ग्रन्थः कौमुद्यपेक्षया प्रौढः भवति इत्यतः एकवारं सिद्धान्तकौमुदीं सम्यगधीत्य ग्रन्थमिमं परिशीलयामश्चेत्, कौमुदीगतविषयाणाम् इतोऽपि स्फुटप्रतीतिः भवेत् इत्यत्र नास्ति संशयः । यतो हि प्रकृतग्रन्थे ये ये विषयाः प्रतिपाद्यन्ते, ते सर्वेऽपि भाष्यात् वा पदमञ्जर्याः वा वाक्यान्यादाय सप्रमाणं निरूपिताः दृश्यन्ते । एवं प्रकृतग्रन्थे बहुत्र काशिकाकारमतम् अवलम्ब्य विषयाः प्रतिपाद्यन्ते । अतः काशिकाग्रन्थस्यापि परिचयः शास्त्रबालानाम् अस्माकं किञ्चिदिव भवेत् । यतो हि प्रायः सर्वत्र कौमुद्याधारेणैव खलु सूत्राणि अध्याप्यन्ते ।

तथा प्राचीनकाले व्याकरणस्य प्रचार: कियान् आसीत्, एवं तत्कालीनवैय्याकरणविद्वांस: व्याकरणं कथं ररक्षुः इत्यपि अर्वाचीनैरस्माभिः ज्ञातुं शक्यत इति शम् ।

## Bibliography/ सहायकग्रन्थसूची

१ श्रीमद्विद्वद्वरहरदत्तमिश्रविरचिता काशिका व्याख्या ।
सम्पादकौ- डां जयशंकर लाल त्रिपाठी, डां सुधाकर मालवीयः ।

२ श्रीमद्विद्वद्वरवामनजयादित्यविरचिता पाणिनीयसूत्रवृत्ति: काशिका
सटिप्पनप्रकाशहिन्दीव्याख्योपेता
व्याख्याकार: - श्रीनारायणमिश्र:
प्रकाशकः - चौखम्बा प्राकाशन् (२०११)

३ श्रीमद्भट्टोजिदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी बालमनोरमातत्वबोधिनीसहिता
संशोधकौ- गिरिधरशर्मा चतुर्वेदी, परमेश्वरानन्द शर्मा विद्याभास्कर:
प्रकाशक: - मोतीलाल् बनारसिदास् (२००४)

४ श्रीमन्महर्षिपतञ्जलिप्रणीतं व्याकरणमहाभाष्यं श्रीमदुपाध्यायेन कैय्यटप्रणितेन भाष्यप्रदीपेन श्रीमन्नागेशभट्टविरचितेन उद्योतेन च समुल्लासितम् ।श्रीभार्गवशास्त्रिणा टिप्पणीपाठभेदपुरस्सरं संशोधितम् ।

६ Descriptive catalogue of the Sanskrit Manuscripts in the Tanjore Maharaja Serfoji's Saraswathi Mahal Library, Tanjore, T.M.S.S.M² Library, Tanjore - 9 (1990)

७ PROCEEDINGS -ND TR-NS-CTIONS OF THE -LL-INDI- ORIENT-L CONFERENCE, Thirteenth Session, Nagpur University 1946

❒❒❒